ISSN : 0975-1769

# संस्कृतविमर्शः

## भारतीयज्ञानपरम्पराविशेषाङ्कः - ०१

UGC-CARE Listed International Refereed &
Peer-reviewed Research Journal

अङ्कः 25 - वर्षम् 2025

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
देहली

# संस्कृतविमर्शः

**UGC-CARE Listed International Refereed and Peer-reviewed Research Journal**

अङ्कः 25 (जुलाई २०२३ – दिसंबर २०२३) वर्षम् २०२५

## भारतीयज्ञानपरम्पराविशेषाङ्कः – 1

**प्रधानसम्पादकः**

आचार्यः श्रीनिवासः वरखेडी
कुलपतिः

**कार्यकारी सम्पादकः**
आचार्यः गणेश ति. पण्डितः

## केन्द्रीयसंस्कृतविश्वविद्यालयः

**संसदः अधिनियमेन स्थापितः**
**देहली - ११००५८**

प्रकाशकः

**कुलसचिवः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

(संसदः अधिनियमेन स्थापितः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली – 110058

011-28524993, 28521994, 28520977

Email : academic_publication@csu.co.in

Website : www.sanskrit.nic.in

© केन्द्रीयसंस्कृतविश्वविद्यालयः

ISSN : 0975-1769

CARE ID : 101000019

प्रकाशनतिथिः – 13.01.2025

मूल्यम् – 300.00

**ग्राहकताशुल्कम्**

त्रैवार्षिकम् – 1800.00

पञ्चवार्षिकम् – 3000.00

**मुद्रकः**

डी.वी. प्रिंटर्स

97-यू.बी. जवाहर नगर, दिल्ली - 110007

# SAṂSKṚTA-VIMARŚAḤ

**UGC-CARE Listed International Refereed and Peer-reviewed Research Journal**

**Vol. 25 (July 2023 – December 2023) Year 2025**

## IKS Special Edition – 1

**Editor in Chief**

Prof. Shrinivasa Varakhedi
Hon'ble Vice Chancellor

**Executive Editor**
Prof. Ganesh T. Pandit

**CENTRAL SANSKRIT UNIVERSITY**

**(Established by an act of Parliament)**

**Delhi - 110058**

Publisher

**Registrar**

**Central Sanskrit University**

56-57, Institutional area, Janakpuri, New Delhi – 110058

011-28524993, 28521994, 28520977

Email : academic_publication@csu.co.in

Website : www.sanskrit.nic.in

© Central Sanskrit University

ISSN : 0975-1769

CARE ID : 101000019

Publication Date – 13.01.2025

Rs. 300.00

**Subscription**

Three Years – 1800.00

Five Years – 3000.00

**Printed by**

D.V. Printers

97-U.B. Jawahar Nagar, Delhi- 110007

## परामर्शदातृ-समितिः

1. **प्रो. बनमाली बिश्वालः**
   निदेशकः, श्री सदाशिवपरिसरः
   केन्द्रीयसंस्कृतविश्वविद्यालयः, पूरी

2. **प्रो. ललित कुमार त्रिपाठी**
   शोधाधिष्ठाता निदेशकश्च गङ्गानाथझापरिसरः,
   केन्द्रीयसंस्कृतविश्वविद्यालयः प्रयागराजः, उत्तरप्रदेशः

3. **प्रो. गोदावरीमिश्रः**
   सङ्कायाध्यक्षः SBSPCR, नालन्दाविश्वविद्यालयः,
   राजगृहम्, बिहारः, पिन-803116

4. **प्रो. शशिप्रभाकुमारः**
   अध्यक्षा, IIAS, शिमला, हिमाचलप्रदेशः, पिन-171004

5. **प्रो. रमेशकुमारपाण्डेयः**
   कुलपतिचरः, श्रीला.ब.शा.रा.सं.वि.वि.,
   नवदेहली, पिन-110016

6. **प्रो. राधाकृष्ण सि.एस.**
   संस्कृतविभागः, पाण्डेचेरिविश्वविद्यालयः,
   पाण्डेचेरी पिन- 605014

**सम्पादकसमितिः**

प्रो. काशीनाथ न्यौपाने, निदेशकः, प्रकाशनम्
प्रो. सुज्ञानकुमारमाहान्तिः, संयुक्तनिदेशकः, प्रकाशनम्
प्रो. गणेश ति. पण्डितः, संयुक्तनिदेशकः, प्रकाशनम्
डॉ. पवनव्यासः, संयुक्तनिदेशकः, प्रकाशनम्

**eBook विन्यासः** - श्रीशसमीरः के. एस्.

## ADVISORY-BOARD

1. **Prof. Banmali Biswal**
   Director, Shri Sadashiva Campus,
   Central Sanskrit University, New Delhi
2. **Prof. Lalit Kumar Tripathi**
   Dean, Director, Ganganath Jha Campus
   Central Sanskrit University,
   Prayagraj (U.P.) Pin - 211002
3. **Prof. Godavri Mishra**
   Dean, SBSPCR, Nalanda University,
   Rajgir (Bihar) Pin - 803116
4. **Prof. Shashi Prabha Kumar**
   President, IIAS Society, Shimla,
   Himachal Pradesh, Pin-171004
5. **Prof. Ramesh Kumar Pandey**
   Ex-Vice Chancellor, LBS National Sanskrit University
   New Delhi, Pin – 110016
6. **Prof. Radhakrishna P.**
   Deparment of Sanskrit, Pondicherry University
   Pondicherry - 605014

**Editorial-Board**

Prof. Kashinath Nyaupane, Director, Publication

Prof. Sugyan Kumar Mahanty, Joint Director, Publication

Prof. Ganesh T. Pandit, Joint Director, Publication

Dr. Pawan Vyas, Joint Director, Publication

**eBook Formatting** – Shreesha Sameera K.S

# सम्पादकीयम्

केन्द्रीयसंस्कृतविश्वविद्यालयः भारतीयज्ञानपरम्परासम्बद्धान् विशिष्टान् ग्रन्थान् नैरन्तर्येण प्रकाशयति। विश्वविद्यालयस्य विशिष्टाः ग्रन्थमालाः अपि अद्यत्वे प्रसिद्धाः सन्ति। उपोद्घातग्रन्थमाला, सङ्क्षेपग्रन्थहारमाला, अमृतमहोत्सवग्रन्थमाला इत्याद्याः ग्रन्थमालाः अभिनवैः ज्ञानविज्ञान-विशेषोपेतैः ग्रन्थैः शोभन्तेतराम्। विश्वविद्यालयस्य प्रकाशनानुभागेन एकस्मिन् एव सत्रे उपशतं ग्रन्थाः प्रकाशिताः (२०२४) सन्ति। यथा ग्रन्थाः तथैव विश्वविद्यालयस्य शोधपत्रिकाः अपि प्रसिद्धाः सन्ति। शोधपत्रिकासु बह्वीसु केन्द्रीयसंस्कृतविश्वविद्यालयेन प्रकाश्यमाना संस्कृतविमर्शः इत्येषा शोधपत्रिका अद्यत्वे अभिनवोत्कर्षेण राजते। पत्रिकायामस्यां भारतीयज्ञान-विज्ञानपरम्परायाः द्योतकाः लेखाः एकत्रीकृत्य प्रकाशिताः सन्ति। साम्प्रतं पञ्चविंशः अङ्कः भारतीयज्ञानपरम्पराविशेषाङ्कः इत्येव अभिधीयते।

यद्यपि सर्वेऽपि संस्कृतवाङ्मयेन सम्बद्धाः लेखाः भारतीयज्ञानपरम्प-रायामेव अन्तर्भवन्ति तथापि विशेषो नाम अत्र ज्ञानविशेषाधारिताः शोधलेखाः एकत्रीकृताः सन्ति। अङ्कोऽयं गात्रेणापि सुमहान् वर्तते। संस्कृतेन सह हिन्द्याम् आङ्ग्लभाषायां च लिखिताः चिताश्च लेखाः अस्मिन् विशेषाङ्के सन्ति।

अद्यत्वे केन्द्रीयसंस्कृतविश्वविद्यालयेन समारब्धे सदस्यताभियाने नामाङ्कनं कृतवतां पाठकानां संख्या अपि समेधमाना वर्तते। एवमेव मार्गदर्शकैः सह शोधच्छात्राः अपि शोधलेखान् लिखन्तः दृश्यन्ते। गुरुशिष्ययोः अर्थात् मार्गदर्शकशोधच्छात्रयोः परिश्रमः तत्परता च केषुचित् लेखेषु विशेषतः प्रतिफलन्त्यपि। विशिष्य सर्वेऽपि मार्गदर्शकाः शोधच्छात्राः विद्वांसः च अस्यां दिशि उत्सुकाः भवेयुः। शोधपत्रिकायाः अभिनवाङ्के आहत्य चतुस्त्रिंशत्संख्याकाः लेखाः सन्ति। एतेषु लेखेषु बहवो हि लेखाः

ज्ञानपरम्परायाः विशेषांशान् आश्रित्यैव विद्वद्भिः विलिखिताः सन्ति। अतः लेखकेभ्यः सम्पादनसमितिपक्षतः साधुवादान् व्याहरामि।

अस्याः पत्रिकायाः प्रधानसम्पादकाः सन्ति कुलपतयः आचार्य-श्रीनिवासवरखेडीवर्याः। तेभ्यः विशेषरूपेण धन्यवादान् व्याहरामः। युवकुलसचिवेभ्यः आचार्यगायत्रीमुरलीकृष्णवर्येभ्यः प्रकाशननिदेशकेभ्यः आचार्यकाशीनाथन्यौपानेवर्येभ्यः, संयुक्तनिदेशकयोः प्रो. सुज्ञानकुमार-माहान्तिः तथा डा. पवनव्यासवर्ययोः कृतेऽपि धन्यवादान् व्याहरामः। पुटविन्यासकर्मणि अहर्निशं कार्यकृतवते आयुष्मते श्रीशसमीराय अन्येभ्य-श्चापि धन्यवादान् व्याहरामः। सद्यः एव षड्विंशः अङ्कोऽपि पाठकानां हस्तगतः भविष्यतीति शिवम्।

**सम्पादनसमितिपक्षतः**

**आचार्यः गणेशतिम्मण्णपण्डितः**

# विषयानुक्रमणिका


सम्पादकीयम् **I**

विषयानुक्रमणिका **III**

संस्कृतप्राकारः

**1.** मीमांसाश्लोकवार्तिकरीत्या ज्ञानानां सालम्बनत्वसाधनम् **1**
एस् वेङ्कटेशताताचार्यः

**2.** सा भारती भारती **20**
प्रो. गौरप्रियादाशः

**3.** भारतीयसामाजिकजीवने मनुस्मृतेः प्रभावः **36**
डॉ. रूपा वि.

**4.** नृत्ये आध्यात्मिकतायाः स्थानम् एकं समीक्षणम् **43**
शङ्कर च्याटार्जि
अमलकुमारकरः

**5.** भारतीयज्ञानपरम्पराशिक्षणम् **54**
प्रो. राघवेन्द्रभट्टः

**6.** पताकाम्नायेऽभिचित्रितायाः भारतराष्ट्रीयमुद्रायाः दार्शनिकं विवेचनम् **63**
डॉ. कामेश्वर शुक्लः

**7.** नीतिशतके मानवतावादस्यावधारणा **72**
डा. मृत्युञ्जय गराँइ

**8.** धर्मस्य सामाजिकव्याख्या **82**
डॉ. सुबोधकांत मिश्र

**9.** कालिदासस्य नाटकीयगुणोत्कर्षसाधनानि **97**
डा. दीपिका दीक्षितः

**10.** उदात्तानुदात्तस्वरितालोके पाणिनेः दृष्टिः **104**
डॉ उमाकान्त शुक्लः

**11.** भास्कराचार्योक्तरीत्या प्रकारचतुष्टयेन कर्णानयनम् **117**
गिरीशभट्टः बि

**12.** पुराणेषु यमयोगाङ्गविमर्शः **127**
डॉ. अरविन्दकुमारपाण्डेयः

**13.** वैदिकस्वरप्रक्रियाया: वैज्ञानिकता **137**
नीरज पन्त

**14.** वैदिकसाहित्ये पर्यावरणविज्ञानम् **145**
डा.पवनकुमारपाण्डेय:


हिन्दी – प्राकारः


**15.** आन्वीक्षिकी विद्या का स्वरूप **155**
डॉ. यशवन्त कुमार त्रिवेदी

**16.** पौराणिक दृष्टि में सूर्य विवेचन **163**
डॉ. तेज प्रकाश

**17.** भारतीय ज्ञान प्रणाली में मन्त्रविज्ञान **177**
डॉ. मनोज श्रीमाल

**18.** डॉ. कमला पाण्डेय द्वारा विरचित 'रक्षत गङ्गाम्' महाकाव्य **201**
डॉ. फिरोज

**19.** सतत विकास के परिप्रेक्ष्य में भारतीय
रसायनशास्त्र की सार्थकता **208**
प्रो. लीना सक्करवाल

**20.** भारतीयज्ञान प्रणाली का परिचय और कक्षा में अनुप्रयोग **224**
आचार्य गणेश ति.पण्डित
राधा शर्मा

**21.** वैदिक साहित्य में गणित की अवधारणा **231**
डॉ. अम्बुज त्रिवेदी

**22.** महाभारत में वर्णित राजनीति की आधुनिक युग में प्रासंगिकता **241**
डॉ० राजमंगल यादव

**23.** चीनी एवं तिब्बती साहित्य में प्रतिबिम्बित नालन्दा का स्वरूप **260**
डॉ देवेन्द्र नाथ ओझा

आङ्ग – प्राकारः

**24.** Integration of IKS and ILs in Indian education through NEP 2020 **274**
Prof. Shrinivasa Varakhedi

**25.** Enactment Of Allegorical Plays In Indian Dramaturgy With Special Reference To Amṛtodayam **282**
Dr. Nirupama Tripathi

**26.** From The Womb To The World: Garbha Samvad And Holistic Well-Being In Light Of Bhagavad Gita 2.48 And 4.11 **299**
Dr. Bhairavi m. Dixit

**27.** Indian vivaha samskara: a root to eradicate societal glitches **318**
Dr. Kanta Galani

**28.** Amātya in ancient Indian statecraft **328**
Dr. Renuka Bokare

**29.** Harnessing Indian knowledge systems for sustainable development: pathways to achieving India's SDGs **344**
Dr. Dinesh Chandra Pandey
Bipin Kumar
Vipul Singh
Dr. Neha Tiwari pandey

**30.** An analytical study on pranayama in the light of twenty yogopanishads **360**
Dr. Arpit Kumar Dubey
Prakhar Tyagi

**31.** Utility of *kośa*-s in understanding Sanskrit literature **377**
Dr l. Sampath kumar

**32.** Emotional Intelligence In The Hindu Scripture 'Shrimad Bhagavad Gita' **388**

Dr. Mallika shekhar

Ms. Nisha gurjar

**33.** Development Of An Advanced Sanskrit Research Database: A Robust Tool For Facilitating Literature Review And Scholarly Research **411**

Dr. Subhash Chandra

Divya Prakash Pathak

**34.** Deciphering Ethno-Cultural Consciousness In The Northeast India's Poetry: An Analysis Of Select Poems By Kynpham Singh Nongkynrih And Robin Ngangom **424**

Uttam Kumar Upadhyaya

Shobha Sharma

Champa Chettri

# संस्कृतप्राकारः

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५
ISSN: 0975-1769 UGC CARE ID:101000019

# मीमांसाश्लोकवार्तिकरीत्या ज्ञानानां सालम्बनत्वसाधनम्

एस् वेङ्कटेशताताचार्यः
सहाचार्यः, के.सं.वि., रा.गा.परिसरः
(Sub ID: CSU/SV-054)

**शोधसारः**– *ज्ञानानां विषये दार्शनिकानां मध्ये विमतिः दृश्यते– ज्ञानानि वास्तविक-बाह्यार्थालम्बनानि, तदनालम्बनानि वेति। तत्र वास्तविकबाह्यार्थानालम्बनानि इति मतमास्थिताः बौद्धेषु योगाचाराः, वेदान्तिषु अद्वैतिनश्च। योगाचाराः असत्यपि ज्ञानातिरिक्ते घटपटादिरूपे बाह्येऽर्थे अनादिवासनावशात् ज्ञानमेव घटपटादिरूपेण भासत इति वर्णयन्ति। मीमांसकास्तु सर्वेषां ज्ञानानां वासनावशात् वस्तुतोऽविद्य-मानस्वाकारविषयकत्वे लोके परिदृश्यमानः ज्ञानानां सत्यमिथ्याविभागोऽनुपपन्नः स्यात्, किञ्च असति बाह्यार्थे नानाकाराणां ज्ञानानामुत्पत्तिरेव न संभवति इत्यभि-प्रयन्ति। ज्ञानानां निरालम्बनत्वे (बाह्यविषयशून्यत्वे) बौद्धोक्तं प्रमाणमुपन्यस्य तन्निरासपूर्वकं सालम्बनत्वं साधितं निरालम्बनवादे मीमांसाभाष्ये श्रीशबर-स्वामिभिः, मीमांसाश्लोकवार्तिके श्रीमत्कुमारिलभट्टैश्च। सोऽयं विषयः श्लोकवार्तिकस्य प्राचीनाः तिस्रो व्याख्याः परामृश्य अत्र शोधपत्रे उपस्थाप्यते।*

**कूटशब्दाः**– आलम्बनं = विषयः, प्रतिज्ञार्थैकदेशता (पक्षैकदेशता इति हेतु-दोषः), विरुद्धाव्यभिचारी, सप्रतिसाधनत्वम्।

## निरालम्बनवादपूर्वपक्षः –

"सर्व एव निरालम्बनः स्वप्नवत् प्रत्ययः"[1] इति भाष्येण "जाग्रद्बुद्धिः बाह्यालम्बनरहिता, प्रत्ययत्वात्, स्वप्नवदि"ति निरालम्बनत्वसाधकमनुमानं प्रदर्शितम्। सर्वशब्देन भाष्यस्थेन जाग्रद्बुद्धिमात्रं ग्राह्यं, न तु स्वप्नसाधारण्येन

[1] शाबरभाष्यम् – पृ.सं. ३४

प्रत्ययमात्रं, तथा सति स्वप्नस्यापि पक्षीकृतत्वेन दृष्टान्तो न लभ्येत, स्वप्ने बाह्यालम्बनाभावस्य उभयवादिसिद्धत्वेन तदंशे बाह्यालम्बनाभावसाधने सिद्धसाधनदोषश्च स्यात्। किञ्च सर्वस्यापि प्रत्ययस्य पक्षत्वे एवकारो भाष्यस्थः व्यर्थः स्यात्। एवकारो हि स्वसमभिव्याहृतपदार्थप्रतियोगिनं (विरुद्धं) प्रतिषेधति (व्यवच्छिनत्ति)। प्रकृते साकल्यार्थकसर्वशब्दसमभिव्याहृत एवकारः साकल्यविरुद्धस्य विभागस्य (एकदेशस्य) प्रतिषेधार्थः। प्रतिषेधश्च प्रसक्तस्यैव युज्यते। तथा च "स्वप्नादिप्रत्ययो निरालम्बन" इति प्रत्ययैकदेशस्य निरालम्बनत्वे उक्ते विभागप्रतिषेधार्थं बौद्धस्यैवं कथनं युज्यते – "किं विभज्य स्वप्नादिप्रत्ययस्य निरालम्बनत्वमुच्यते, सर्व एव प्रत्ययो निरालम्बनः" इति। यदि तु स्वप्नस्यापि निरालम्बनत्वं साधनीयं स्यात् तर्हि "सर्वः प्रत्ययो निरालम्बनः" इति एवकाररहितमेव वाक्यं ब्रूयात्। अतश्च अनेन भाष्यवाक्येन जाग्रद्बुद्धिपक्षकमेवानुमानं सूच्यते। तदाह –

**"सर्व एवेति तेनात्र जाग्रद्बुद्धिपरिग्रहः"**[2] इति।

ननु एवं सर्वशब्देन स्वप्नसाधारण्येन प्रत्ययमात्रग्रहणे कथं पक्षत्वेन जाग्रद्बुद्धिमात्रस्य परिग्रहः कथ्यत इति चेदुच्यते – भाष्यवाक्ये सर्वशब्देन सकलप्रत्ययग्रहणेऽपि तत्सूचितेनुमाने तत्रत्येन "सर्व एव प्रत्यय" इति पक्षसूचकदलेन पूर्वोक्तरीत्या एवकारस्वारस्येन जाग्रद्बुद्धेरेव पक्षत्वं बोध्यते इत्याशयः।

अत्रानुमाने बाह्यालम्बनराहित्यमेव साध्यते। सर्वथा निरालम्बनत्वसाधने बौद्धैः ज्ञानानां स्वांशालम्बनत्वस्य अङ्गीकृतत्वेन स्वसिद्धान्तविरोधः स्यात्। ते हि ज्ञानस्य आलम्बनभूतं (विषयभूतं) घटादिकं विज्ञानस्यैव आकारमाहुः। अतः ज्ञानानां स्वाकारालम्बनत्वेन न सर्वथा निरालम्बनत्वं, किन्तु बाह्यालम्बनाभावमात्रं साध्यम्। हेतुश्चात्र प्रत्ययत्वसामान्यम्। प्रत्ययव्यक्तीनां पक्षत्वात् सामान्यस्य च हेतुत्वात् न हेतोः प्रतिज्ञार्थैक-देशत्वदोषप्रसक्तिः। पक्षहेत्वोः परस्परं भिन्नत्वात्। तदाह- "सामान्यस्य च हेतुत्वात् न स्यात् पक्षैकदेशते"[3]ति। पक्षशब्दोऽत्र प्रतिज्ञार्थपरः। सा च प्रतिज्ञा पक्षः साध्यवा-

---

[2] श्लोकवार्तिकम् निरा – २५

[3] श्लोकवार्तिकम् निरा – २७

नित्याकारा। तदर्थैकदेशत्वं पक्षस्य साध्यस्य च। एवं च हेतुत्वेन कथ्यमानस्य पक्षरूपत्वे साध्यरूपत्वे वा प्रतिज्ञार्थैकदेशत्वं स्यात्। तथा सति प्रतिज्ञातिरिक्तार्थस्य प्रतिज्ञार्थसाधकस्याभावेन प्रतिज्ञातार्थ-सिद्धिर्न स्यात्। तथा प्रकृते नास्तीति भावः। एवं निर्दोषादस्मादनुमानात् ज्ञानानां बाह्यालम्बनाभावः सिद्ध्यतीति।

**अथ सिद्धान्तः (निरालम्बनत्वनिराकृतिः) –**

एवं पूर्वपक्षे प्राप्ते पूर्वोक्तानुमानखण्डनार्थं भाष्यकार आह- "स्तम्भ इति जाग्रतो बुद्धिः सुपरिनिश्चिता कथं विपर्यसिष्यती"[4]ति। सुपरिनिश्चिता नाम अबाधिता। विपर्यासः बाह्यार्थराहित्यम्। नन्वनेन वाक्येन "स्तम्भ इति जाग्रतो बुद्धिः न विपर्यसिष्यति, सुपरिनिश्चितत्वात्" इति सुपरिनिश्चिततत्व-हेतुकं विपर्यासाभाव (बाह्यालम्बनत्व) साध्यकमनुमानं खलु भाष्यकारस्य विवक्षितम्। तत्तु न निरालम्बनवादिनः उत्तरं भवितुं क्षमम्। तन्मते कस्यापि ज्ञानस्य बाह्यालम्बनत्वाभावात् "यत्र यत्र सुपरिनिश्चिततत्वं तत्र तत्र बाह्यालम्बनत्वमि"'ति अन्वयसहचारग्रहो न संभवति। "यत्र बाह्यालम्बनत्वाभावः तत्र सुपरिनिश्चिततत्वाभाव" इति व्यतिरेकसहचारोऽपि न लभ्यते। स्तम्भ इत्यादि-जाग्रद्बुद्धेरपि बाह्यालम्बनत्वाभावेन तत्र सुपरिनिश्चिततत्वस्यैव सत्त्वेन व्यभिचारात्। अतः स्वप्नापेक्षया जाग्रज्ज्ञाने यः सुपरिनिश्चयाख्यो विशेषः तस्य बाह्यालम्बनव्याप्ततया परं प्रति सिद्धत्वाभावात् नेदमनुमानं तं प्रत्युत्तरत्वेन भाष्यकारेण प्रयोक्तुं युज्यते। अत इदं विकल्पसमारूपं वैधर्म्यसमारूपं वा असदुत्तरमेव। यथा प्रत्ययत्वे तुल्येऽपि किञ्चित् सुपरिनिश्चितं किञ्चिन्न, तथा किञ्चित् सालम्बनं किञ्चिन्नेति विकल्पसमा। यदि प्रत्ययत्वेन साधर्म्यात् निरालम्बनत्वं स्यात्तर्हि सुपरिनिश्चिततत्वेन वैधर्म्यात् निरालम्बनत्वं न स्यादिति वैधर्म्यसमा। तदिदमाह-

**जाग्रज्ज्ञाने विशेषोऽयं यतः सुपरिनिश्चयः।**
**बाह्यालम्बनसंबन्धो न प्रसिद्धः परं प्रति॥**
**तस्माद्यद् भाष्यकारेण दत्तमुत्तरमत्र तु।**

---

[4] शाबरभाष्यम् – पृ.सं. ३५

**विकल्पसमता वा स्याद् वैधर्म्यसमताऽपि वा॥[5] इति।**

अत्र बाह्यालम्बनसंबन्धो नाम बाह्यालम्बनेन संबन्धो यस्य सः। संबन्धश्च व्याप्तिरूपः। तथाच बाह्यालम्बनव्याप्त इति फलति। एवमाक्षिप्ते भाष्ये केचन "भाष्यस्य जात्युत्तरपरत्वेऽपि न दोषः। पूर्वपक्षस्य दुष्टत्वात्। दुष्टस्य हि पक्षस्य दुष्टमुत्तरं न दुष्यति" इत्येवं परिहारमाहुः। परन्त्वत्रापरितोषादन्ये एवं समादधुः- भाष्यकारेण न सालम्बनत्वसाधनाय अनुमानं प्रयुक्तं, येन परं प्रति व्याप्तेरसिद्धत्वादसदुत्तरत्वं शङ्क्येत। किन्तु, तत्प्रयुक्ते निरालम्बनत्वानुमाने प्रत्यक्षबाधरूपः प्रतिज्ञादोष उद्भाव्यते।

ननु अनुमानेन बाह्यालम्बनमेव निषिद्ध्यते, न त्वालम्बनमात्रमित्युक्तम्। प्रत्यक्षादिप्रमाणेन नीलाद्याकारमात्रं गृह्यते। तस्य च विज्ञानांशत्वेनोपपत्तौ न प्रत्यक्षादिभिः बाह्यस्य वस्तुनः सिद्धिः संभवति। तथा च कथं बाह्यार्थग्राहिभिः प्रत्यक्षादिभिः बाह्यार्थनिषेधकृतोऽनुमानस्य बाध इति चेदुच्यते- शून्यवादे प्रत्यक्षादीनां स्वांशरूपो ग्राह्यो विषयो निराकरिष्यते। यदि भवताऽनुमानेन बाह्योऽपि विषयो निराक्रियते, तर्हि विषयमात्रं निराकृतमित्येव फलति। तथा च विषयनिराकर्तुरनुमानस्य तदुपस्थापकप्रत्यक्षादिभिः पक्षबाधः (प्रतिज्ञाबाध) भवेदेव। एवं स्वांशालम्बनस्य निराकरिष्यमाणत्वात् बाह्यालम्बननिराकरणपरस्याप्यनुमानस्य फलतः आलम्बनमात्रनिराकर्तृत्वात् तस्य आलम्बनोपस्थापकप्रत्यक्षादिविरोधः उपपादितः। स्वांशालम्बनस्य निराकरणात् आलम्बनविषयकस्य प्रत्यक्षस्य परिशेषाद् बाह्यालम्बनविषयकत्वात् तन्निषेधकृतः तस्यानुमानस्य प्रत्यक्षादिभिः पक्षबाधो भवेदित्यपि बाधप्रकार उपपादयितुं शक्यः।

भाष्ये बुद्धिविशेषणेन सुपरिनिश्चितत्वेन निरालम्बनत्वानुमानापेक्षया प्रत्यक्षस्य बलं कथ्यते। जाग्रतः प्रत्यक्षस्य अबाधितत्वेन तद्गृहीतार्थस्य अनुमानेन निषेधो न युज्यत इति भावः। यदि तु बाधाभावेऽपि गृहीतस्यार्थस्याभाव उच्येत तर्हि अनुमानमपि न सिद्ध्येत्।

तथा हि- अनुमाने पक्षः साध्यविशिष्ट इति साध्यते। परन्तु तत्र विशेष्य-भूतपक्षविषयकस्य विशेषणभूतसाध्यविषयकस्य च ज्ञानस्य निराल-

---

[5] श्लोकवार्तिकम् निरा – २८-२९

म्बनत्वेन वस्तुतः पक्षसाध्ययोरप्रसिद्धत्वात् अनुमाने विशेषणविशेष्योभया-प्रसिद्धिरिति तदन्यतराप्रसिद्धिरिति च प्रतिज्ञादोषः स्यात्। वदतो व्याघातो-ऽपीत्याह -

**वक्तृश्रोत्रोश्च यज्ज्ञानं विशेषणविशेष्ययोः।**
**तन्निरालम्बनत्वेन स्ववाग्बाधा द्वयोरपि॥**[6] **इति।**

सर्वेषां ज्ञानानां निरालम्बनत्वेन वक्तृश्रोत्रोर्जातं विशेषणविशेष्य-विषयकं ज्ञानमपि निरालम्बनमेव। तथाच विशेषणविशेष्यरूपयोरर्थयोरभाव एव सिद्ध्यति। एवमुक्त्वा तयोः अनुमानावयवेन प्रतिज्ञया उपादाने विशेषण-विशेष्ययोर्द्वयोरपि स्ववाचैव (अनुमानप्रयोगेणैव) विरोध इति भावः। विशे-षणविशेष्ययोर्भेदासंभवेनापि प्रतिज्ञार्थनिरूपणमसंभवि इत्याह -

**संभवो न च भेदस्य विशेषणविशेष्ययोः।**
**तस्मान्निरूपणं नास्ति प्रतिज्ञार्थस्य शोभनम्॥**[7] **इति।**

ज्ञानभिन्नपदार्थाभाववादिनो मते प्रत्ययविशेषणस्य निरालम्बनत्वस्य प्रत्ययाद्व्यतिरेकेण सत्ता नैव संभवति। अभिन्नयोश्च विशेष्यविशेषणभावो न घटते। तदभावे प्रतिज्ञार्थनिरूपणमपि न संभवति। साध्यविशिष्टधर्मी हि प्रतिज्ञार्थः। साध्यधर्मिणोरभेदे कथं प्रतिज्ञा संघटेत इति तात्पर्यटीकानुसारे-णास्य श्लोकस्य भावः। न्यायरत्नाकरकाशिकयोस्तु भेदग्राहिणः प्रत्ययस्य निरालम्बनत्वात् भेदो न संभवतीति परिशेषादभेदो वाच्यः, तथाच प्रतिज्ञार्थो न संगच्छत इति भावः प्रकटितः। परन्तु अत्र पारिशेषिकाभेदग्राहिणः प्रत्य-यस्यापि निरालम्बनत्वेन अभेदस्यापि वक्तुमशक्यत्वात्, भेदग्राहिणः प्रत्ययस्य निरालम्बनत्वमिति भेदासम्भवे उक्तस्य हेतोः वार्तिकानुक्तत्वाच्च, एतदपेक्षया तात्पर्यटीकोक्त एवाशयो युक्ततरः। तत्र भेदाभावे उक्तस्य हेतोः ज्ञानातिरिक्त-वस्त्वभावस्य “तत्रार्थशून्यं विज्ञानं योगाचाराः समाश्रिताः”[8] इति वार्तिके एव प्रदर्शितत्वात्।

---

[6] श्लोकवार्तिकम् निरा – ३६

[7] श्लोकवार्तिकम् निरा – ३७

[8] शाबरभाष्यम् – पृ.सं. १४

ननु निरालम्बनत्वमिति न किञ्चिद्वस्तु, किन्तु तुच्छमेव, शशशृङ्गवत्। अतः तस्य धर्मिभेदादिप्रश्नो नैव कार्य इति चेन्न। अवस्तुत्वे स्वयं बोद्धुं परस्मै बोधयितुं चाशक्यत्वात् तत्साधनायानुमानप्रयोगस्य अनुपपत्तेः। न च अवस्तुत्वेऽपि काल्पनिकस्य अभावस्य यथा बुद्धिविषयत्वं तथाऽत्रापि संभवतीति वाच्यम्। अवस्तुत्वे कल्पनाया असंभवात्। कल्पितस्य च वस्तुत्वावश्यंभावात्। अभावोऽपि वस्त्विति अभावपरिच्छेदे साधयिष्यते हि। तस्मान्निरालम्बनत्वस्यापि वस्तुत्वात् तस्य धर्मिव्यतिरेकादिप्रश्नो युज्यत एव।

**प्रत्ययशब्दनिर्दिष्टस्य पक्षस्य अनुपपत्तिः –**

यदि अनुमानप्रयोगे पक्षनिर्देशकस्य प्रत्ययशब्दस्य प्रतीयत इति प्रत्यय इति कर्मव्युत्पत्त्या ज्ञानविषयपरत्वं, तर्हि निरालम्बनत्वानुमाने सिद्धसाधनं दोषः। ज्ञानविषयस्य रूपादेः अविज्ञानात्मकत्वेन निरालम्बनत्वस्य मीमांसकैरपि इष्यमाणत्वात्। ज्ञानमेव हि सविषयकत्वेन सालम्बनं भवति, न तु तद्विषयः। यदि तु प्रतीयते अनेन इति करणव्युत्पत्तिः, प्रत्याययति इति कर्तृव्युत्पत्तिः, प्रतीतिरिति भावव्युत्पत्तर्वा आश्रीयेत तर्हि स्ववचनेनैव विरोधः। ज्ञानातिरिक्तस्य अर्थस्य अनुमानेन निराकरणे तद्विषयकप्रतीतिरूपस्य भावस्य, तत्करणस्य, प्रतीतिजनकस्य कर्तुश्च अभावप्रसङ्गात्। न ह्यतिरिक्तं प्रत्याय्यमन्तरा प्रत्यायनकर्ता, प्रतीतिः, प्रतीतिकरणं वा संभवति। अतः प्रत्ययशब्दस्य कर्त्रादिनिमित्तत्वे स्ववचनेनैव बाधः। किञ्च प्रत्यायनकर्तृत्वं प्रतीतिकरणत्वं च शब्दस्यापि संभवतीति कर्तृव्युत्पत्तिपक्षे करणव्युत्पत्तिपक्षे च धर्मधर्मिप्रतिपादकयोः शब्दयोरपि निरालम्बनत्वं स्यात्। शब्दस्य निरालम्बनत्वं नाम अर्थाप्रतिपादकत्वम् , अर्थरहितत्वं वा। तथा च "प्रत्ययः, निरालम्बनः" इति शब्दयोर्निरर्थकत्वेन अनुमानप्रयोगे पक्षाभाव (प्रतिज्ञाभाव)दोषः स्यात्। यदि तु अवयवशक्तिमनपेक्ष्य रूढिरूपेण (समुदायशक्त्या) प्रत्ययशब्दार्थः स्वीक्रियेत, तदापि अन्यार्थप्रकाशकस्य मीमांसकादिसम्मतप्रत्ययस्य पक्षत्वे स्वाभ्युपगतसिद्धान्तविरोधः। तादृशस्य प्रत्ययस्य योगाचारमते अप्रसिद्धिश्च। विषयरहितज्ञानस्य पक्षत्वे तस्य मीमांसकाद्यप्रसिद्धत्वेन पक्षाप्रसिदिर्दोषः। अनुमानावयवानामुभयवादिप्रसिद्धेरावश्यकत्वात्।

मीमांसकादिभिः प्रत्ययस्य आत्मधर्मत्वं स्वीक्रियते। बौद्धैः स्वतन्त्र-त्वम्। पक्षभूतस्य प्रत्ययस्य आत्मधर्मत्वकल्पने तादृशस्य प्रत्ययस्य वाद्यप्रसिद्धत्वात्, स्वतन्त्रत्वकल्पने प्रतिवाद्यप्रसिद्धत्वाच्च पक्षासिद्धिदोषः प्रसज्यते। तत्तन्मतसिद्धधर्मं विहाय प्रत्ययमात्रस्य पक्षत्वमित्यपि वक्तुं न शक्यम्। तस्य निरूपयितुम् (ज्ञापयितुम्) अशक्यत्वात्। न च, शब्दः नैयायिकैः गुणत्वेन स्वीकृतः, मीमांसकैश्च द्रव्यत्वेन। तथापि द्रव्यत्वगुणत्व-भेदमनादृत्य शब्दशब्दवाच्यस्य उभयवादिसिद्धस्य पक्षत्वेन मीमांसकस्य "शब्दो नित्यः श्रावणत्वात्, शब्दत्ववत्" इति अनुमानं प्रवर्तते। तद्वदत्रापि प्रत्ययशब्दवाच्यस्य पक्षत्वं स्वीकृत्यानुमानं संभवतीति वाच्यम्, अन्येषां दार्शनिकानां तत्तन्मतसिद्धव्यक्तिविशेषातिरिक्तं सामान्यरूपं वाच्यमभ्युप-गच्छतां तथा पक्षनिरूपणस्य संभवेऽपि वाच्यस्य सामान्यस्य स्वलक्षणात् (व्यक्तिविशेषाद्) भिन्नस्य अनङ्गीकर्तुर्भवतो मते उभयसिद्धसामान्यात्मक-पक्षस्य निरूपयितुमशक्यत्वात्।

**साध्यांशदूषणम् –**

अथ साध्यभूतं निरालम्बनत्वं किंरूपमिति विचार्यते। यदि यदाकारं विज्ञानं तदाकाररूपालम्बनाभाव एव निरालम्बनत्वमित्युच्येत, तर्हि स्वाभ्यु-पगतसिद्धान्तविरोधः। सौगता हि विज्ञानमेव घटाद्याकारेण भासते, न तु घटाद्याकारकः बाह्यः कश्चित् पदार्थोऽस्ति, अतः विज्ञानं स्वीयघटाद्याकारा-लम्बनमिति मन्यन्ते। इदानीं भासमानस्य विज्ञानाकाररूपस्य आलम्बनस्य अभावे उच्यमाने अभ्युपगतविरोधः स्पष्ट एव।

अथ निरालम्बनत्वं बाह्यालम्बनराहित्यम्। तथा च स्वाकाररूपा-लम्बनाभ्युपगमस्य न विरोध इति चेत् - किं बाह्यार्थस्य स्तम्भादेः "बाह्य" इत्येवंरूपेण अग्रहणात् ज्ञानस्य बाह्यालम्बनराहित्यमुच्यते उत स्तम्भादिरू-पेणैव स्तम्भादेरग्रहणात् तदुच्यते? आद्येमीमांसकादिभिरपि स्तम्भादौ "बाह्य" इत्याकारकग्रहणाभावस्य स्वीकारात् सिद्धसाधनम्।

द्वितीये स्तम्भ इति प्रतयक्षज्ञानस्य [9]दृष्टत्वात् तत्र भासमानस्य स्तम्भालम्बनस्य अनुमानेन वारणे अनुमानस्य प्रत्यक्षबाधो दोषः। न च अङ्गल्यवष्टब्धनेत्रस्य द्विचन्द्रबुद्ध्युत्पत्तावपि यथा तस्या बुद्धेर्निरालम्बनत्वमिष्यते, तद्वत् स्तम्भादिप्रत्यस्यापि निरालम्बनत्वमिष्यताम्, सत्यपि द्विचन्द्रसंविद्विरोधे द्विचन्द्रसंविदो निरालम्बनत्वकल्पना कृता हि इति वाच्यम्। यतः अङ्गल्यवष्टम्भादिनेत्रदोषाच्चन्द्रस्य द्वित्वेन भानेऽपि सामान्यत एकस्यैव भानाद्वित्वस्य च अभानात् चन्द्रे अनुपलब्ध्या द्वित्वाभावो निर्णीयते। द्वित्वस्याभावे तेन इन्द्रियसंबन्धोऽपि न संभवति। अत इन्द्रियासंबद्धार्थग्राहित्वात् द्विचन्द्रसंविदो निरालम्बनत्वम्। यद्यप्यत्र अर्थाभावमात्रेण निरालम्बनत्वं शक्यं वक्तुं, तथापि यदृच्छया उत्पन्नस्य स्वप्नस्य प्रतिभाया वा "श्वोऽहं राजा भविष्यामि, अस्ति मम गृहे वायव्ये कोणे भूगतो निधिरि"त्यादिरूपस्य कदाचित् सत्यार्थकत्वदर्शनात् तत्र अर्थस्य सत्त्वेन तदभावप्रयुक्तनिरालम्बनत्वस्य वक्तुमशक्यत्वात्, तत्साधारण्येन ज्ञानकालिक इन्द्रियार्थसंबन्धाभाव एव निरालम्बनत्वप्रयोजकः स्वीक्रियते। तत्र सत्यप्यर्थे ज्ञानस्य तमालम्ब्य जायमानत्वाभावेन युज्यते अर्थानालम्बनत्वम्। एवमिन्द्रियार्थसंबन्धाभावस्य द्विचन्द्रादिज्ञानेषु निरालम्बनत्वप्रयोजकत्वेन न संविद्विरोधः। यदि हि अर्थप्रतीत्यभावात् निरालम्बनत्वमुच्येत, तर्हि अर्थस्य प्रतीयमानत्वात् प्रतीतिविरोधः स्यात्। न चैवमुच्यतेऽस्माभिः। तदाह "सर्वत्रार्थेन्द्रियाणां नः संयोगसदसत्तया। संवित्तौ विद्यमानायां सदसद्ग्राह्यतास्थितिः॥"[10] इति। अयम्भावः- ज्ञानस्य सद्ग्राह्यता (सन् ग्राह्यः यस्य, तस्य भावः) संवेदन (अर्थप्रकाशन) प्रयुक्ता, असद्ग्राह्यता च संवेदनाभावप्रयुक्तेतीदं न युक्तम्। किन्तु सर्वैरपि ज्ञानैरर्थस्य संवेदने (प्रकाशने) क्रियमाणेऽपि इन्द्रियार्थसंयोगसत्त्वे एव ज्ञानस्य सद्ग्राह्यता, तदभावे च असद्ग्राह्यतैवेति। असद्ग्राह्यमेव निरालम्बनमित्युच्यते। भवन्मते तु ज्ञानातिरिक्तार्थाभावात् इन्द्रियं, तत्संबन्धश्च न स्तः। अतः ज्ञानजनकेन्द्रियसंबन्धवानर्थः ज्ञानस्याल-म्बनमिति वक्तुं न शक्यते। किन्तु यद्रूपग्रहणं ज्ञानं, तदेव तस्यालम्बनमिति ग्रहणस्यैव

---

[9] इदं "संवेदनस्य दृष्टत्वादि"ति (श्लो.वा.निरा. ५३) वार्तिकानुसारेणोक्तम्। अत्र दृष्टत्वं स्फुटं भासमानत्वं, न तु प्रत्यक्षत्वम्। अतो न "ज्ञानस्य अप्रत्यक्षत्वमि"ति भाट्टसिद्धान्तविरोधः

[10] श्लोकवार्तिकम् निरा – ५५ (काशिकानुसारी पाठः)

आलम्बनत्वहेतुत्वं वाच्यम्। तथा स्वीकृत्य गृह्यमाणस्य स्तम्भादि-रूपस्य आलम्बनत्वनिराकरणे अर्थादालम्बनत्वहेतुभूतं ग्रहणमेव निराकृतं भवति, तथा च स्पष्टः संविद्विरोधः। तदाह -

**भवतस्त्विन्द्रियादीनामभावाद्ग्रहणादृते।**
**नालम्बनत्वहेतुः स्यान्निषेधोऽतो न युज्यते॥**[11] **इति।**

अपि च "प्रत्ययः बाह्यालम्बनरहित" इति प्रतिज्ञायां प्रत्ययो विशेष्यः, आलम्बनराहित्यं विशेषणं, तत्रापि आलम्बनांशे बहिर्भावः (बाह्यं वस्तु) अभेदेन विशेषणम्। बहिर्भावश्च भवन्मते अप्रसिद्धः। विशेषणविशेषणस्य बहिर्वस्तुनः अप्रसिद्धेः विशिष्टस्य पक्षस्य (प्रतिज्ञायाः) ज्ञातुमशक्यत्वात् स साधयितुं न शक्यते। यथाह-

**"बहिर्भावाप्रसिद्धत्वात् तेनानालम्बना मतिः।**
**कथञ्च साध्यते नैव पक्षो हि ज्ञायते तदा॥**[12] **इति।**

अयमर्थः- बरहिर्भावस्य = बाह्यस्य अर्थस्य अप्रसिद्धत्वात् तेन = बाह्यार्थेन अनालम्बना मतिः कथं साध्यते। हि = यतः एषः = बाह्यालम्बन-रहिता मतिरिति पक्षः तदा = बाह्यार्थस्य अप्रसिद्धत्वे न ज्ञायते। पदार्थज्ञानं विना वाक्यार्थो न ज्ञायते। पक्षो (प्रतिज्ञा) हि (बहिर्वस्त्वादि-) अनेकपदार्थ-घटितत्वाद्वाक्यार्थः। तस्मात् घटकीभूतं बहिर्वस्तु अज्ञात्वा स न ज्ञातुं शक्य इति। श्लोके तेनानालम्बनेत्यत्र तेनेति पदं धान्येन धनीत्यादाविव अभेदार्थक-तृतीयान्तम्। अतः तच्छब्दार्थस्य बाह्यस्य अनालम्बनेतिपदघटकालम्बनपदार्थे अभेदो भासते। अविद्यमानम् आलम्बनं यस्याः सा अनालम्बना। तथा च बाह्यवस्तुरूपालम्बनरहितेत्यर्थो लभ्यते। [13]भाट्टरहस्योक्तरीत्या तृतीयाया अभेदार्थकत्वाभावे, तथात्वेऽपि बहुब्रीहिघटकालम्बनपदार्थे तृतीयार्थाभेद-स्यान्वयासंभवे वा, अनालम्बनेति पदं लक्षणया "सालम्बना न" इत्यर्थे व्याख्याय करणतृतीयान्तत्वं चाङ्गीकृत्य "मतिः बाह्यार्थेन सालम्बना न" इति प्रतिज्ञास्वरूपपरतया "तेनानालम्बना मति"रिति श्लोकपादो निर्वाह्यः।

---

[11] श्लोकवार्तिकम् निरा – ५६ (काशिकानुसारी पाठः)
[12] श्लोकवार्तिकम् निरा – ५७ (तात्पर्यटीकापुस्तकानुसारी पाठः)
[13] भाट्टरहस्यम् – पृ.सं -११२

यदि "प्रत्ययः स्वव्यतिरिक्तं नालम्बत" इति, "स्वाव्यतिरिक्तमालम्बत" इति वा प्रतिज्ञायते, तदापि दोष इत्याह –

**पर्युदासे निषेधे वा व्यतिरिक्तस्य वस्तुनः।**
**प्रमेयत्वाद्यभेदेन जगतः सिद्धसाधनम् ॥**
**यदि चात्यन्तभिन्नेन[14] निरालम्बनतोच्यते।**
**कथञ्चिचेद्विरुध्येत प्राक्पक्षः कल्पितेन ते॥[15] इति।**

व्यतिरिक्तशब्देन किं सर्वथाव्यतिरक्तं गृह्यते उत कथञ्चिद्व्यतिरिक्तम्। आद्ये, जगति सर्वस्यापि पदार्थस्य प्रमेयत्वादिना अभिन्नत्वात् न कश्चित् सर्वथा व्यतिरिक्तोऽस्ति। अतो भासमानस्य स्तम्भादेरव्यतिरिक्तत्वात् अव्यतिरिक्तमालम्बत इति व्यतिरिक्तं नालम्बत इति वा प्रतिज्ञायां सिद्धसाधनम्। श्लोके "अत्यन्तभिन्नेन निरालम्बनते"त्यत्र पूर्ववदेव तृतीयोपपादनीया। अन्त्ये, परमार्थतो भवन्मते स्तम्भादेर्विज्ञानरूपत्वेऽपि विज्ञानभिन्नस्य स्तम्भादेः काल्पनिकं (सांवृतं) तु सत्यत्वं स्वीक्रियते। अतः प्राक् कल्पितेन प्रत्ययव्यतिरिक्तस्तम्भादिरूपालम्बनेन निरालम्बनप्रतिज्ञा विरुद्ध्यते। कथञ्चिद्व्यतिरिक्तमिति सांवृतभेदवदपि ग्रहीतुं शक्यं हि। श्लोके कथञ्चिदित्युत्तरं पूर्वार्द्धात् "भिन्नेन निरालम्बनतोच्यत" इति संबद्ध्यते।

यदि ग्राह्यं पक्षीकृत्य ग्राहकादभिन्नत्वं साध्यते, यथोक्तं बौद्धैः –

**"सहोपलम्भनियमादभेदो नीलतद्धियो"**[16]रिति

तदापि दोष उच्यते– "ग्राहकाचेदभिन्नत्वं शक्तिभेदो विरुध्यते"[17] इति। अभिन्नत्वमित्यस्याग्रे "यदि चात्यन्तभेदेन निरालम्बनतोच्यते"[18] इत्यतः अनुवृत्य उच्यते इति संबद्ध्यते। ग्राह्ये ग्राहकाभेदसाधने एकस्यैव ग्राह्यत्वं, ग्राहकत्वमिति शक्तिभेदो विरुद्ध्यत इत्यर्थः। स्थितस्य ग्राह्यस्य पश्चादुत्पन्नं ज्ञानं ग्राहकम्। एवं ग्राह्यं ग्राहकं च कल्पयित्वा अनुमानेन तयोरभेदसाधने

---

[14] श्लोकवार्तिकम् निरा – ६२

[15] तात्पर्यटीकापुस्तकानुसारी पाठः

[16] तात्पर्यटीकायां २०९ पृष्ठे श्लोकवार्तिकम् निरा ६२ श्लोकव्याख्यानावसरे उद्धृतं बौद्धवचनम्

[17] श्लोकवार्तिकम् निरा – ६२

[18] श्लोकवार्तिकम् निरा – ६१

एकस्यैव ज्ञानस्य युगपत् स्थित्युत्पत्त्योरसंभावात् ग्राह्यग्राहकत्वशक्तिभेदोऽपि न संभवतीति भावः। अनुमानेन ज्ञानानां निरालम्बनत्वसाधनेऽपि "चैत्रोऽयमि"त्यादिप्रत्ययानां न बाह्यार्थराहित्यं वक्तुं शक्यमित्याह-

**चैत्रादिप्रत्ययानां च निरालम्बनता यदि।**
**धर्मभूता न गृह्येत साधनोत्थितया धिया ॥**
**ततो विषयनानात्वात् प्रतियोग्यनिराकृता।**
**रूपात् सालम्बनप्राप्तिः सती केन निवार्यते॥[19] इति।**

अयम्भावः– यद्यनुमानेन ज्ञानानां बाह्यार्थालम्बनत्वाभाव उच्येत, तर्हि साधनेन= अनुमानप्रयोगेण उत्थिता या अनुमित्यात्मिका धीः, साऽपि निरालम्बनैव स्यात्। तथा च तया चैत्रादिज्ञानगतं निरालम्बनत्वं न विषयीक्रियते, किन्तु स्वांश एव। अत इयं धीः चैत्रादिज्ञानस्य सालम्बनत्वं न निराकरोतीति चैत्रादिज्ञानस्य स्वरूपतः प्राप्तं वास्तविकं सालम्बनत्वमनिराकृतं तिष्ठति। विषयैक्ये हि प्रतियोगिना (विरोधिना) प्रतियोग्यन्तरं निराक्रियते। यथा-

"इदं रजतं, नेदं रजतमि"ति ज्ञानयोः इदमर्थपुरोवर्तिरूपविषयैक्यात् तद्विशेषणत्वेन गृहीतस्य रजतभेदस्य रजतत्वविरोधित्वात् रजतत्वनिराकर्तृत्वम्। प्रकृते तु साधनोत्थिताया धियः "चैत्रादिज्ञानं बाह्यार्थरहितमि"-त्यस्याः यदि चैत्रादिज्ञानगतबाह्यार्थराहित्यविषयकत्वं स्यात्, तर्हि प्रत्यक्षतो लब्धचैत्रादिज्ञानसालम्बनत्वनिराकर्तृत्वं स्यात् विशेष्यभूतविषयैक्ये सति विरुद्धधर्मग्राहकत्वात्। न त्वेवमस्ति, अनुमितेरपि निरालम्बनत्वेन चैत्रादिज्ञानगतनिरालम्बनत्वालम्बनत्वाभावादिति। यद्यपि "चैत्रोऽयमि"त्यादिप्रत्यक्षं पुरोवर्तिचैत्रादिविषयकमेव भवति, न तु चैत्रादिविषयकज्ञानविषयकमिति तस्य निरालम्बनत्वानुमितेः बाह्यार्थविषयकत्वेऽपि (बाह्यार्थराहित्यविशिष्ट-चैत्रादिप्रत्यक्षविषयकत्वेऽपि) तया सह समानविषयकत्वं न संभवति, तथापि प्रत्यक्षोत्तरं ज्ञाततालिङ्गकानुमानेन चैत्रादिबाह्यार्थविषयकत्वविशिष्टज्ञानस्य ग्रहणात् तस्यानुमानस्य निरालम्बनत्वानुमानसमानविषय(विशेष्य)कत्वात् संभाव्यते बाह्यार्थविषयकत्वबाध इति बोध्यम्।

---

[19] श्लोकवार्तिकम् निरा – ६५-६६

किञ्च अनुमानेन ज्ञानानां निरालम्बनत्वसाधने प्रतिज्ञायाः पूर्वाभ्युपगमविरोधः स्यात्। यथाह –

**न चाभिधार्थसंबन्धादृते भेदाच्च नास्त्यसौ।**
**न चासौ तद्गतं भेदं बोधयन्त्या धिया विना॥**
**प्राश्निकैरगृहीते च वाक्यस्यावयवे पृथक्।**
**पक्षे हेतौ च दृष्टान्ते वादिनि प्रतिवादिनि॥**
**साधनस्याप्रयोगः स्यादभ्युपेत्योच्यते यदि।**
**पूर्वाभ्युपगमेनैव प्रतिज्ञा बाध्यते ततः॥**[20]

अयमर्थः– शब्दस्याभिधा = अर्थाभिधानव्यापारः तस्यार्थेन प्रत्याय्यप्रत्यायक-भावसंबन्धं विना न संभवति, असौ च संबन्धः संबन्धिनोः शब्दार्थयोः भेदादृते नास्ति। मध्यस्थमृते इत्यव्ययं मध्यमणिन्यायेनोभयत्र संबध्यते। शब्दार्थयोः परस्परं भेदश्च भेदग्राहिकया धिया विना न सिद्ध्यति। अतश्च अनुमानप्रयोगार्थं तदवयवानामर्थबोधकत्वमपेक्षितं, तच्च यथार्थशब्दार्थभेद-ज्ञानाधीनमिति भेदज्ञानस्य सालम्बनत्वमेष्टव्यम्। एवं प्राश्निकाः = मध्यस्थाः पृथक् पृथग्वादिनं, प्रतिवादिनं, वाक्यावयवं पक्ष(प्रतिज्ञा)प्रभृतिकं तदर्थं च यावन्नावगच्छेयुः तावदनुमानप्रयोगोऽपि न संभवति। अतोऽवयवादीनां ज्ञानं सालम्बनं (यथार्थं) स्वीकर्तव्यम्। तथाभ्युपेत्य ज्ञानानां निरालम्बनत्वे साध्य-माने पूर्वाभ्युपगमविरुद्धा प्रतिज्ञा स्यादिति।

किञ्च बुद्धैर्धर्माधर्मोपदेशकरणाद् बाह्यार्थो बुद्धानामिष्ट इति ज्ञायते। न हि धर्माधर्मयोः भेदाज्ञाने शिष्यात्मनोः (उपदेश्योपदेष्ट्रोः) च भेदाज्ञाने उपदेशः संभवति। अतः बुद्धैरुपदेशानुष्ठानात्, स्वयम् साक्षादेव धर्मोपदेश-सूत्रातिरिक्तसूत्रे क्वचित् बाह्यार्थास्तित्वकथनाच्च बुद्धाभिप्रायविरुद्धो बाह्या-पह्नव इत्याह –

**तदनुष्ठानतो बुद्धैरिष्टो भेदः स्फुटं च तैः।**[21]

---

[20] श्लोकवार्तिकम् निरा – ६९-७१। अत्र श्लोके काशिकापुस्तकस्थः पाठो निवेशितः। न्याय-रत्नाकरपुस्तके तु न चाभिधास्त्यसंबाधादिति पाठोऽस्ति। तदपेक्षया काशिकास्थः समीचीनतरः। ७० श्लोके न्यायरत्नाकरस्थः पाठ एव युक्तत्वात् निवेशितः। काशिकातात्पर्य-टीकापुस्तकयोस्तु प्राश्निकैर्नागृहीत इति पाठः।

[21] श्लोकवार्तिकम् निरा – ७२। अयं तात्पर्यटीकापुस्तकपाठः युक्तश्च। काशिकान्यायरत्नाकर-पुस्तकयोस्तु तदनुष्ठानतो बुद्धेरिति पाठः।

सूत्रान्तरेऽभ्युपेतत्वात् भवेदागमबाधनम्॥[22] इति।

किञ्च सर्वज्ञाननिरालम्बनत्वे निरालम्बनत्वानुमानप्रयोगज्ञानमपि तथैव स्यात्। तथा च साधनस्यैव अभावः प्रसज्यत इति कथं निरालम्बनता सिद्ध्येत्। यदि तु साधनज्ञानं न निरालम्बनं (मिथ्या), तर्हि तत्रैव हेतोर्व्यभिचरितत्वापत्तिः। साध्यस्य निरालम्बनत्वस्याभावेऽपि हेतोः प्रत्ययत्वस्य तत्र सत्त्वात्।

ननु साधनविषयकबुद्ध्यतिरिक्तप्रत्ययस्यैव निरालम्बनत्वं प्रतिज्ञायत इति न साधनबुद्धिनिरालम्बनत्वप्रयुक्तसाधनाभावापत्तिः। यद्यप्येवं साधनाभावे समाहितेऽपि सालम्बनायां साधनबुद्धौ निरालम्बनत्वस्य साध्यस्याभावेऽपि हेतोः प्रत्ययत्वस्य सत्त्वात् व्यभिचारः स्यादेव, तथापि [23]तात्पर्यटीकोक्तरीत्या "निरालम्बनत्वसाधनविषयकप्रत्ययातिरिक्तत्वे सति प्रत्ययत्वादि"ति हेतोः परिष्कारेण न व्यभिचारोऽपीति चेन्न।

एवमपि स्तम्भादिप्रत्यये साधनप्रत्ययान्यत्वग्राहिणः "स्तम्भादिप्रत्ययः साधनप्रत्ययभिन्नः" इति प्रत्ययस्य साधनप्रत्ययातिरिक्तत्वे निरालम्बनत्वात् हेतोः साधनप्रत्ययातिरिक्तत्वविशिष्टप्रत्ययत्वस्यासिद्धेः। न हि अन्यत्वज्ञानस्य निरालम्बनत्वे अन्यत्वविशिष्टप्रत्ययत्वरूपो हेतुः सिद्ध्यति। न च साधनप्रत्ययभिन्नत्वविशिष्टप्रत्ययत्वस्य हेतुत्वात् तदन्तर्गतसाधनप्रत्ययभिन्नत्वस्य निरालम्बनत्वानुमितिसाधनत्वमस्त्येव। तथा च स्तम्भादिप्रत्ययविशेष्यकसाधनप्रत्ययभिन्नत्वप्रकारकज्ञानस्य साधनज्ञानत्वमेव, न तदतिरिक्तत्वमिति तस्य सालम्बनत्वं संभवति। अतो न तद्विषयस्य हेतुघटकस्य साधनप्रत्ययातिरिक्तत्वस्यासिद्धिरिति वाच्यम्। "साधनप्रत्ययातिरिक्तः प्रत्ययो निरालम्बनः, साधनप्रत्ययातिरिक्तत्वे सति प्रत्ययत्वादि"ति वाक्यविषयकस्य, तदर्थविषयकस्य, एतद्वाक्यघटकपदविषयकस्य, तज्जन्यस्यैतद्वाक्यघटकपदार्थविषयकस्यैव च ज्ञानस्य साधनप्रत्ययत्वेन व्यवहारात्। स्तम्भादिप्रत्ययोद्देश्यकसाधनप्रत्ययातिरिक्तत्वविधेयकस्य "स्तम्भादिप्रत्ययः साधनप्रत्ययातिरिक्त" इति ज्ञानस्य च पूर्वोक्तवाक्याद्यन्यतमविषयकत्वाभावेन साधनगत-

[22] सौत्रान्तिकैः बाह्यार्थस्वीकारात् तन्मतमूलभूतं बुद्धोक्तं सूत्रं किञ्चिदस्तीति उन्नीयते।

[23] पृ. सं. २१२

पदार्थविषयकत्वेऽपि साधनवाक्यस्थपदजन्यत्वाभावेन च न साधनप्रत्ययत्वं, किन्तु तद्भिन्नत्वमेवेति भवति तन्निरालम्बनत्वप्रयुक्तहेत्वसिद्धिः।

अत्रेदं बोध्यं– यदि साधनज्ञानशब्देन अनुमानप्रयोगगतपदाजन्यस्यापि तदर्थविषयकज्ञानस्य ग्रहणं क्रियते, तर्हि सिद्धान्तिना निरालम्बनत्वानुमाने हेतोरसिद्धिरुपपादयितुं न शक्यते। वस्तुतस्त्वनुकूलतर्काभावात् साधनप्रत्ययातिरिक्तत्वविशिष्टप्रत्ययत्वेन हेतुना निरालम्बनत्वं साधयितुं न शक्यते। स्वप्नप्रत्ययदृष्टान्तेन जाग्रदवस्थज्ञानानां निरालम्बनत्वं वदतो बौद्धस्य प्रत्ययत्वमेव निरालम्बनत्वे प्रयोजकमभिप्रेतम्। सति प्रयोजके प्रयोज्यमवश्यम्भावि। अतः "यदि निरालम्बनत्वं न स्यात् तर्हि तत्प्रयोजकं प्रत्ययत्वमपि न स्यादि"-ति तर्कः प्रत्ययत्वहेतुकानुमाने अनुकूलतया प्रस्तोतुं शक्यते। साधनप्रत्ययातिरिक्तत्वविशिष्टप्रत्ययत्वे हेतूक्रियमाणे तु नैतादृशः अनुकूलस्तर्को विद्यते। साधनप्रत्ययस्य निरालम्बनत्वाभावे (सालम्बनत्वे) प्रमाणाभावेन निरालम्बनत्वप्रयोजकस्य प्रत्ययत्वस्य साधनप्रत्ययातिरिक्तवृत्तित्वेन सङ्कोचयितुमशक्यत्वात् न साधनप्रत्ययातिरिक्तवृत्तिप्रत्ययत्वं निरालम्बनत्वप्रयोजकम्। अप्रयोजकस्य च तस्य न निरालम्बनत्वाभावेन अभाव आपादयितुं शक्य इति अनुकूलतर्कासम्भव इति।

किञ्च निरालम्बनत्वसाधनायोपात्तः प्रत्ययत्वहेतुः सप्रतिसाधनोऽपि भवतीत्याह –

**"विरुद्धाव्यभिचारित्वं बाधो वाप्यनुमानतः।**
**इत्थं सर्वेषु पक्षेषु वक्तव्यं प्रतिसाधनम्॥**
**बाह्यार्थालम्बना बुद्धिरिति सम्यक् च धीरियम्।**
**बाधकापेतबुद्धित्वात् यथा स्वप्नादिबाधधीः॥**
**सापि मिथ्येति चेद्ब्रूयात् स्वप्नादीनामबाधनात्।**
**[24]न स्यात् साधर्म्यदृष्टान्तो भवतस्साधनेऽधुना॥[25]**

---

[24] अयं तात्पर्यटीकापुस्तकस्थः पाठः समीचीनत्वात् स्वीकृतः। न्यायरत्नाकरपुस्तके "तस्मात् साधर्म्य....नहि" इति, काशिकापुस्तके "तस्मात्.....अधुना" इति च दृश्यते।

[25] श्लोकवार्तिकम् निरा – ७८-८१

अयमर्थः – एतावता निरालम्बनत्वानुमानपक्षविषये बहवो विकल्पाः प्रदर्शिताः। तथाहि – पक्षनिर्देशकस्य प्रत्ययशब्दस्य [26]व्युत्पत्तिभेदमाश्रित्य ज्ञानं, शब्दः, अर्थो वा प्रत्ययः इति त्रयो विकल्पाः। [27]साधनप्रत्ययातिरिक्तप्रत्ययः पक्षः इति चतुर्थो विकल्पः। तत्रार्थस्य निर्विषयकत्वरूपं निरालम्बनत्वं तु सिद्धान्तिनापि इष्यत एवेति तत्र पक्षे सिद्धसाधनं दोष इत्युक्तम्। अन्येषु च सर्वेषु पक्षेषु इत्थं (वक्ष्यमाणरीत्या) प्रतिसाधनं सम्भवति। अतश्च हेतोर्विरुद्धाव्यभिचारित्वदोषः प्रतिज्ञाया अनुमानबाधदोषो वा स्यात्। सिद्धान्तिना वक्ष्यमाणस्य प्रतिसाधनस्य बलवत्त्वे प्रतिज्ञाया अनुमानेन बाधः। "अयं बाधाख्यो दोषः प्रतिज्ञाया एव न हेतोरि"ति मीमांसकसिद्धान्तः। प्रतिसाधनस्य पूर्वपक्ष्युक्तसाधनसमबलत्वे तु विरुद्धाव्यभिचारित्वं हेतुदोषः।

अत्रेदमवधेयम्– "तस्य चास्य सत्प्रतिसाधनस्य एकेनैव हेतुना प्रतिकूलसाधने विरुद्धाव्यभिचारी नाम अवान्तरजातिरि"[28]ति नीतितत्त्वाविर्भावकर्तृश्रीचिदानन्दपण्डितानुसारिमानमेयोदयपङ्क्तिपरामर्शेन प्रतिसाधने साध्यतद्विशेषान्यतराभावसाधनाय उपात्तः साधनगतो हेतुः विरुद्धाव्यभिचारीति लभ्यते। यथा – "क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवत्" इति साधनगतः कार्यत्वहेतुः "क्षित्यङ्कुरादिकम् ईश्वरकर्तृकन्न, कार्यत्वाद् घटवत्" इति प्रतिसाधने पूर्वानुमानसाध्यस्य सकर्तृकत्वस्य यो विशेष ईश्वकर्तृकत्वं तदभावसाधनायोपात्त इति भवति विरुद्धाव्यभिचारी। साध्यस्य तद्विशेषस्य वा यद्विरुद्धं (योऽभावः) तदव्यभिचारीति विरुद्धाव्यभिचारिपदव्युत्पत्तिः।

**"यत्राप्रत्यक्षता वायोररूपत्वेन साध्यते।**
**स्पर्शात् प्रत्यक्षता वासौ विरुद्धाव्यभिचारिता॥"[29]**

इति श्लोकवार्तिककारिका तु प्रतिसाधनेऽनुपात्तस्यापि सप्रतिसाधनस्य हेतोः विरुद्धाव्यभिचारितामुदाहरणमुखेन स्पष्टयति। अत्र हि "वायुरप्रत्यक्षः अरूपत्वे सति द्रव्यत्वादि"ति साधनस्य "वायुः प्रत्यक्षः स्पर्शवत्त्वे सति महत्त्वादि"ति प्रतिसाधनमुदाहृतम्। अनयोश्च हेतोर्नैक्यम्। अथापि विरुद्धा-

---

[26] द्रष्टव्यम् – श्लोकवार्तिकम् निरा – ४१

[27] द्रष्टव्यम् – श्लोकवार्तिकम् निरा – ७३

[28] मानमेयोदयः – पृ.सं. ८५

[29] श्लोकवार्तिकम् अनु – ९१-९२

व्यभिचारित्वेन व्यवहारः कृतः। अतोऽत्र "विरुद्धस्य (साध्यतद्विशेषान्यतर-विपरीतस्य) अव्यभिचारी यस्ये"ति क्वाचित्केन व्यधिकरणेनापि बहुव्रीहिणा विरुद्धाव्यभिचारिपदं व्युत्पाद्यते। स्वसाध्यस्य अप्रत्यक्षत्वस्य यद्विपरीतं प्रत्यक्षत्वं तदव्यभिचारी स्पर्शविशिष्टमहत्त्वरूपो हेतुर्यस्य तादृशः प्रकृतहेतुः अरूपत्वविशिष्टद्रव्यत्वं भवतीति समन्वयः।

साध्यविपरीतसाधकाभिन्नतद्भिन्नयोरुभयोरपि सप्रतिसाधनयोः अनैकान्तिकेऽन्तर्भावः मानमेयोदयात् प्रतीयते। वस्तुतस्तु साध्यविपरीतसाधकाभिन्नस्तु विरुद्धादनतिरिक्त इति नासौ अनैकान्तिके अन्तर्भावनीयः। अत एव "तस्माद्भिन्नौ विरुद्धार्थौ हेतू चात्र निदर्शितौ"[30] इति वार्तिकेन भिन्नयोरेव साध्यतद्विपरीतसाधकयोः हेत्वोः विरुद्धाव्यभिचारिण उदाहरणत्वमित्युपसंहृतम्। तस्य चानैकान्तिकावान्तरभेदत्वमिति "केचिज्ज्ञात्यन्तरं चैनां वर्णयन्त्यपरे पुनः। साधारणत्वमंशेन समस्तं वाप्यनन्वयम्॥"[31] इति कारिकया स्पष्टीकृतम्। तथाच नैयायिकैः "यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः"[32] इति यः सत्प्रतिपक्ष उच्यते स एव वार्तिककारेण विरुद्धाव्यभिचारीत्युक्त इति सिद्धमिति।

प्रतिसाधनं दर्शयति – बाह्यार्थालम्बनेत्यादिना। "बुद्धिर्बाह्यार्थालम्बने"ति बुद्धिः यथार्था, बाधकापेतबुद्धित्वात्, स्वप्नबाधबुद्धिवत्" इति प्रतिसाधन-स्वरूपम्। यद्यप्यनेनानुमानेन प्रथमतः "बुद्धिर्बाह्यार्थालम्बने"ति एकस्यैव प्रत्ययस्य निरालम्बनत्वविरुद्धं यथार्थत्वं सिद्ध्यति न तु सर्वेषां प्रत्ययानां, तथापि प्रत्ययत्वावच्छेदेन निरालम्बनत्वे साध्ये ज्ञाते तत्सामानाधिकरण्येन सालम्बनत्व (यथार्थत्व)निश्चयोऽपि बाधक एवेति सिद्ध्यति अनुमानबाधः प्रतिज्ञायाः। अथवा अनेनानुमानेन पक्षीभूते ज्ञाने याथार्थ्यरूपे साध्ये ज्ञाते पश्चात् पक्षीभूतज्ञानेन बाह्यार्थालम्बनत्वविषयकेण बाह्यार्थरूपे विषये ज्ञाते पश्चात् पक्षीभूतज्ञानेन बाह्यार्थानालम्बनत्वविषयकेण बाह्यार्थानालम्बनत्व-प्रतिज्ञाया बाधात् उपपद्यते अनुमानबाधः। अत्र च प्रतिसाधनीभूतानुमानेन परम्परया बाधो वेदितव्यः।

---

[30] श्लोकवार्तिकम् अनु – ९३

[31] श्लोकवार्तिकम् अनु – ९२-९३

[32] तर्कसङ्ग्रहे अनुमानपरिच्छेदे

**जाग्रज्ज्ञानानां बाधाभावेन मिथ्यात्वाभावः –**

प्रतियोगि(विरुद्धार्थ)दर्शनरूपबाधेन हि ज्ञानानां मिथ्यात्वं निश्चीयते, तदभावे तु उत्पन्नस्य ज्ञानस्य सत्यत्वमेव। यदि बाधमनपेक्ष्यैव जाग्रज्ज्ञानस्य निरालम्बनत्वं (मिथ्यात्वं) कथ्यते, तर्हि स्वप्नजाग्रज्ज्ञानयोर्न कश्चिद्विशेषः स्यात्। न च उभयोरपि मिथ्यात्वेन अविशेष इष्ट एवेति वाच्यम्। तथा सति योगिज्ञानस्यापि बौद्धैः सत्यत्वेनाभिमतस्य मिथ्यात्वापत्तेः। इदमेवाभिप्रेत्याह–

**प्रतियोगिनि दृष्टे च जाग्रज्ज्ञाने मृषा भवेत्।**
**स्वप्नादिबुद्धिरस्माकं तव भेदोऽपि किङ्कृतः॥**[33] **इति।**

ननु जाग्रज्ज्ञानस्य सम्यक्त्वं कथं, नहि तस्य असम्यक्त्वेपि स्वप्नप्रतियोगित्वं युज्यते, असमीचीनज्ञानेन ज्ञानान्तरस्य वस्तुतो बाधासंभवादिति चेदुच्यते –

**स्वप्नादिप्रतियोगित्वं सर्वलोकप्रसिद्धितः।**
**तदीयधर्मवैधर्म्याद् बाधकप्रत्ययो यथा॥**[34] **इति।**

अयं भावः – स्तम्भादिजाग्रज्ज्ञानानां स्वप्नादिप्रतियोगित्वं सर्वलोकप्रसिद्धेः निराबाधम्। स्वाप्निकधर्मस्य बाध्यत्वस्य वैधर्म्याद् = (अबाध्यत्वात्मक)विरुद्धधर्मवत्त्वेन जाग्रज्ज्ञानानां सम्यक्त्वं निश्चीयत इति भवति जाग्रज्ज्ञानानां स्वप्नप्रतियोगित्वम्। यथा स्वप्नादुत्थितस्य "नैतदेवमि"ति बाधकज्ञानं स्वप्नप्रतियोगि दृष्टं, तथा अन्यदपि जाग्रज्ज्ञानं स्वप्नप्रतियोगि भवत्येव, अबाध्यत्वेन सम्यक्त्वादिति।

**निष्कर्षः** – एवं युक्तिबलाच्चिन्त्यमाने न सर्वेषां ज्ञानानां निरालम्बनत्वं साधयितुं शक्यते। बाधितानामेव ज्ञानानां निरालम्बनत्वं, न तु बाधरहितानामपीति प्रतिपादितम्। एतेन फलतदुपायादिज्ञानस्य अबाधितस्य सालम्बनत्वेन लोके उपायेषु प्रवृत्तिः उपपन्ना भवति। अन्यथा फलतदुपायादिज्ञानस्य स्वप्नवत् निरालम्बनत्वे ज्ञाते फलोद्देशेन उपाये प्रवृत्तिः अवरुध्येत। सत्यप्येवं

---

[33] श्लोकवार्तिकम् निरा – ८८-८९, अत्र तात्पर्यटीकाव्याख्यैव हृद्यतमा।

[34] श्लोकवार्तिकम् निरा – ९०-९१

बाह्यविषयसत्यत्वमपह्नुत्य ज्ञानानां निरालम्बनत्वं यद् बौद्धैः प्रतिपादितम्, तत् बाह्यविषयाणामत्यन्तमस्थिरत्वेन तत्र आस्थानिवृत्त्यर्थम्।

**सहायकग्रन्थाः –**

1. मीमांसादर्शनम् (भागः १), शाबरभाष्योपेतम्, आनन्दाश्रमः, पुणे, पुनर्मुद्रणम् - १९९४
2. मीमांसाश्लोकवार्तिकम्, पार्थसारथिमिश्रविरचितन्यायरत्नाकर-व्याख्योपेतम्, रत्ना पाब्लिकेशन्स्, वाराणसी-१९९३
3. मीमांसाश्लोकवार्तिकम्, सुचरितमिश्रविरचितकाशिकोपेतम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली -२०१४
4. मीमांसाश्लोकवार्तिकम्, उम्वेकभट्टविरचिततात्पर्यटीकोपेतम्, मद्रासविश्वविद्यालयः -१९७१
5. मानमेयोदयः, चौखाम्बा विद्याभवनम्, वाराणसी -२०२२
6. भाट्टतन्त्ररहस्यम् – पं.ए.सुब्रह्मण्यशास्त्री, वाराणसी-१९७०
7. तर्कसंग्रहः – पूर्णप्रज्ञविद्यापीठम्,बेङ्गलूरु -२०१५

*********

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५

ISSN: 0975-1769 UGC CARE ID:101000019

# सा भारती भारती

**प्रो. गौरप्रियादाशः**
विभागाध्यक्षा, सर्वदर्शनविद्याशाखा
के.सं.वि, श्रीसदाशिवपरिसरः, पुरी
(Sub ID: CSU/SV-059)

**शोधसारः** – *अस्माकं संस्कृतिः विश्वस्मिन् विश्वे सत्यधर्मन्यायैकतायाः उदारतायाश्च महामन्त्रं प्रसार्य्य भारतवर्षं विश्वगुरुस्थाने अधिष्ठापयति।*

*साम्प्रतिके युगे महिलाधिकारप्रकरणमङ्गीकृत्य यदा न्यायालयस्य न्याय-मूर्त्तयः सर्वकारीयबुद्धिजीविनः अनुदिनं बुद्धीः कौशलानि क्रियाः नियोजयन्तः संदृश्यन्ते तदा अस्माकं भारतीयसंस्कृतिः महिलाधिकारप्रसङ्गे मातृजातये कथं किं रूपं स्थानं दित्सतीति प्रबन्धस्यास्य विषयः। भगवान् श्रीरामः, उत्तानपादतनयः ध्रुवः, छत्रपतिः शिवराजः, महर्षिः कपिलः सर्वे अमी महायशसो मनस्विनः मातृपूजनेन मात्रादेशपालनेन च समधिकमहत्त्वं लेभिरे।*

*किञ्च याज्ञवल्क्यमैत्रेयीसंवादे याज्ञवल्क्यगार्गीसंवादे, सुलभाजनकसंवादे शङ्करोभयभारतीसंवादे च सर्वत्र महीयस्याः महिलायाः प्रशस्तिः अस्माकं संस्कृतौ मुक्तकण्ठेन जेगीयते। एवमेव भारतीयसंस्कृतिः जीवनदर्शनं लोकचरित्रं सर्वं किमपि महिलानामनुपमं महत्त्वं बिभर्त्तीति लेखोऽयं संदिदिक्षति।*

**कूटशब्दाः** – याज्ञवल्क्यः, मैत्रेयी, गार्गी, भारती, सुलभा, जनकः, आत्म-ज्ञानम्, वाचक्नवी

**शोधपद्धतिः** – शोधपत्रेऽस्मिन् विवेचनात्मकशैल्या आलोचनात्मकशैल्या ऐतिहासिकपद्धत्या च समाश्रयः व्यधायि।

**विश्ववारा इयं संस्कृतिः**। विश्वस्मिन् विश्वे सत्यधर्मन्यायसंहते उदारताया अखण्डतायाश्च महामन्त्रं प्रचार्य्य विश्वगुरुस्थानमलङ्कृतवत् भारतम्।

❖ **भारतीयसंस्कृतौ नारी** –

वस्तुतः –

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**[1]

**"पितृदेवो भव मातृदेवो भव आचार्यदेवो भव अतिथिदेवो भव"**[2] इत्यादीनि अस्माकमाराध्यवाक्यानि प्रतिपादनपरायणानि भवन्ति अस्माकमान्तःचेतनायाः आदर्शस्य च। यस्यां भूमौ पिता स्वर्गस्य स्वरूपं बिभर्त्ति, माता च पृथिव्याः तत्र तदुपासकैः भारतस्यान्तेवासिभिः आस्वर्गमापृथिवि समुपास्यते इत्यत्र का विप्रत्तिपत्तिः। अस्यां संस्कृत्यां अग्रपूज्या नारी आचार्येभ्यः पितृभ्यश्च समेभ्यः समधिकमर्य्यादां लभते इत्यत्र अस्माकं शास्त्रं प्रमाणम्। तद्यथा भणितम् –

**उपाध्यायान् दशाचार्य आचार्याणां शतं पिता।**
**सहस्त्रं तु पितॄन्माता गौरवेणातिरिच्यते॥**[3]

सत्यं तु इदं यत् सृष्टेरस्याः यावती विचित्रता, यावान् विशेषोपक्रमः प्रतिनियतकार्यकारणभावः यावच्च सौन्दर्य्यं सौकुमार्य्यं समायोजनं सर्वत्र महिलायाः महत्त्वपूर्णमवदानम् अवसरं लभते।

महपूजायामिति[4] धातोः इलच्[5]-प्रत्यये पूजायाः समर्चनायाः कर्मत्वेन करणत्वेन च महिलाः एव सर्वेभ्यः पूजाः सेवाः ददति अभ्यर्हितत्वेन सर्वेभ्यः पूजाः स्वीकुर्वते च। सैव पुरुषस्य पुरुषार्थस्य जननी, धर्मस्य संघटयित्री अधर्मस्य च विघटयित्री, परब्रह्मणः शक्तित्वेन अघटनसंघटनविधात्री पराम्बा जगन्माता कार्यकारणस्वरूपसम्पन्ना वैश्वरूपा वर्त्तते। यस्मिन् देशे जनन्याः भगवत्याः गङ्गायाः कृपोपलब्धत्वेन देवव्रतो भीष्मो वीरव्रतित्वेन ब्रह्मचर्यव्रतित्वेन च भुवनप्रशस्तिमवाप, स्वमातरं सुनीतिं गुरुरूपेण संप्राप्य ध्रुवः उत्तानपादतनयो भगवतो नारायणस्य भक्तत्वेन अन्तरिक्षलोकस्य सर्वैश्वर्य्यं लभमानोऽग्रपूजां गृह्णाति, जनन्याः आज्ञापालनतत्परः साकेतनाथः चतुर्दशवर्षम् अभिव्याप्य अरण्यवासस्य काठिन्यं निर्वहन् श्रीरामायणमन्दा-

---

[1] मनुस्मृतिः २।२०
[2] तैत्तिरीयोपनिषत् १/११/२
[3] मनुस्मृतिः १२।४५
[4] धातुपाठः २०९१
[5] सलिकल्यनिमही... इति उणादिसूत्रम्। उणादि १।५५

किनीधारां वसुन्धरायाम् अस्याम् अवारिताम् अकृत जगद्गुरुरपि कपिलः सांख्यज्ञानस्य अनन्याधिकारिणीं मनीस्विनीं स्वजननीं प्रति मानवमनीषायाः दिव्यज्ञानं प्राकाशयत्। जनयित्र्याः उपदेशं शिरोभूषणत्वेन अवधार्य छत्रपतिः शिवराजः विश्वविजयमकार्षीत्।

या माता मानवानाम् आराध्यस्वरूपाणाम् इन्द्रादिदेवसमुदायानां जननी अदितिः, या माता श्रीराम- श्रीकृष्ण- श्रीचैतन्य- रामानुज- शङ्कर- निम्बार्क- नामदेव- ज्ञानदेव- मीरा- तुलसी- सूरदास- शिवराज- गोपबन्धु- कलाम- नरेन्द्रदामोदरप्रभृतीनां जनयित्री सा तु सदैव समाजस्यास्य अभिवन्दनीया समर्चनीया निर्मञ्छनीया वर्तते। याः देव्यः धर्मरक्षायै सावित्री- वैदही- याज्ञसेनी- दमयन्ती- कुन्ती- देवकी- कौशल्या- ऽनसूया- लक्ष्मीवाइ- अहल्यावाइसंज्ञकाः तासां पूतपादपांशव अस्मन्निराजनकवचमणयो भवन्ति।

याः मनस्विन्यः महिलाः अस्मद्देशे वेदस्य द्रष्टृत्त्वं धर्मस्य स्रष्टृत्त्वं संस्कारस्य संस्कृतेश्च प्रातिनिध्यं निर्वहन्तितमां ताः चिरं पूजनीया अर्चनीया अर्हणीयाश्च। ताश्च मेधाविन्यः ब्रह्मवादिन्यः प्रज्ञाप्रकाशित्यः मैत्रेयी-सुलभा-लोपामुद्रा-घोषा-अपला-अदिति-सरस्वती-कात्यायनी-गार्गी-इन्द्रसेना-मेधा-लीलावती-विजिका-भारतीप्रमुखाः। तासां च चरणकमल- पलास- विलास- साहचर्यम् अद्यतनदुर्द्दिनस्य दौर्भाग्यदूरीकरणे मणिमन्त्रौषधादिवत् अनपायोपायः।

**अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः।**
**यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः॥**[6]

### ❖ भारतीयसंस्कृतौ शास्त्रार्थपरम्परायां नारी –

विश्वस्मिन् विश्वे भारतीयसंस्कृतेः वैशिष्ट्यं सर्वोऽपि जनः जानते। नार्य्याः स्थानं एतद्देशसंस्कृतौ सर्वौच्चं वरीवर्त्ति। सृष्टेरस्या आदिमाता, पराम्वा जगदम्बा जगन्माता इत्याद्याः संज्ञाः अभिदधाति। इमाम् आदिशक्तिं विना स्रष्टुः स्रष्टृत्वं निष्फलं परिणामशून्यम् असत्यम् अशिवम् असुन्दरञ्च। तदुक्तं भगवता श्रीशङ्करेण –

**शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं**

[6] श्रीमद्भागतवम् ५।१९।२१

ने चेदेवं देवः न खलु कुशलः स्पन्दितुमपि।
अतस्त्वामाराध्यां हरिहरविरञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति॥

❖ **याज्ञवल्क्यमैत्रेयीसंवादः –**

शास्त्रेण शास्त्रीयताविधानेन च अस्याः भूमेः महिलाः चिरं परिचिताः। बृहदारण्यकोपनिषदो याज्ञवल्क्यमैत्रीयसंवादोऽस्य दृष्टान्तः। प्रव्रज्यां कामं पतिदेवं याज्ञवल्क्यं विषयभोगस्य सर्वामासक्तिं विहाय पप्रच्छ **"येनाहं नामृतास्यां किमहं तेन कुर्याम्"**[7] स्वप्रियतमां ब्रह्मवादिनीं मैत्रेयीं निकषा सत्यमवतारितम् आचार्येण। **"अमृतत्त्वस्यनाशास्तिवित्तेन", "न कर्मणा न प्रजया न धनेन त्यागेनैकेनामृतत्वमानशुः"**[8], **"आत्मा वारे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्यः"**[9]।

अस्यार्थः- आत्मतत्त्वस्यानुभूतिः एव दुःखस्य निदानम्। प्रजाः कर्माणि धनानि च दुःखस्य सोपानानि। उपनिषदः अस्मिन् प्रकरणे याज्ञवल्क्यमैत्रेयीसंवादे महिलानां प्रातिनिध्यं निर्वहन्ती मैत्रेयी नारीत्वेन शास्त्रार्थमर्यादां लभमाना ब्रह्मवादिना भर्त्तृणा ब्रह्मवादिनीसंज्ञाम् अवाप। आत्मदर्शनस्य चरमां परिणतिं संप्राप्य देहस्य देहोपकरणस्य सर्वेऽपि व्यवहाराः हीयन्ते लीयन्ते च। चित्ति-शक्तिः आत्मनः सत्यस्वरूपे मिथ्याहङ्कारस्योच्छितिः पुरुषार्थं सूचयन्ती लिङ्गवर्णजातिगतवैषम्यम् अपाकुर्वती स्वकीयं सच्चिदान्दघनरूपं वितन्वती ब्राह्मीनिष्ठां संचकास्तितमाम्। बृहदारण्यकोपनिषदो याज्ञवल्क्यमैत्रेयीसंवादे आत्मज्ञानस्य काष्ठापरिणतिः ब्रह्मवादिन्याः मैत्रेय्याः याज्ञवल्क्येन साकं शास्त्रार्थादेवोपलभ्यते।

❖ **याज्ञवल्क्यगार्गीसंवादः –**

बृहदारण्यकोपनिषदि तृतीयाध्याये षष्ठब्राह्मणे अष्टमब्राह्मणे च वाचक्नव्याः गार्ग्याः उपाख्यानं समुपलब्धं वर्त्तते। अत्राऽपि गार्ग्याः अयं संवादः

---

[7] बृहदारण्योकपनिषत् २।४।३

[8] तैत्तिरीयारण्यकम् १०।१०

[9] बृहदारण्योकपनिषत् २।४।५

याज्ञवल्क्येन संजातः। जनकराजस्य सभायां शास्त्रार्थस्पर्द्धामवलम्ब्य याज्ञवल्क्यः दशसहस्रां गोसम्पत्तिं स्वीचकार। प्रकरणेऽस्मिन् वाचक्नव्या नैके शास्त्रीयप्रश्नाः पृष्टाः। जलादारभ्य ब्रह्मलोकपर्यन्तम् उत्तरोत्तराधिष्ठानसंयुताः जिज्ञासाः चकार गार्गी। यदा ब्रह्मलोकः केन ओतप्रोतः? इति विजिज्ञासितवती तदा गार्गी मातिप्राक्षीः इति याज्ञवल्क्य उवाच। किं च पौनःपुन्येन अनुमतिप्रार्थनापूर्वकं गार्गी अन्तिमप्रश्नद्वयं जिज्ञासितवती। याज्ञवल्क्येन निगदितम् – **स होवाचैतद्वै तदक्षर गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गम् अचक्षुष्कमश्रोत्रमवाग् अमनोऽतेजस्कमप्राणममुखमात्रं अनन्तरमबाह्यंन तदश्नाति किं चन न तदश्नाति कश्चन।**[10] एवमेव सुलभाजनके संवादेऽपि आत्मज्ञानामृतं यथा समजनि तथैव महाभारते इदं विचार्य्यते समीचीनरीत्या।

❖ **सुलभाजनकसंवादः –**

एवमेव महाभारतस्य सुलभाजनकशास्त्रार्थसंवादः संस्कृतेः अस्याः शास्त्रार्थपरम्परां द्योतयन् कंचित् महाभारतीयभावं शास्ति। सुलभा ब्रह्मवादिनी नारीषु अन्यतमा या प्रधानराजर्षेः कुलोत्पन्ना काचित् क्षत्ररमणी आसीत्। सैषा सुलभासंज्ञका ब्रह्मवादिनी योगादिशास्त्रविशारदा प्रत्युदितख्यातिसम्पन्ना विज्ञातसर्वशास्त्रा कदाचित् राजर्षेः जनकस्य सभायामागता। राजर्षिजनकः ज्ञान-कर्म-सन्न्यासित्वेन पृथिव्यां प्राप्तयशाः अवर्त्तत। तेन शास्त्रार्थं कामयमाना सुलभा प्रकृष्टमेधायाः परिचयं निवेदयन्ती जनकाय पर्यनुयोगं कृतवती। अन्ततो गत्वा विषयविशययोः राद्धान्ते पञ्चशिखशिष्यस्य विदेहोपाधिलभमानस्य राजर्षेः जनकस्य ज्ञानमहोदधिं चुलुकीकृत्य शास्त्रीयाभिः तिरस्कारवाग्भिः उपालम्भनपूर्वकं स्वमतमुपतस्तरे। किञ्च सौक्ष्म्यं सांख्यं क्रमः निर्णयः प्रयोजनं चेति भाषागुणैः स्वकीयं वाचं समलङ्कुर्वती वेदान्तस्य परमां गम्भीराम् अव्यक्तां भूमिं स्पृशन्ती विजयं लेभे। न केवलं कृतादियुगेषु किन्तु कलावस्मिन् युगेऽपि भगवता शिवावतारेण आदिशङ्कराचार्येण भगवत्या भारत्यावताररूपायाः उभयभारत्याः शास्त्रार्थो भुवनविदितविषयत्वेन प्रथतेतमाम्।

---

[10] बृहदारण्यकोरपनिषत् - ३।८।८

❖ भारतीशङ्करसंवादः –

संवादस्य इतिवृत्तम् –

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥[11]

एषा एव महती वाणी कुरुक्षेत्रस्य रणाङ्गने अर्जुनोपदेष्ट्रा भगवता उक्ता। भगवतः इदं कार्यं न केवलं तेन अपि तु तदीयजनेन धर्मरक्षायै अधर्मस्य विनाशाय च साध्यते। यथा श्रीरामश्रीकृष्णवामनादयः भगवदवताराः धरा-पृष्ठमवतीर्य गोब्राह्मणानां साधूनाञ्च हितसाधनेन पाखण्डधर्मस्य विघातनेन च स्वलीलां स्वदिव्यं जन्मकर्म च प्रसारयन्ति तथा व्यास-दत्तात्रेय-शङ्कर-प्रमुखाः आवेशावताराः युगावतारस्य कार्यं कुर्वाणाः पृथिव्याः भारमपहरन्ति एव। कलावस्मिन् युगे भगवान् आदिशङ्कराचार्यः वेदधर्मस्य प्रतिष्ठापकः सकलागमनिगमनतन्त्रविशारदः स्वतन्त्रप्रज्ञः विज्ञः सर्वज्ञश्च शिवावतारः भारतवर्षेऽस्मिन् अवततार। अस्य धरावतरणेन कर्मकाण्डान्तर्गतं विगीतं दाक्षिण्यहीनं पशुहिंसाजनितम् उद्भटमभद्रं पापकार्यम् अपास्तम्। अपि च पाखण्डानां बौद्धानाम् आपातरमणीयो वेदविगीतमार्गो धर्मनाम्नि कैतवाचरणं तिरोहितञ्च।

आचार्यः शङ्करः ईशवीयाष्टमशताब्द्यां केरलप्रान्ते कालाडी नामके ग्रामे पूर्णातीरवर्तिनि आर्याशिवगुरोः दम्पत्योः पुत्रत्वेन अजनि। यद्यपि अस्याविर्भावमङ्गीकृत्य मतपार्थक्यं दरीदृश्यते तथापि ७८८ इति ईसवीय शतके वैशाखशुक्लदशम्याम् आचार्यस्य आविर्भावो बहुप्रसिद्धिं लभते। एव-मेव ८२० ईसवीयशतके वैशाखपूर्णिमायां महापुरुषस्यास्य देहावसानं प्रेक्षा-वद्भिः प्रमाणितम्।

श्रीशङ्करः श्रीविश्वेश्वरानुग्रहेण ब्रह्मसूत्रोपनिषद्गीतादीनां भाष्याणि याथार्थ्यप्रदर्शकानि बहूनि प्रकरणानि स्तोत्राणि च विरचय्य मीमांसकमूर्धन्यं

---

[11] श्रीमद्भगवद्गीता ४।२

मण्डनं वादे विजित्य सनातनसंस्कृतेः ध्वजं नभस्चुम्बिनं समप्रापयत्। श्रूयते च इयं प्रसिद्धोक्तिः–

**"अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।**
**षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्॥"**

भाष्यरचनोत्तरकाले आचार्येण दिग्विजयार्थं प्रयागराजं प्रति गतमिति प्राप्यन्ते प्रमाणानि। वैशाखमासे लब्धजन्मनः आचार्यस्य तस्मिन्नेव मासि षोडशसंवत्सरः पूर्त्तिं भजेत। भाष्यरचनस्य नवमे मासि दिग्विजयाय आचार्यो निर्गतः इत्यस्य अयमर्थः- मार्गशीर्षे च इयं यात्रा प्रारब्धा। तदा देशः पाखण्डैः अधिकृतः, धर्मश्च तैः तथाकथितैः भिक्षुभिः आक्रान्तः विपर्य्यस्तश्चासीत्, पवित्रबौद्धचिन्तनस्य भावमनाकल्प्य तदा मन्दमतयः तस्यार्थं कदर्थीकृत्य विडम्बितानि एव कार्याणि निष्पादयन्तः जनमानसान् उद्वेलितान् साधयन्त आसन्।

वेदाचारसदाचारयोः विलुप्तिः, वर्णाश्रमव्यवस्थायाः उपसंहतिः, कामनाविच्छित्तिनाम्ना विज्ञजनविगीतावैधकामस्य प्रशस्तिः खलु तस्याः कालविभीषिकायाः प्रतिच्छायाऽऽसीत्। अस्मिन् उद्धर्मप्रपीडिते भारतवर्षे परमाराध्यस्य आचार्यपादस्य श्रीशङ्करदेवस्य आविर्भावः मन्ये ग्रीष्मतापप्रपीडितायां मेदिन्यां प्रावृटः जयगानं यथा। सनातनधर्मस्य पुनः संस्थापनं विधर्मिभिः अपनीततातयाः संस्कृते पुनर्जागरणं चर्तुषु मुख्यधामसु पीठप्रतिष्ठानं सर्वत्र शास्त्रार्थव्याजेन अवैदिकशाखाच्छेदनं पशुवलीप्रमुखाणां निर्वहणतया वामाचारतानिराकरणम् इत्यादीनि पवित्राणि नैकानि कर्त्तव्यानि अवतारोद्देश्यानि च तेन सफलीकृतानि। किञ्च भगवतः व्यासदेवस्य अनुज्ञां समाधौ अवगम्य प्रयागराजस्थले कुमारिलभट्टेन शास्त्रार्थभावनामुपकल्प्य तत्राचार्यः प्रविवेश। गुर्वपराधम् ईश्वरापराधं चाङ्गीकृत्य तदा कुमारिलः तुषसमूहेषु अग्निसंयोगेन आत्मदाहकामो गृहीतो मरणसङ्कल्पश्चासीत्।

आचार्यशङ्करः तस्मादेव तच्छिष्यशिरोमणेः मण्डनमिश्रस्य तस्य भार्यायाः सरस्वत्यवताररूपायाः उभयभारत्याः परिचितिं सङ्केतं च विज्ञाय रेवातटवर्तिनीं औङ्कारेश्वरसमीपां माहिष्मतीपुरीं जगाम। मच्छिष्यं मण्डनं शास्त्रार्थेन पराजित्य पराजेष्यता भवताऽहमपि विजितो भवेयमिति प्रतिजाने इति निगदता कुमारिलाचार्येण दुर्वाससः अभिशापेन तद्गृहे स्वयं सरस्वती

भारतीसंज्ञिता अवतारं स्वीकृतवती इति सूचयता च प्राणाः तत्यजिरे। ततः माहिष्मत्यां प्रविष्टेन शङ्करेन मण्डनगृहसङ्केतः पृष्टवता -

**स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरो गिरन्ति।**
**द्वारस्थनीडान्तरसन्निविष्टा अवेहि तन्मण्डनमिश्रधाम॥**[12]

इति आश्चर्यवचनकर्णगोचरीकृत्य तद्गृहमवाप्तम्। वस्तुतः सरस्वती-स्वरूपायाः भारत्याः यत्र साकारतया समावेशः तत्र कीरङ्गनाभिः प्रामाण्य-वादविमर्शः सांशयिको भवितुं नार्हति कदाचित्।

आचार्यमण्डनमिश्रस्य संक्षिप्ता परिचितिरपेक्षिततत्वादधो विव्रियते –

**आचार्यो मण्डनः भारती च** - मण्डनमिश्रः वेदविशारदस्य भाट्टपरम्परायाः प्रवर्तकस्य कुमारिलाचार्यस्य शिष्यः भगिनीपतिश्च। कुमारिलः शङ्करभग-वत्पादस्य समकालिक आसीदिति ऐतिहासिकानां तथ्याविष्करणम्। तस्मात् मण्डनोऽपि शङ्करस्य समकाले संजातः इति प्रमाणीक्रियते। अयं मण्डनः पितामहस्य वेधसः अवतार इत्यत्र जयमङ्गलाचार्यः ब्रूते –

**ब्रह्मा सुरेश्वरो जातोऽरूणश्चैव सनन्दनः।**
**गीष्पतिश्चानन्दगिरिर्वरुणाश्चित्सुखाह्वयः॥**[13]

अग्रे पाणिग्रहीत्रीसम्बन्धेन एनं परिणीय भारती शास्त्राध्ययनाध्यपन-शास्त्रार्थकौशलपाटव्येन पत्नी वेदार्थावगतिधी च जाता। सा च विधिपत्नी सरस्वती दुर्वाससः शापग्रस्था उभयभारती इति शङ्करविजयकाव्ये प्रसिद्धा-ऽस्ति तद्यथा -

**विधिपत्नी सरस्वती प्यभूदुभयभारती।**
**दुर्वाससा पुरा शप्ता स्खलितं या जहास सा॥**[14]

एकदा ब्रह्मसभायां वेदस्वाध्यायावसरे दुर्वाससः मुनेः कांचिद् त्रुटि-मभिलक्ष्य सरस्वती जहास। तेन कुपितो मुनिस्तस्यै शशाप - मनुष्यलोके मानवी भव इति। ततः तया सविनयं प्रार्थितः असौ ऋषिः - भगवतः शिवस्य

---

[12] श्रीशङ्करदिग्विजयः

[13] संक्षिप्तशङ्करदिग्विजयः ३।४

[14] संक्षिप्तशङ्करदिग्विजयः ३।५

भूभागे धर्मरक्षार्थम् अवतारकाले भवत्या तद्दर्शनं प्राप्तवत्या तस्माच्च पराजयं लभमानया मुक्तिरवाप्स्यते इति आश्वासवचनं प्रोवाच।

**सा शोणतीरे संजाता सर्वशास्त्रविशारदा।**
**शारदा सहजज्ञानचित्रीकृतजगत्त्रयी॥**[15]
**भूतले धर्मरक्षायै शङ्करोऽवतरिष्यति।**
**तं दृष्ट्वा शापमुक्ता त्वममर्त्यत्वं गमिष्यसि॥**[16]

तस्याश्च कुमार्य्या भारत्याः परिणयः विश्वरूपेण मण्डनेन सहजात-प्रणयेन सम्भावितः।

**विश्वरूपं च गुणिनं श्रुत्वा सोत्कमना अभूत।**
**विश्वरूपश्च तां श्रुत्वा सद्गुणां गुणिनां वरः॥**[17]

ततः आचार्येण मण्डनेन द्वौतीकृत्य विप्रौ प्रेषितौ यौ दौवारिकेण आगतौ माहिष्मतीपुरस्य मण्डनस्य एवं विवरणं प्राददतुः –

**पुरी माहिष्मती पुण्या सर्वसम्पत्समन्विता।**
**तत्र भूभृन्निकेतस्थो विश्वरूपाभिधो द्विजः॥**
**कर्मनिष्ठः शुचिः शान्तः सर्वशास्त्राब्धिपारगः।**
**तरुणो वेदविज्ञस्ते यदि कर्णपथं गतः॥**[18]

एवमेव परस्परं संवादश्रवणेन तौ परिणयबन्धनेन निबद्धौ शास्त्र-चर्चामारभतुः। ततः उभौ शास्त्राध्ययनाध्यपनकुशलौ शिष्यसम्पत्परिवर्धन-कामौ भुवनविस्तारिणीं कीर्त्तिकौमुदीं लेभाते। गच्छता कालेन श्रीशङ्करेण मण्डनस्य शास्त्रार्थः प्रादुरभूत्। शङ्करदिग्विजयकाव्ये मण्डनस्य उक्त्या इदम-धिगम्यते –

**तदहं सकलं दारद्रविणाभिजनादिकम्।**
**विहाय शरणं यामि गुरोश्चरणपङ्कजम्॥**[19]

---

[15] संक्षिप्तशङ्करविजयः ३।९
[16] संक्षिप्तशङ्करविजयः ३।८
[17] संक्षिप्तशङ्करविजयः ३।१०
[18] संक्षिप्तशङ्करविजयः ३।१६-१७
[19] श्रीमत्शङ्कराचार्यचरितम्, ९।२०

अग्रे शङ्करेण शास्त्रार्थपराजितस्य मण्डनस्य अर्धाङ्गिनी उभयभारती पत्यु अवमानम् असहमाना स्वभारतीं निवेदयामास। अत्र कविः एवं प्राहः–

**अथाब्रवीदुपागत्य तरसोभयभारती।**
**आचार्य शृणु वाचं मे समयस्यानुसारिणीम्॥**[20]

भारत्या प्रार्थितः आचार्यः शङ्करः तया साकं शास्त्रार्थेन प्रवृत्तः। देवी भारती नार्या शास्त्रार्थो नोपेक्षेणीय इत्यत्र प्रामाण्यमेवं प्रदर्शयन्ती आहः-

**कथामकथयद् गार्ग्या याज्ञवल्क्यः पुरा न किम्।**
**राजा सुलभया सार्धं न हि किं ते यशस्विनः॥**[21]

अत्र इदम् अवधेयं ब्रह्मवादिन्या गार्ग्या याज्ञवल्क्यस्य, प्रज्ञावत्या सुलभया जनकस्य, मेधाविन्या च भारत्या शङ्करस्य शास्त्रार्थः अस्माकं संस्कृतौ नार्य्याः महनीयं स्पृहणीयं जगदादरणीयं च स्वरूपम् अस्मत्पुरतः प्रस्तौति। यथा सुलभया जनकः पराजितः, तथा देव्या भारत्या आचार्यशङ्करोऽपि। किन्वत्र देव्या उद्देश्यं शङ्करस्य पराजयो नासीत् किन्तु समुचितं प्रशिक्षणमेव। शिक्षणं पुनः अनुभवं विना न पूर्णतामेति। अतएव राजशरीरे भगवतः आचार्यस्य या भोगानुभूतिः सा भारत्या इङ्गितेन जातमिति स्पष्टार्थः। सर्वशास्त्रवेत्ताऽपि शङ्करः देव्या अनुमोदनं विज्ञाय तदनुसारं आत्मप्रशिक्षणं विधातुं कृतसङ्कल्पः व्यराजत इति अहो आत्मदर्शिनां बालवदभिचरणम्। कविना इदं प्रकरणम् एवमुद्गीतम् –

**तयोरश्रान्तमवृतद्दते नियमकालतः।**
**वादोऽतिगहनो यत्राहानि सप्तदशात्ययन्॥**
**शास्त्रेष्वजय्यमालोक्य कामे पप्रच्छ शारदा।**
**कामागमानभिज्ञऽसौ बाल्ये संन्यसनादिति॥**

**कलाः कियत्यः कामस्य किंरूपाः किंपदाश्रिताः।**
**स्थितिः स्त्रीपुंसयोः कीदृक् प्रसङ्गादित्यचोदयेत्॥**[22]

---

[20] शङ्करदिग्विजयः ९।२१

[21] शङ्करदिग्विजयः, ९।२४

[22] शङ्करदिग्विजयः, ९।२६-२८

अस्य अयं भावः – अविश्रान्ततया सर्वशास्त्रीयचर्चासु विशेषतः कर्मकाण्ड-ज्ञानकाण्डयोः प्रथितप्रकरणेषु शास्त्रार्थे सम्पन्ने आचार्यस्य विद्यावैशारद्यं चावलोक्य भारती चकितचकिततां प्राप्ता। इतोऽपि सर्वज्ञेन मुनिना काम-शास्त्रीयं ज्ञानमपि संग्रहणीयमिति तस्मात् शास्त्राद् जिज्ञासां कृतवती। इतो-ऽपि पराजितसदृशः आचार्यः देव्याः अनुमतिपूर्वकं परकायवेशं स्वीचकार। राज्ञः अमरूकस्य शरीरे संविश्य सर्वाणि कामशास्त्राणि अधीत्य अनुभूतिं चावाप्य अमरूकशतकमिति नाम्ना कामशास्त्रीयशतकं सम्पाद्य कालानुगुणं मण्डनमिश्रगृहं प्रत्यावृत्तः। शापमुक्ता च सरस्वती मण्डनेन साकं तस्य अभ्यर्चनं विकीर्य्य तच्छिष्यतां स्वीचकार। इदमेव भारतीशङ्करसंवादस्य इतिवृत्तम्।

पुण्यक्षेत्रेऽस्मिन् भारतवर्षे अयं शास्त्रीयसंवादो नादृष्टपूर्वः। उपनिष-त्कालादारभ्य भारतीशङ्करसंवादसन्निवेशनं यावत् अस्माकं देशे महिलायाः मर्य्यादा अतिशायिनी वर्तते। अद्यापि महिला विजयवैजयन्त्या परिमूषिता चास्ति। राजपृष्ठपोषकताया अभावात् सम्प्रति नारी शास्त्रीयाध्ययने आत्मानं न योजयति इत्यत्र तस्याः प्रतिभा अवलुप्ता इति नैव विचारासहः।

प्रतिभायाः विनियोगः यदि औचित्यं नाभिलष्येत नुनं विशृङ्खलाः अवसरान् लप्सेरन्। नार्य्यः इदानीमपि प्रतिष्ठायाः समुन्नतस्तरेषु विद्यमानाः देदीप्यमानाः राराजन्ते भौतिकज्ञानेन व्यवहारेण च सम्पन्नाः प्राशासनिक-क्षेत्रे सामरिकविभागे प्रयुक्तिविद्याहरणे विज्ञानागारे क्षपशास्त्रप्रयोगे चन्द्रादि-ग्रहपृष्ठे नोवेलपुरस्कारस्याधिगमे राजनीतौ गृहव्यापारे च समाधिकाधिका-रिण्यः वभ्राजन्ते। समाजेन आचार्यैः पितृभ्यां च परमार्थविद्या नासाद्य ताः शास्त्रार्थविचक्षताः न प्राप्यन्ते इत्यत्र वयमेव बीजं दुर्द्दिनस्य दौर्भाग्यस्य दुः-स्थितेश्च।

महिलानां मार्गदर्शनं चेत् प्रस्तूयेत तर्हि इदानीमपि नार्य्यो ब्रह्मवादि-नीतया पुरुषस्य, समाजस्य, राष्ट्रस्य, मार्गदर्शिकात्वेन आत्मज्ञानं ददीरन् येन पथभ्रष्टा जनता, मार्गविच्युतसमाजः दिग्भ्रष्टाः नागरीकाश्च सन्मार्गे प्रर-वर्तेरन्।

यद्यपि संवादमिममङ्गीकृत्य नैकाः दन्तकथाः श्रूयन्ते– तथापि इदं किंवदन्तीमात्रमिति नोपेक्षणीयम्। रामायणभारतादिसत्यवत् इदमपि अवि-

तथं लोकग्राह्यम् ऐतिहासिकं संघटनम्। इन्द्रियमात्रविचारविमूढाः इतिहासकाराः समाधे साधनस्य च प्राथमिकं सोपानं न आरुह्य स्वबुद्धिविषयतया यत् पाश्चात्यधारामनुसृत्य आम्रेड़यन्ति तत् प्रलापमात्रम्। तत्प्रलापं प्रमाणीकृत्य ये आत्मनः प्रेक्षाविन्मानिनः संवादनाम्ना विसंवादं प्रस्तुवन्ति तदेव तेषाम् अल्पज्ञतायाः विलापमात्रम्। एतत् न वाग्मिता किन्तु वाचालता खलु। अनया वाचालतया वेदस्य अपौरुषेयस्य कालपरिगणनं क्रियते। रामायणम् आख्यानमात्रमिति लोकमातरं सुरनिम्नगां नदीमिति मर्यादापुरुषोत्तमं श्रीरामं नारीविरोधिनमिति लीलापुरुषोत्तमं श्रीकृष्णं कामिनमिति अनुप्लुतचेतसः सङ्कीर्णान् इति महिलाः भोगसामग्रीः इति कथयन्तः वर्णसङ्कराः कापुरुषाः मानिमन्याः विगतलज्जाः संसारेऽस्मिन् यत्र तत्र परिभ्रमन्तः स्वार्थकैन्द्रिकताः सञ्चिन्वन्ति। वयं शास्त्रचक्षुषः दिवान्धानाम् उलूकानामिव तेषां कुत्सितासु गीर्षु कर्णपातलेशावकाशं न कामयामहे।

अस्माकं संस्कृतिः नारी-पुरुषयोः लिङ्ग-जाति-वर्णभेदान् अविगणय्य आत्मज्ञानसंचारे दाक्षिण्यं निर्वहति। तस्मात् गार्ग्याः मनीषायां संप्रीतः याज्ञवल्क्यः तां सहधर्मिणीत्वेन अङ्गीचकार। भारत्या पराजित आत्मज्ञानिवंशभूषणावतंसः श्रीशङ्कराचार्यः परकायावेशं स्वीचक्रे। आत्मज्ञानस्य इयमुद्गीतिः–

**न मे मृत्युशंका न मे जातिभेदः**
**पिता नैव मे नैव माता न जन्म।**
**न बंधुः न मित्रं गुरुर्नैव शिष्यं**
**चिदानंदरूपं शिवोहं शिवोहम्॥**[23]

शास्त्रेषु शृङ्खलाविमर्शम् अधिकारविमर्शम् अधिकृत्य सत्यस्य कर्त्तव्यस्य भिन्नरूपता दृष्टा। किन्तु अन्ततोगत्वा सर्वस्यापि संस्कारस्य, बोधस्य, क्रियायाः ज्ञाने एव परिसमाप्तिः –

**यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।**
**ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥**[24]

उपनिषद्वाङ्मयस्य अयमेवोपसंहारः –

---

[23] निर्वाणषट्कम् - ५

[24] श्रीमद्भगवद्गीता ४। ३७

**यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।**
**तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥**[25]

अस्मिन् आत्मज्ञानयज्ञे आत्मनः आहुतीः प्रदाय मैत्रेयी-गार्गी-लोपामुद्रा-विजिका-भारत्याद्याः नामरूपादिविनिर्मुक्ताः स्त्र्यादिशरीरभेदनिरपेक्षाः सत्यः ब्रह्मयज्ञपुरोहिताः समभवन्। यथा प्रदीपः अन्धकारे यावान् शोभते न तथा दिवसे समागते, तथा प्रकृतिप्रधानशरीरवतीषु आत्मज्ञानं पुरुषापेक्षया समधिकं शोभतेतमाम्। तदुक्तम्– **स्त्रीः ब्रह्मा बभूविथ**[26]– इति शम्।

**निष्कर्षः** –

**नैवात्मनः प्रभुरयं निजलाभपूर्णो**
**मानं जनादविदुषः करुणो वृणीते।**
**यज्ञनो भगवते विदधीत मानं**
**तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः॥**[27]

अस्य पदस्य अयं भावः – अप्राकृतानन्तकल्याणगुणाब्धये भगवते प्राकृतेन अज्ञजनेन प्रदत्तं मानं नैव भगवतः उत्कर्षं जनयति, किन्तु मानप्रदातुः स्वस्य एव समुत्कर्षं सम्प्रापयति। यथा मुखे कृतः शृङ्गारः प्रतिमुखस्य = प्रतिबिम्बस्य शोभाभिवर्द्धनं कुरुते तद्वित्यर्थः। प्रकरणस्यास्य अयमभिप्रायः यत् माननीयानां माननेन अर्चनीयानामर्चनेन अभिवन्द्यानामभिवन्दनेन मानदो जनः स्वयं समर्चितो भवति। वस्तुतः सम्मानभाजां महिलानां सम्माननं समर्चनं संपूजनं समाजस्य देशस्य राष्ट्रस्य जातेः व्यक्तेश्चाभिनन्दनम्। तदुक्तं भगवता मनुना –

**यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥**[28]

---

[25] मुण्डकोपनिषत् ३।२।८

[26] ऋग्वेदः ८।३३।१९

[27] श्रीमद्.भा. ७।९।११

[28] मनुस्मृति. ३।५६

प्रकृतप्रसङ्गे महिलानां भारतीयमनस्विनीप्रमुखाणां महनीयमौदार्यं सुविपुला प्रज्ञान्विता मेधा निरतिशायिनी संस्कृतिप्राणता च दिग्दर्शनव्याजेन प्रदर्शिता। तत्र इदमित्थमवधेयम् –

१. भगवतः चतुराननस्य दिव्यसर्जनकलायाः नैपुण्यं समधिकमहत्त्वं च सम्पादयन्ती प्रभवन्ती नैरन्तर्येण प्रकृतिपूरुषयोः सृष्टिः । तत्र शक्ति-स्वरूपा भ्राजते नारी या नरस्य विभिन्नासु भूमिकासु आकारवैभिन्नं स्वीकृत्य जननीत्वेन परिपालयन्ती भगिनीत्वेन स्नेहं सदिच्छामभि-लषन्ती बान्धवीत्वेन सन्मार्गं प्रदर्शयन्ती कान्तात्वेन जीवनसङ्गिनीत्वेन वा धर्मार्थकाममोक्षद्वारमुद्धाटयन्ती चेतस्सौन्दर्य्यं समुल्लासयन्ती कृत्स्नां जीवनजाह्नवीमतिवाहयतीति सत्यम्। तस्माद् नार्य्याः महत्त्वमुद्गायता कविना शूद्रकेन इदमभाणि –

**स्त्रियो हि नाम खल्वेताः निसर्गादेव पण्डिताः।**
**पुरुषाणां तु पाण्डित्यं शास्त्रैरेवोपदिश्यते॥**[29]

२. विपुलप्रतिभान्विताः नार्य्यः इदानीमपि यत्र तत्र विभ्राजन्ते। साहित्ये विज्ञाने प्रोद्योगे कला-कौशलप्रदर्शने, क्रीड़ायां, राजनीतौ सर्वत्र मनस्विनीनां मनो-वचः-क्रियानिवेशो दरीदृश्यते। किन्तु संस्कृतेः परम्परायाः नैतिकतायाः आदर्शवादस्य उदारतायाः अभावात् ताः अद्य नैकेषु विषयेषु पाटव्यं लभमाना अपि समाजाय तादृश्यः कल्याण्यो न भवितुमर्हन्तीत्यत्र कारणं दिग्दर्शनाभावः। अधुनाऽपि महिलाः समाजेन प्रशिक्षणं चेत् लभेरन् विश्वस्य सर्वाः अपि समस्याः सूपशान्ताः जायेरन्। यतो हि माता चेत् शक्तिमती सम्पद्येत सशक्ताः सम्भवेयुः पुत्राः, तैः सशक्तो भवेदयं समाजः।

३. महिलाश्च स्वयं शक्तिरूपाः **"सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते"** इति जानन्तो अपि पुरुषैः साकं समानतां कामयमानाः हास्यास्पदाः मा भवेयुः। शृङ्गारं परिधेयमात्रम् वा आत्मपरिचितित्वेन न संगृह्य सुमेधाः

---
[29] मृच्छकटिके ४।१९

मनीषाः संस्कारान् संस्कृतीश्च आत्मसम्पत्त्वेन चेत् ताः गृह्णीयुः तर्हि - सशक्तीकरणस्य नावशिष्येतावश्यकता।

विकसितभारतम् इति यद् सङ्कल्पनं श्रद्धेयानां माननीयानां प्रधानमन्त्रिमहोदयानाम् अग्रेसरति सम्प्रति तस्य रूपायनं महिलानां वास्तवमनीषासमजननेन अवश्यं साफल्यं भजेत इत्यत्र मतिमतां मतिः गतिश्च।

**सन्दर्भग्रन्थसूची**


- ईशादि नौ उपनिषत्. शाङ्करभाष्यसमेता. गोरखपुर : गीताप्रेस (प्रकाशक एवं मुद्रक), सं.- २०६८।
- उपनिषद्भाष्यम्. प्रथमखण्डः, श्रीमदानन्दगिर्याचार्यकृतटीकया कठतैत्तिरीयभाष्याणां माण्डूक्यप्रसिद्धाचार्यान्तरटीकाभिः सटीकतैत्तिरीयवार्तिकेन च समलङ्कृतम्. सम्पादकः- सं .एस . सुब्रह्मण्यशास्त्री. वाराणसी, श्रीदक्षिणामूर्ति-मठ-पण्डितप्रवर-कृष्णजोयिस. शाङ्करदर्शनमर्मप्रकाशः. Editor-Dr.M.L.Narakrishna Murthy. Tirupati :Rastriya Sanskrit Vidyapeetha, २००९।
- बृहदारण्यकोपनिषत्. शाङ्करभाष्यसमेता. गोरखपुरः : गीताप्रेस (प्रकाशक एवं मुद्रक), सं.-२०७०
- भगवच्छङ्कराचार्यः. अपरोक्षानुभूतिः. श्रीस्वामिविद्यारण्यमुनिविरचितया दीपिकया सहिता. व्याख्या-कारः सम्पादकश्च—चित्तनारायणपाठकः. वाराणसी, चौखम्बा विद्याभवन, २०१२।
- भगवान् पाणिनिः. अष्टाध्यायी. पदच्छेद-वृत्ति-वार्तिक-टिप्पणी-सहिता. सम्पादकः—श्रीगोपालदत्त-पाण्डेयः. वाराणसी, चौखम्बा सुरभारती प्रकाशन, २०१६।
- मुण्डकोपनिषद्. सम्पादकः- ब्रह्मचारिमेधाचैतन्यः. दण्डिस्वामी-दामोदर-आश्रमः, २००८।
- श्रीमद्भगवद्गीता. अष्टटीकोपेता. सम्पादकः- प.वासुदेवलक्ष्मणशास्त्री-पणशीकर. दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान, २००९।

- श्रीमद्भागवतमहापुराणम्. श्रीधरस्वामिविरचितया भावार्थबोधिनीनाम्न्या संस्कृतटीकया समुपेतम्. संस्कृता-आचार्यजगदीशलालशास्त्री. दिल्ली, मोतीलाल बनारसीदास, १९८८।


*********

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५
ISSN: 0975-1769 UGC CARE ID:101000019

# भारतीयसामाजिकजीवने मनुस्मृतेः प्रभावः

**डॉ. रूपा वि.**
सहायकाचर्यः, व्याकरणानुभागः
श्री शङ्कराचार्यसंस्कृतविश्वविद्यालयः, कालाडी
(Sub ID: CSU/SV-038)

**शोधसारः** - *मनुस्मृतौ मनुष्यस्य स्वस्य परस्य च कर्तव्यविषये विविधाः व्यक्तिगत-व्यवहाराः विधिसंहिताः च समाविष्टाः सन्ति। केवलं विधिशास्त्रात् परं मनुस्मृतिः दैनन्दिनजीवने व्यापिका। नियमः धर्मः राष्ट्रमीमांसा राजधर्माः वर्णधर्माः आश्रमधर्माः इत्येवं धर्माणां सामान्यविशेषभेदौ भरणव्यवस्थादिकञ्च अस्यां प्रतिपादितम् इत्येव-मादिकं स्मृतेरस्याः व्यक्तिजीवने सामाजिकजीवने समस्तासु मेखलासु च प्राधान्यं प्रभावं प्रायोगिकताञ्च सूचयति। आध्यात्मिकप्रगत्यर्थम् अपि अस्यां तत्त्वोपदेशाः दृश्यन्ते। इत्थं सार्वकालिकं सामूहिकं ज्ञानं स्मृतावस्यां प्रतिबिम्बितं वर्तते। भारतीय-सामाजिकजीवने स्मृतिरियं बहुधा प्रभावयुक्ता भवत्येव। अत एव एषा स्मृतिः आचारं ग्राहयन्ती सती भारतीयसामाजिकजीवने कीदृशं प्रभावम् आवहति इति विषयेऽत्र कश्चन प्रयासः क्रियते अनेन पत्रेण।*

**कूटशब्दाः** - मानवधर्मशास्त्रम्, आश्रमधर्माः, सर्वज्ञानमयः इत्यादयः ।

स्मृतिषु प्राचीना प्रसिद्धा च मनुस्मृतिः धर्मशास्त्रविभागे अन्तर्भवति। मानवजीवने मार्गदर्शकभूतानि आचारानुष्ठानानि वेदेषु सर्वत्र प्रसृतानि भवन्ति । तेषां क्रोडीकरणं भवति मनुस्मृतौ । आश्रमधर्माः अस्यां मुख्यप्रति-पाद्यम्। ब्रह्मचर्यादिषु आश्रमेषु करणीयानि धर्मानुष्ठानानि प्रतिपाद्यानि भवन्ति अस्यां स्मृतौ। प्रथमोऽध्यायः प्रपञ्चसृष्टिं प्रतिपादयति। द्वितीये संस्काराणां विधिः ब्रह्मचर्यनियमाः, तृतीयेऽध्याये गुरुशुश्रूषा पञ्चमहायज्ञानां विधिः, चतुर्थे गृहस्थाश्रमधर्माः विवाहप्रकाराः च वर्णिताः। पञ्चमः भोजन-क्रमान् स्त्रीधर्मान् च प्रतिपादयति। षष्ठोऽध्यायः वानप्रस्थसंन्यासाश्रमयोः प्रतिपादकः। सप्तमः अध्यायः राष्ट्रतन्त्रं राजधर्मं च प्रतिपादयति। अष्टमे

अध्याये सिविल्-क्रिमिनल् नियमाः प्रतिपादिताः। नवमः पुरुषसम्बन्धं चातुर्वर्ण्यव्यवस्थां च प्रतिपादयति। दशमोऽपि चातुर्वर्णिकव्यवस्थाप्रतिपादकः। एकादशोऽध्यायः बहुप्रकारान् विषयान् प्रतिपादयति। एवम् एते अध्यायाः लौकिककार्याणि प्रतिपादयन्ति। द्वादशोऽध्यायः मोक्षप्राप्तये आत्मसाक्षात्काराय वा उपकारकम् आधिदैविकम् आधिभौतिकम् आध्यात्मिकं च विषयं प्रतिपादयति। वेदेभ्यः गृहीताः आशयाः तथा लौकिकजीवितानुभवानां सामूहिकाचाराणां पाठाः च मनुस्मृतौ दृश्यन्ते। द्वादशसु अध्यायेषु भरणनियमाः धर्मशास्त्रं राष्ट्रमीमांसा राजधर्मः प्रजाधर्मः इत्येवमारभ्य व्यक्तिजीवने सामूहिकजीवने तथा समस्तक्षेत्रेषु च सुघटितं किञ्चित् शास्त्रं भवतीदं मानवधर्मशास्त्रं मनुस्मृत्याभिधम्। सामूहिकबौद्धिकाध्यात्मिकाः च तत्त्वोपदेशाः मनुस्मृतौ द्रष्टुं शक्यन्ते।

भारतस्य प्राचीनां संस्कृतिम् अवगन्तुं वेदेतिहासादयः पुराणं धर्मशास्त्रं वेदाङ्गानि चेत्यादीनि उपकुर्वन्ति।

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**
**पुराणं धर्मशास्त्रञ्च विद्या ह्येताः चतुर्दश ॥**

इत्युक्तदिशा चतुर्दशसु विद्यासु एकं खलु धर्मशास्त्रम्। तदेतत् धर्मशास्त्रम् एव स्मृतिशब्देन व्यवह्रियते। श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु स्मृतिः। सत्स्वपि अनेकासु याज्ञवल्क्यादिषु स्मृतिषु मनुस्मृतेः एव प्राशस्त्यम्। यतो हि सैषा स्मृतिस्तु वेदप्रतिपादितानां तत्त्वानाम् आधारेण विरचिता भवति। तदुक्तम्-

**यः कश्चित् कस्यचिद्धर्मो मनुना प्रतिपादितः**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।**
**मनुस्मृतिविरुद्धा या सा स्मृतिर्न प्रशस्यते**
**वेदार्थोपनिबद्धत्वात् प्राधान्यं हि मनोः स्मृतेः॥**[1]

सामूहिकजीवने धार्मिकमूल्यानि अत्यन्तापेक्षितानि भवन्ति। मानवैः किं कार्यं किमकार्यं कथं भवितव्यम् इत्येवं धर्मं संस्कृतिञ्च जानन् जीवने

---

[1] मनुस्मृतिः २ /७

आचरन् पालयन् वा यः धर्मेण मार्गेण प्रवर्तते सः तेनैव धर्मेण रक्षितः भवति। तदुच्यते - धर्मो रक्षति रक्षितः' इति।

मानवसंहिता अथवा मानवधर्मशास्त्रम् इत्यपि अभिधीयते मनुस्मृतिः। मन् धातोः उणादिना उप्रत्ययेन मनुशब्दः निष्पद्यते। मान्यते अनेनेति मनुः इति च। द्वादशाध्याययुते अस्मिन् ग्रन्थे मानवमङ्गलाय उपकारकाः बहवः उत्कृष्टाः आशयाः द्रष्टुं शक्यन्ते । अस्यामेव स्मृतौ चतुर्विधपुरुषार्थानां विवेचनं कृतं वर्तते। नीतिः नियमः धर्मः राष्ट्रमीमांसा राजधर्माः वर्णधर्माः आश्रमधर्माः इत्येवं धर्माणां सामान्यविशेषभेदौ भरणव्यवस्थाः इत्येवमादिकम् स्मृतेरस्याः व्यक्तिजीवने सामाजिकजीवने अपि तु समस्तासु मेखलासु च प्राधान्यं प्रभावं प्रायोगिकताञ्च सूचयति। आध्यात्मिकप्रगत्यर्थम् अपि अस्यां तत्त्वोपदेशाः दृश्यन्ते। इत्थं सार्वकालिकं सामूहिकं ज्ञानं स्मृतावस्यां प्रतिबिम्बितं वर्तते। अत एव एषा स्मृतिः आचारं ग्राहयन्ती सती भारतीयसामाजिकजीवने कीदृशं प्रभावम् आवहति इति विषयेऽत्र कश्चन प्रयासः क्रियते अनेन पत्रेण। भारतीयसामाजिकजीवने स्मृतिरियं बहुधा प्रभावयुक्ता भवत्येव। तेषु प्रभावभूतेषु अंशेषु एते श्रद्धेयाः केचन प्रतिपाद्यन्ते।

**सांस्कृतिकमण्डले प्रभावः।**

मानवसंस्कृतौ धर्मस्य महिमा वर्तते। यतोऽभ्युदयनिश्श्रेयससिद्धिः भवति सः धर्मः। यं क्रियमाणम् आर्याः प्रशंसन्ति स धर्मः यं निन्दन्ति सः अधर्मः। लोकः ध्रियते अनेन लोकं धरति धारयति वा य सः धर्मः इति धर्मशब्दस्य व्युत्पत्तिः। तस्य च पुण्यं प्रीतिः आचारः वेदः इत्येवमर्थाः। तदुक्तं मनुना -

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्[२]॥ इति।।**
**'अविज्ञाय कुलं धर्मं तथा चैव संस्कृतिम्।**
**मानवो मानवो न हि स्थान केवलं पशुरेव हि सः।।**

---

२ तत्रैव २/१२

3 तत्रैव

इत्युक्तिः मानवजीवने धर्मस्य प्राधान्यं सूचयति।

**अर्थोऽपि नैकः स्मृतयो विभिन्नाः।**
**नैको मुनिः यस्य मतं प्रमाणम् ॥**
**धर्मस्य तत्त्वं निहितं गुहायाम्**
**महाजनो येन गतः स पन्थाः।**

इत्युक्तदिशा यद्यपि बहवः स्मृतिग्रन्थाः भवेयुः मुनीनां विभिन्नाः मतयः स्युः तथापि धर्मस्य साक्षात् स्वरूपं तु तिरोहितं भवति। तत्र महाजनो येन पथा गच्छति तत्पथा सञ्चरन्तः तेषामाचारान् पालयन्ति स्म सामान्य-जनाः इत्यनेन लोकाचारदृष्टान्तेन संस्कृतौ धर्मस्य आचारस्य वा प्राधान्यम् अवगच्छामः। सोऽयं लोकाचार : मनुस्मृतावपि समर्थितः।

**येनास्य पितरो याताः येन याता पितामहाः।**
**तेन यायात् सतां मार्गं येन गच्छन्नरिष्यति[3]॥**

इत्थं लोकव्यवहारपूर्वकं धर्माचरणं मनुप्रोक्तम् अवगम्य तत्प्रभावितः कश्चन जीवने कल्याणम् अनुभूय स्मृतिवचनं पालयन् अस्याः स्मृतेः सामाजिकजीवने प्रभावदृष्टान्तभूतः सन् वर्तत एव।

एवम् अस्माभिरपि धर्मरक्षायै यतनीयम्। धर्मस्य स्थापना कर्तव्या इति उद्बोधयन्तीयं स्मृतिः जीवने पालनीयान् गुणान् अहिंसेत्यादीन् प्रतिपाद्य–

**एक एव सुहृद् धर्मो निधनेऽपि अनुयाति यः।**
**शरीरेण समं नाशं सर्वमन्यद्धि गच्छति॥[4]**

इति सैव निधनेऽपि सुहृद् इव अनुयाति इत्युक्त्वा मानवजीवने इयं स्मृतिः बहुधा उपकारिकैवेति समर्थयति।

**पुरुषार्थावाप्तये प्रेरिका।**

---

[4] तत्रैव -८ /१२७

धर्मार्थादिचतुष्टयं प्राप्तुं प्रेरयति मानवान् इयं स्मृतिः। यथा धर्मपालनं कर्तव्यं तेन अर्थोपार्जनं तेनैवार्जितेनार्थेन कामानां भौतिकसुखानाञ्च प्राप्तिः। तस्मात् आनन्दम् अनुभूय तदपि अनित्यम् इति बुद्ध्या मोक्षस्य कृते यतनीयम् इत्येवं ज्ञापयतीयं स्मृतिः। इत्थं धर्मार्थकाममोक्षचतुष्टयं मानवानामनिवार्यम् इति बोधयतीयं स्मृतिः।

**आश्रमव्यवस्थायापालने सहायिका।**

आश्रमधर्माः स्मृतेरस्याः एकः मुख्यः विषयः। जनानां जीवनकाले ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासरूपं चातुर्विध्यं मनुना प्रोक्तं निर्दिष्टं वर्तते। ब्रह्मचर्यावस्थायां बालकानां विद्याध्ययनं तपोमयजीवनयापनञ्च विहितम्। सद्गुणानाम् आर्जनम्। ततः विद्याध्ययनानन्तरं विवाहादिकं कृत्वा गृहस्थाश्रमधर्मान् पालयितुं प्रेरयतीयं स्मृतिः। तत्र मानवजीवने गार्हस्थ्यधर्मः महान् एव। मानवानां कौटुम्बिकं सामाजिकं च जीवनम् उत्तमम् विधातुं स्मृतिरियं सहायिकैव।

ततश्च अरण्ये वसन् यमादिनियमानां पालनं ततः सांसारिकदुःखात् निवृत्तिं च प्राप्तुं स्मृत्युक्ताश्रमधर्मानुष्ठानेन शक्यत एव। चतुर्थे संन्यासाश्रमे सांसारिकविषयान् परित्यज्य आत्मपरमात्मविषयकं चिन्तनं क्रियते। इत्थम् आश्रमव्यवस्थापालने सामाजिकानां प्रेरिका उपकारिका वेयं स्मृतिः।

**सामूहिकमण्डले प्रभावः।**

स्मृत्याम् अस्यां प्रतिपादिताः धर्माः एव सामाजिकमण्डले सदस्यानां कर्तव्याकर्तव्यानां हेयोपादेयानां च मानदण्डतां प्राप्नुवन्ति। वर्णाश्रमव्यवस्थायाः सामूहिकी प्रसक्तिः वर्तत एव। समाजस्य व्यवस्थां सम्यक् चालयितुमेव मनुना अयं वर्णविभागः कृतः आसीत्। तत्र अध्ययनाध्यापनादिकं ब्राह्मणानां कर्तव्यम्। देशस्य समाजस्य च रक्षणं क्षत्रियाणाम्। गोरक्षा वाणिज्यं च वेश्यानाम्। एवं वर्णत्रयाणां जनानां सेवाकार्यम् शारीरिकञ्च कार्यं शूद्रवर्णानां प्रधानं कृत्यम् इति विभज्य कार्यानुसारम् सामूहिकमण्डले जनान् स्वीयं कर्तव्यम् अनुष्ठातुं स्मृतिः इयं बोधति।

इत्थं नानाजातीयानां जनानां श्रेयः सुखञ्च प्रदातुं स्मृतिरियम् सक्षमैव। सामूहिकजीवनस्य समस्ताः मेखलाः स्पृशन्ती इयं सामूहिकभद्रतायै व्यक्तिजीवने अनुष्ठेयानां कार्याणां च पालनाय प्रेरयति। इत्थम् इयं स्मृतिः व्यक्तेः परिवारस्य समूहस्य च स्थितिं सुदृढां करोति।

**व्यक्तित्वविकासे सहायिका।**

धार्मिकभावनया जनाः अहिंसा सत्यम् अक्रोधः क्षमा इन्द्रियनिग्रहः इत्येवं गुणान् जीवने पालयन्तः कामक्रोधलोभादिकैः विनिर्मुक्ताः सन्तः व्यक्तित्व-विकासं प्राप्नुवन्ति। इत्थं व्यक्तीनां व्यवहारे नियन्तारः सन् एते धर्माः सामाजिकीम् व्यवस्थां पालयन्तः वैयक्तिकं सामूहिकं च जीवनं भद्रं कुर्वन्ति।

**आत्मनियन्त्रणे प्रभावः।**

धर्मः व्यक्तीनां व्यवहाराणां नियन्त्रणे महत् स्थानमावहति। किं कार्यम् किमकार्यम् इति विषमे समुपस्थिते यथा न्यायालयेन औपचारिकतया नियमः क्रियते तद्वत् नैसर्गिकम् आत्मनियन्त्रणकार्यं प्रत्येकं व्यक्तौ धर्मः एवं करोति। इत्थम् आत्मनियन्त्रणे प्रेरिका सतीयं स्मृतिः न्यायालयेष्वपि प्रामाणिकत्वेन गृह्यत इत्यतः सामाजिकजीवने अस्याः प्रभावः वर्तते एव।

जिज्ञासूनाम् अनेके अमूल्याः आशयाः सन्ति अस्यां स्मृतौ। लौकिकोत्कर्षाय अनुष्ठेयानां कार्याणाम् उपदेशं यच्छति इयं स्मृतिः। द्वादशोऽध्यायस्तु आत्मसाक्षात्काराय मोक्षप्राप्तये च उपाधीः शास्ति । इत्थं लौकिक-जीवनानुभवानां समुदायाचाराणाम् च पाठाः अस्याः प्राप्य जनाः ममेदमिति परिग्रहत्यागेन परां गतिं प्राप्नुयुः।

अद्यापि भारतीयसमाजे अस्याः स्मृतेः सामूहिकी प्रसक्तिः अस्त्येव। अस्याम् आधिदैविकाधिभौतिकाध्यात्मिकविषयाः विहिताः। एवं सामाजिकानाम् अस्याः उपरि प्रभावः अस्त्येव।

मनुस्मृतौ कालातीताः आशयाः दृश्यन्ते। मानवचिन्तायाः कालानुक्रमविकासपरिणामस्तरेषु त्याज्यग्राह्यबुद्ध्या अध्ययनाय स्मृतीयम् उपकरोति। आधुनिकनियमसंस्थानां न्यायालयानां च उत्पत्तेः प्राक्

नीतिन्यायव्यवस्थायाः आधारग्रन्थः मनुस्मृतिः याज्ञवल्क्यस्मृतिश्च आसीत्। अद्यापि हैन्दवव्यक्तिनियमानां व्याख्यानवेलायां नियमज्ञाः मनुस्मृतिम् आधारीकुर्वन्ति। मनुस्मृतौ मनुष्यस्य स्वस्य परस्य च कर्तव्यविषये विविधाः विधिसंहिताः अपि समाविष्टाः सन्ति। अस्मिन् ग्रन्थे व्यक्तिगतव्यवहाराः विस्तृताः सन्ति इत्यतः परं मनुस्मृतिः दैनन्दिनजीवने व्यापिका इत्यत्र नास्ति सन्देहः।

**आधारग्रन्थसूची**

1 मनुस्मृतिः मेधातिथि भाष्यसमेता सम्पा- गङ्गानाथ झा परिमल पब्लि-केशन्स, दिल्ली 2004

2 मनुस्मृति Universal Publications Thiruvanantapuram 2011

3 भारतीयसंस्कृतिसोपानम्– आचार्य शिवप्रसाद द्विवेदी– चौखम्बा सुर-भारती, प्रकाशन वाराणसी

4 Manusmriti, The Oxford International Encyclopedia of Legal History (2009), Oxford University Press

5 The idea of Hindu Law, P Bilimoria, Journal of the Oriental Society of Australia (Volume43) 2011

*********

संस्कृतविमर्शः

(July-December 2023) अङ्क-२५

ISSN: 0975-1769 UGC CARE ID:101000019

# नृत्ये आध्यात्मिकतायाः स्थानम् एकं समीक्षणम्

**शङ्कर च्याटार्जि**

सहयोगाध्यापकः

ए.वि.एन.शिल. कलेज

**अमलकुमारकरः**

सहाध्यापकः

आलिपुरदुयार महिला महाविद्यालयः

(Sub ID: CSU/SV-003)

**शोधसारः** – *नृत्यगीतवाद्यादीनां तौर्यत्रिकाणामादिगुरुर्महादेवः पार्वतीपतिः। तस्य ढक्कानादादुद्भूतं छन्दसः अनुरणनम्। तौर्यत्रिकेषु नृत्यस्य क्रमविकाशः प्राग्वैदिका-द्वैदिकयुगे, वैदिकाद्वैदिकोत्तरयुगे, मध्ययुगे आधुनिकयुगे च न्यूनातिरिक्ततया संजात एव। नृत्ये व्यवहृतानां वाद्ययन्त्राणां ध्वनिषु तादृशी काचिच्छक्तिर्विद्यते या सारल्येन हृदयम् आकर्षति। स्वानुभवाय माध्यममिदं सुरच्छन्दः। अत एव तेन सह आध्यात्मिकतायाः योगसूत्रं वर्तत एवेति वक्तुं शक्यते। भारतीयदर्शनं हि आध्यात्मिकता-वादस्य दर्शनम्। अस्मिन् लेखे आध्यात्मिकताया विषयः व्याख्यातः। भोगवासनां परित्यज्य आत्मिकसुखस्य आध्यात्मिकसुखस्य वोपलब्धिः, चैतन्यस्य महत्त्वं च इति आध्यात्मिकताया अन्यतमोऽर्थः। यथा वैष्णवादर्शीनां कीर्तननृत्यं, यद्धि कृष्णोप-लब्धये साहाय्यं विदधाति। इत्थं नैकानि नृत्यानि सन्ति, यानि मूलादेव मुक्तिलाभाय सहकुर्वन्ति।*

**कूटशब्दाः** – नृत्यम्, धर्मः, आध्यात्मिकता, चेतना, मुक्तिः।

गुरुपरम्परायां प्राप्ता शिक्षा भवति नृत्यम् इति। अस्यादिगुरुर्भवति नटराज एव। प्रलयकर्तुः ताण्डवनृत्यादेव प्रकृतनृत्यस्य सूचना। भारतीय-सङ्गीतशास्त्रकाराः, भारतीयनृत्यस्य स्रष्टा शिव एवेति उद्घोषितवन्तः। यथोक्तं नाट्यशास्त्रे –

**आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम्।**
**आहार्यं चन्द्रतारादि तं नुमः सात्त्विकं शिवम्॥**[1]

अर्थात्, निखिलभुवनं यस्य आङ्गिकाभिनयस्य फलस्वरूपं, विश्वस्य समग्रध्वनिशब्दाः यस्य अभिनयादुद्भूताः, चन्द्रतारकादीनि ज्योतिर्मण्डलानि यस्य आभरणस्वरूपाणि, महान् शक्तिमान् असौ प्रकाशमानः, पञ्चभूते विराजितः, देवादिदेवः नटराज एव। सृष्टि-स्थिति-संहार-तिरोभाव-अनुग्रहाख्यासु पञ्च क्रियासु स्वं प्रकाशयति नटराजः। तस्माद्धारीतयनृत्यस्य उद्भवेन विकासेन च सह आध्यात्मिकता अङ्गाङ्गीसम्बन्धेन सम्बद्धः। शिल्पी स्वशिल्पेनैव देवतां पूजयति। अतः उभयोः संयोगः अन्योन्य एव।

नृत्ये स्वर-ध्वनि-वर्णानां समाहार एव शब्दः। अयं शब्द एव ब्रह्मेति। ब्रह्मज्ञानाय तत्स्वरूपं ज्ञातव्यम् अनुभवनीयं च, यस्य अन्यतमं माध्यमं भवतीदं नृत्यमिति। नृत्ये तालस्य भूमिका अपरिहार्या। **तल प्रतिष्ठायाम्** इति चौरादिकधातोः **घञ्प्रत्ययेन** निष्पन्नः तालशब्दः। अतः नृत्य-गीत-वाद्यादीनां प्रतिष्ठाता एव तालः इति –

**तकारः शङ्करः प्रोक्त लकार शक्तिरुच्यते।**
**शिवशक्तिसमायोगात्ताल नामाभिधीयते॥**[2]

अत्र **तकारेण** शङ्करः, **लकारेण** शक्तिः च उल्लिखिता। अतः हरगौर्य्योः **ताण्डवलास्ययोर्नृत्ययोः** आदिममक्षरद्वयं स्वीकृत्य तालस्य सृष्टिः।

प्राचीनभारते देवदास्याः उल्लेखः प्राप्यते। एता हि सम्पूर्णं जीवनं देवतानां पादकमलयोः चिरकालस्य कृते समर्पयन्ति। विभिन्नमन्दिरे मन्दिरसम्पृक्तनाटमन्दिरे च ता नृत्यन्ति स्म।

प्राचीनर्ग्वैदिकयुगे देवताः नृत्यशिल्पिनः इति चित्रिताः। यद्यपि मानवस्य कृते तदात्मविनोदनं, किन्तु धर्मीयदृष्ट्यां नृत्यमिदं भगवति आत्मनिवेदनम्। ऋग्वेदीययुगेऽस्मिन् विभिन्नप्रकारकधर्मीयाचारानुष्ठानावसरे प्रबलदैहिकाङ्गभङ्ग्या निवेदनं परिलक्षणीयम्। नृत्यविषये यानि वैशिष्ट्यान्यवेक्ष-

---

[1] नाट्यशास्त्रम्

[2] सङ्गीतशास्त्रम्

णीयानि – पौराणिकदेवताः नृत्यशिल्पिनः आसन्, समाजे नृत्यशिल्पिनां स्थानं या हि भगवति निवेदिताः, आङ्गिकाभिनयस्य सूत्रारम्भः इति त्रीणि। नृत्यप्रसङ्गः ऋक्संहितायां परिलक्ष्यते –

**मर्तश्चिद्धो नृत्य मोरुक्म वक्षसः,**
**नृत्यमानोनृत्यन्न मर्तोसरणधर्मा स्वत्वं** वसमानः चेति।[3]

सामगानेऽपि नृत्यप्रसङ्गः परिलक्षितः। गीतं व्यतिरिच्य नृत्यानुशीलनं पृथक्तया अभवत्। अत्र नृत्यं द्विधा विभक्तं – मार्गी देशी च, या हि नृत्यं नृत्तम् इति यथाक्रमेण आख्यातम्। अश्वमेधयज्ञः कश्चन प्रख्यातयज्ञः, यत्र विविधाचारानुष्ठानानि नृत्यस्य स्वरूपं सुन्दरं कुर्वन्ति। यथा अश्वस्य प्रत्यागमने सति वरणकाले योऽङ्गविक्षेपः क्रियते, तद्वरणनृत्यनाम्नाभिहितम्। एवञ्च अथर्ववेदे वीणासहितनृत्यस्योल्लेखो विद्यते–

**को बाणं को नृत्यो दधौ**[4]

अत्र स्तव-स्तुति-गाथा-गानैः सह नृत्यमपरिहार्यम्। इतोऽपि वेदे मण्डलनृत्यमुल्लिखितम्। कृष्णयजुर्वेदे **इराति**शब्दः आवृत्तिसहितनृत्यार्थे व्यवहृतः।

ततः वैदिकयुगस्य परवर्तिनि काले महाकाव्यकाले च वाल्मीकिमुनेः तत्त्वावधानेन राजसभायां नृत्यगीतादिभिः रामस्य स्वागतं विहितं लवकुशाभ्याम्। महाभारतीयः अर्जुनः नृत्यकलापारदर्शी उत्तराया नृत्यगुरुरूपेण नियुक्तश्च। कामसूत्रे ६४ कलासु नृत्यमन्तर्भावितवान् वात्सायनः। वराहपुराणे देवोद्देश्यनृत्यस्य विधिः उल्लिखितः। पद्मपुराणे कृष्णभक्तस्य नृत्यशक्तिः वर्णिता। भागवतपुराणे श्रीकृष्णगोप्योः रासनृत्यं, कालीयदमननृत्यं, बालगोपालस्य क्षीरनिधिचौर्यनृत्यम् इत्यादि। अतः नृत्यस्य प्राचीनत्वम् आध्यात्मिकतायाः वर्तमानं फलमेव।

---

[3] ऋक्संहिता

[4] अथर्ववेदः – १०।२।२७

➢ **विविधानामुत्सवानां नृत्यानां परिचयः –**

न ह्यन्त उत्सवानाम्। तत्र केचन उत्सवाः नृत्येन पाल्यन्ते। स्वं समर्पयन्ति अनेन नृत्योत्सवेन। उल्लेख्यं यत् कानिचन नृत्यानि भवन्ति यानि अव्यवहितरूपेणाध्यात्मिकतया सह युक्तानि, पुनश्च कानिचन भवन्ति येषां परिवेशनाय आध्यात्मिकतायाः विषयः प्रकाशनीय भवति। विविधप्रकार-कोत्सवनृत्यानि यथा–

**मारिया-मुरिया** – नृत्यमिदं मध्यप्रदेशीयानाम् आदिवासिनाम्। इष्टदेवतायाः सन्तुष्ट्यर्थं सायंकालादारभ्य समग्ररात्रिपर्यन्तं भवतीदं नृत्यम्। नृत्यमिदं संयुक्तं वर्तते।

**वादना** – पर्वतक्रोडे इयमपि आदिवासिनामुपस्थापना। अष्टमप्रहरमूलकं दलगतं कृष्णकीर्तनमिदम्। चमकालोके चन्द्रालोके वा सतालं नृत्येनानेन सर्वं समर्पयन्ति।

**नवराणी** – नृत्येनानेन मध्यप्रदेशीया जनाः पूर्णिमायां शक्तिदेवीं दण्डेश्वरीदेवीं च आराधयन्ति।

**काकसारः** – वर्णाढ्यकृष्युत्सवकाले इदं नृत्यं क्रियते। भगवतः आशीर्वाद-प्राप्तये युवकाः युवतयश्च दलगतभावेन नृत्यन्ति।

**करमा** – वर्षाकाले नवान्ने भीमसेनदेवतां पूजयित्वा आरात्रं करमानृत्यं कुर्वन्ति।

**मणिपुरी** – भारस्य पूर्वप्रान्ते नृत्यमिदं वैष्णवधर्मस्योपरि प्रतिष्ठितम्। अत्र शिल्पिनः साधनभक्तिमार्गरूपेण धर्माङ्गरूपेण च नृत्यम् अङ्गीकुर्वन्ति। आधिक्येन मानवाः वैष्णवाः, तेषाम् आराध्यः देवः श्रीकृष्णश्च।

**कथ्थकः** – उत्तरभारतस्य अतीव जनप्रियं नृत्यमिदम्। नृत्येऽस्मिन् वैष्णव-धर्मस्य प्रभावः परिलक्षितः। राधाकृष्णयोः प्रेमलीला, मीराबाई, तुलसीदासः, सुरदासस्य भक्तिगीतिः इत्यादीनां प्रभावोऽपि दरीदृश्यते।

**रासलीला** – उत्तरप्रदेशीयं नृत्यमिदं कृष्णमूलकम्।

**बाउलनृत्यम्** – अविभक्तबङ्गस्य प्रचलितं नृत्यमिदम्। आनन्दलहरी, एकतारा, करतालः डुबकि इत्यादिभिः जातिधर्मविमुक्तानां भावप्रवीणानां मनुष्याणां साधनागाथां प्रस्फुटयति इदं नृत्यम्।

**जारीनृत्यम्** – उभयोर्बङ्गयोः इस्लामिकनृत्यमिदम्। धौतवस्त्रं लुङ्गिवस्त्रं वा कुर्तावस्त्रं च परिधाय, पादयोः घण्टावाद्यं बद्धा, हस्तयोः रक्तिमकरवस्त्रं धृत्वा च महरमनामकोत्सवे स्वाराध्यं प्रति निवेदनमूलकमिदं नृत्यम्।

**धामाइल्** – त्रिपुरायाः किञ्चिद्विशिष्टं नृत्यमिदम्। यद्धि कृष्णस्य लौकिकप्रेम-कथाया विषयवस्तु प्रकटयति।

**झुमुरनृत्यम्** – जातीयसंहतेः प्रतीकम् इदं नृत्यम्।

उत्तरबङ्गस्य कानिचन नृत्यानि सन्ति यानि सर्वविश्रुतानि। यथा– चाइबाडिनृत्यम्, डोमफुनृत्यम्, राभानृत्यम्, व्रेसारपिदाननृत्यमिदं हि स्वागतमूलकं वर्तते। प्रकृतिदेवीमाधारीकृत्य जलपाइगुडिमण्डलस्यादिवासीनां मेचनृत्यं सुप्रसिद्धम्, इतोऽपि बागरुमवानृत्यमपि वसन्तोत्सवे पाल्यते। ते स्वकीयस्य शरीरस्य मनसः च पवित्रतां रक्षितुं कुर्वन्ति। इतोऽपि किञ्चन महत्त्वपूर्णं नृत्यं विद्यते, यद्धि राजवंशीनृत्यम् इति। यतो हि उत्तरबङ्गीयाः तिस्तानदीमाश्रित्य जीवन्ति, तस्मात्ते तिस्तानदीं देवीं मत्त्वा पूजयन्ति, आशीर्वादप्रार्थनाय च नृत्यमिदं कुर्वन्ति। एतस्य कृते मनोमुग्धकारकम् अतिपवित्रं च किञ्चिद्वाद्ययन्त्रं विद्यते। यथा – ढोलः, करतालः, काँसरः, मुखवंशी इत्यादीनि। एतद्व्यतिरिच्य दुकपानृत्यं, जितियावन्दनं, गावरुदेवनृत्यम् इत्यादीनि उत्सवनृत्यानि प्रसिद्धानि।

- **नृत्ये व्यवहृतानि विभिन्नप्रकारकवाद्ययन्त्राणि** –

नृत्येन सह गीतस्य कश्चन संयोगो वर्तते। गाने यानि यन्त्राणि व्यवह्रियन्ते तानि नृत्यस्य कृतेऽपि व्यवह्रियन्ते। एतस्य स्रष्टा स एव ईशः महादेवः स्वढक्कानादेन आदिमसुरच्छन्दांसि दोलयाञ्चक्रे –

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।**
**उद्धर्तकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥**[5]

अर्थात् आदिगुरोः ढक्कायाः एव शिवसूत्रजालं माहेश्वरसूत्रं च आविष्कृतम्। एवञ्च नृत्ये व्यवहृतेषु सर्वेषु वाद्ययन्त्रेषु तन्निर्गतासु ध्वनिसु च आध्यात्मिकतायाः विषयः प्रतिफलितो भवति। वादकः वाद्यशब्देनैवानन्द-मनुभवति, सुरेषु स्वं प्राप्नोति, सर्वेषां श्रोतृणां हृदये जीवति च। तथैव मुक्तये वितनोति। तादृशानि वाद्ययन्त्राणि हि –

**वंशी** – पुराणख्यातः वंशी भगवतः श्रीकृष्णस्य हस्ते परिलक्ष्यते। वंशीसुरेण समस्तं गोकुलं धाम च मुखरितमभवत्। तस्य लीलास्वरूपेण गोप्यः मोहिता आसन्। सप्तच्छिद्रविशिष्टवंशीवाद्येऽस्मिन् फूत्कारेण रागिणी आविष्क्रियते। कदाचित् स्टिल-ताम्र-कांस्य-स्वर्ण-रौप्य-वंशैः च निर्मितः दैर्घ्यैकपरिमितः, यतः द्वादशस्वराः निर्गच्छन्ति। येषु सप्तस्वराः अविकृताः, पञ्च विकृताश्च। सरल-टिपराइ-सानाइ-भिन-मोहनभेदात् पञ्च वंशी विश्वप्रसिद्धः।

**ढाक-ढोलौ** – लोकनृत्ये व्यवहृतं यन्त्रमिदम्। ढोलस्य पार्श्वद्वयं चर्मनिर्मितम्। यद्यपि चर्म अपवित्रमिति मन्यते, तथापि कस्मिन्नपि माङ्गलिकानुष्ठाने यथा दुर्गापूजाकाले कालिपूजावसरे वा महरमे चेत्यादिषु उत्सवेषु वाद्ययन्त्रमिदं व्यवह्रियते। माङ्गलिकानुष्ठानेषु व्यवहृतेषु वाद्येषु इदं वाद्यमन्यतमं, यतो हि अतीवसारल्येनास्य तालः सर्वेषां मनः आकर्षति। डमडमशब्दैः वादकः श्रोता च उभावपि अन्यस्मिन् जगति विराजेते।

**एकतारा दोतारा च** – तन्त्रैकविशिष्टं वाद्यम् एकतारा इति, तन्त्रद्वयविशिष्टं वाद्यं दोतारा इति चोच्यते। देशीयसंस्कृतेः ऐतिह्यस्वरूपमिदम्। अस्य यन्त्रस्य सुरे प्रकृतेः आस्वादो जायते। मृदः घ्राणमनुभूयते। अस्य व्यवहर्तारः सन्न्यासिनः साधवो वा एकवर्णविशिष्टवस्त्रं परिधाय सुरेण मुक्तिपथम् अन्विषन्ति। कूष्माण्डेन नारिकेलफलेन वा निर्मितस्यास्य सुरः समग्रं भुवनमान्दोलयति। इतोऽपि गुबगुबिः, खमकः, आनन्दलहरी इत्यादिप्रकारकं भवति।

---

[5] वरदराजकृतलघुसिद्धान्तकौमुद्याः भूमिका

**काँसरः** – झाँझः काँसरो वा एकं वाद्ययन्त्रं, यद्धि दैनन्दिनपूजार्चनासु माङ्गलिकानुष्ठानेषु व्यवह्रियते। अस्य ध्वनौ कश्चन आध्यात्मिकसुरः अस्ति।

**वीणा** – वाद्ययन्त्रस्यास्य उल्लेखः न केवलमुपनिषदि, अपि तु महाभारतेऽपि दरीदृश्यते।[6] भरतः नाट्यशास्त्रे सङ्गीत-अभिनयकलाप्रसङ्गेषु वीणाया व्यवहारमुदाजहार। ऐतरेयारण्यके शाङ्खायनारण्यके च नारदर्षिः वीणावादकरूपेण उद्घोषितः।[7] प्रायः त्रि-चतुर्दैर्घ्यविशिष्टे यन्त्रेऽस्मिन् तन्त्रचतुष्टयं विद्यते, सहायकद्रोनत्रयं वर्तते च, यैः सुमधुरध्वनिर्निर्गच्छति।

**हारमोनियम्** – सङ्गीतशास्त्रे वाद्ययन्त्रस्यास्य महत्त्वमपरिहार्यम्। विशेषतः कीर्तनगाने सुरसाधने उत्तमतां भजते। श्वेत-कृष्णवर्णीययवनिकयोः वर्णमयसुरकुहकेन श्रोतुः मनः आकर्षति। आरोहावरोहाभ्यां यः सुरः कर्णपथमायाति, तेन अतिसारल्येनैव आनन्दः जायते। एतद्व्यतिरिच्य तवलाबाँये, सेतारः, खोलः, पाखोयाजः, मन्दिरा, वेहाला, तानपुरा, खञ्जरी, नागेश्वरम्, पुङ्गी, मृदङ्गम्, घण्टा, गङ् इत्यादीनि हृदयग्राहिणि वाद्ययन्त्राणि न केवलं शास्त्रीय-सङ्गीते अपरिहार्याणि, अपि तु सम्प्रति सर्वप्रकारकसङ्गीतविषये अपरिहार्याणि एव।

➢ **नृत्ये व्यवहृतमुद्रासु आध्यात्मिकता –**

भरतकृतनाट्यशास्त्रे त्रयोदश संयुक्ताः चतुर्दश असंयुक्ताः च मुद्राः प्राप्यन्ते–

**संयुक्तमुद्रा –**

**अञ्जलिश्च कपोताश्च कर्कटः स्वस्तिकस्तथा।**
**कटकार्ध्वमानश्च ह्युत्सङ्गो निषधस्तथा।**
**दोलः पुष्पपुटश्चैव तथा मकर एव च।**
**गजदन्तोऽवहित्थश्च वर्धमानस्तथैव च॥**
**एते तु संयुक्तहस्ता मया प्रोक्तास्त्रयोदश॥**[8]

अत्र प्रत्येकं मुद्रायाः अर्थे व्यवहारे च आध्यात्मिकता वर्तते। साधारणतः देवतानां गुरुजनानां च अभिवादने अञ्जलिमुद्रा व्यवह्रियते,

---

[6] अक्स्फोर्डडिक्शनारि – पृ.सं. १००५

[7] ऐतरेयः – ३।२।५, शांखायनः – ८।९

[8] नाट्यशास्त्रम् – ९।८

शपथग्रहणे विनयप्रदर्शने गुरुसम्भाषणे च कपोतमुद्रा, अङ्गमोटने जनसमागमे च कर्कटमुद्रा, आकाश-मेघ-दिगित्यादिबोधनाय स्वस्तिकमुद्रा, राज्याभिषेक-पूजा-ताम्बूलादिग्रहणेषु कटाकाबर्द्धनमुद्रा, आलिङ्गन-लज्जा-शिशु-शिक्षादिबोधनाय उत्सङ्गमुद्रा, ग्रहणे संग्रहे धारणे गर्वे च निषधमुद्रा, विषादे आवेगे मुर्च्छादिषु च दोलहस्तमुद्रा, जल-भोज्यग्रहणेषु पुष्पपुट-मुद्रा, व्याघ्रसिंहादिजन्तुबोधनाय मकरमुद्रा, वरयात्रायां बधूग्रहणे स्तम्भग्रहणे च गजदन्तमुद्रा, निःश्वासे गात्रदर्शने उत्कण्ठाप्रकाशे च अवहित्थमुद्रा, हस्त-यवनिका-वातायनाद्युन्मोचने वर्धमानहस्तमुद्रा च व्यवह्रियते।

इतोऽपि अभिनयदर्पणानुसारेण शिवलिङ्गमुद्रा शिवलिङ्गं बोधयितुं, मत्स्य-कूर्म-वराह-गरुडादिमुद्राचतुष्टयं विष्णोः अवतारसमूहान् दर्शयितुं, शङ्खमुद्रा शङ्खं, चक्रमुद्रा चक्रं च बोधयितुं व्यवह्रियते।

**असंयुक्तमुद्रा** –

**पताकस्त्रिपताकाश्च तथा वै कर्त्तरीमुखः।**
**अर्द्धचन्द्रो ह्यरालश्च शुकतुण्डस्तथैव च॥**

**मुष्टिश्च शिखराख्यश्च कपित्थश्च खटकामुखः।**
**सूच्यास्यः पद्मकोशः सर्पशिरा मृगशीर्षकः॥**

**काङ्गलकोहलपद्मश्च चतुरो भ्रमरस्तथा।**
**हंसास्य हंसपक्षकश्च सन्दंशो मुकुलस्तथा॥**

**ऊर्णाभस्ताम्रचूडश्चतुर्विंशतीरीरिताः॥**[९]

साधारणतः आशीर्वाद-शपथ-मास-वर्षादिषु पताकामुद्रा, मुकुट-प्रदीप-बाण-अग्निशिखादिषु त्रिपताकामुद्रा, विच्छेद-विपर्यस्तादिषु कर्त्तरी-मुखमुद्रा, कृष्णाष्टमीतिथेः चन्द्रे ध्याने भावनायां नमस्कारादिषु च अर्द्धचन्द्र-मुद्रा, विषपाने अमृतपाने वा झञ्झावाते च अरालमुद्रा, बाणप्रयोगादिषु शुकतुण्डमुद्रा, दृढतायां स्थैर्ये मुष्ठिमुद्रा, कामभावे शिवलिङ्ग-मदनदेव-धनादिषु च शिखरमुद्रा, लक्ष्मी-सरस्वती-आरत्यादिषु च कपित्थमुद्रा, कुसुमचयने मालाधारणे वचनादिषु च खटकामुखमुद्रा, परमब्रह्मभावनायां

[९] नाट्यशास्त्रम् – ९।८

सूचीमुखमुद्रा, फलमूलादिग्रहणे पद्मकोषमुद्रा, चन्दनबोधनाय सर्पदेवाय जलप्रदानाय सर्पशीर्षमुद्रा, स्त्रीलोकललाटे तिलकदर्शनाय मृगमुखे च मृगशीर्षमुद्रा, लकुचफले नारिकेलफले चातके घण्टायां च काङ्गलमुद्रा, प्रस्फुटितपद्मे पूर्णचन्द्रे दर्पणे शकटादिषु च अलपद्ममुद्रा, विभिन्नधातुषु घृततैलयोः जातौ च चतुरमुद्रा, भ्रमरे शुके सारसे कोकिलादिषु च भ्रमर-मुद्रा, मङ्गलसूचके हंसास्यमुद्रा, षट्संख्यकाचमने चन्दनलेपनादिषु च हंस-पक्षकमुद्रा, उदरबलिदानादिषु च सन्दंशमुद्रा, कुमुदे जलपद्मे कदलीपुष्पे पञ्चशरभोजने मुकुलमुद्रा, मर्कटादिविविधकीटपतङ्गे ऊर्णनामुद्रा, कुक्कुट-बक-काक-गोवत्सादिषु ताम्रचूडमुद्रा च व्यवह्रियते।

➢ **रसभावयोः आध्यात्मिकता –**

नाट्यशास्त्रमतानुसारं नृत्ये नव रसाः वर्तन्ते, तेषां यथा वर्णा विद्यन्ते तथैव अधि-देवता अपि प्रसिद्धाः। यथा शृङ्गाररसस्य अधिदेवता विष्णुः, हास्यस्य प्रमथः, करुणस्य यमः, वीरस्य महेन्द्रः, भयानकस्य कालः, रौद्रस्य यमः, बीभत्सस्य महाकालः, अद्भुतस्य ब्रह्मा शान्तस्य नारायणः च।

चित्तवृत्तेर्बहिःप्रकाशो भावः। आङ्गिक-वाचिक-अभिनय-अङ्गविक्षेपैः नृत्यस्य भावः प्रकाश्यते। तौर्यत्रिकाणां प्राणस्वरूपः भावः। न हि भावं विना रसः अस्ति, रसं विहाय भावो वा। रसभावयोः कार्यकारणभावः, भावो हि कारणं, तस्य परिणामः कार्यं वा रसः इति। नाट्यशास्त्रे अष्टौ स्थायिभावाः सन्ति। यथा – रति- क्रोध- भय- विस्मय- उत्साह- शोक- हास- जुगुप्सा चेति। अतः मनुष्यजीवने ये रिपवः सन्ति, नृत्येन अतिसारल्येन तेषां पराजयः शक्यः।

इतोऽपि एकः भावो विद्यते निर्वेदो वैराग्यो वा। तच्छब्दे एव आध्यात्मिकता विराजते, अर्थेऽपि। स्थायिभावस्य विभावानुभावसात्त्विक-भेदात् त्रयो भेदा विद्यन्ते। लौकिकजगतः या रतिः भावादीनामुद्बोधिका कारणं हेतुर्वा, सैव काव्ये नाट्यजगति च विभावः। या हि आलम्बन-उद्दीप-नाभ्यां प्रकाशिता। अनुभावः अन्यो विषयः। यैः लक्षणैः भावः प्रकाशते, सो हि अनुभावः। सात्त्विकभावः अनुभावान्तर्गतः। किन्तु सात्त्विकभावेन मनुष्यः इह लोकं विस्मृत्य गभीरम् अन्यजगत् प्राप्नोति। असूया-मद-श्रम-शङ्का-

आलस्यादिव्यभिचारिभावा अपि सन्ति, येषामभ्यासगतपरिवर्तनाय नृत्यस्य महती भूमिका विद्यते।

➢ **विविधनर्तकनर्तकीनाम् आध्यात्मिकतालाभः –**

नृत्येन आध्यात्मिकतां प्राप्तवन्तः ये प्रसिद्धाः शिल्पिनः नृत्यविदश्च, ते हि वर्तमाने सर्वेषां शिल्पिनां कृते अनुप्रेरका एव भवन्ति। ऐदम्प्राथम्येन ठाकुरप्रसादः स्मरणीयः, यो हि परमकृष्णभक्तः। तेन निवेदितं **गणेशपरण**नृत्यं सुविख्यातं, यद्दृष्ट्वा दर्शकाः स्तम्भिताः संजाताः। विन्दादीनमहाराजोऽपि श्रीकृष्णस्य परमभक्त आसीत्। अतः कृष्णभजनं गीतं च विरचयामास। बहूनां गुरुः असौ स्वयम् अपुत्रकः, किन्तु भ्रातुष्पुत्रेभ्यः नृत्यशिक्षां प्रादात्। श्रूयतेतरां यत् सः भगवतः आदेशेनैव नृत्यचर्चामकरोत्।

पण्डितः उदयशङ्करः यथा विनयी सरलश्च आसीत् तथैव यशसः सम्मानस्य च अधिकारी। अच्छानमहाराजस्य विख्यातनृत्यं क्षीरनिधिचौर्यं, कालीयदमनं, वस्त्रहरणं, गागरीभरणम् इत्यादिनृत्यानि सुप्रसिद्धानि। तस्य तिस्रः कन्याः, एकः सुपुत्रः बिर्जुमहाराजश्च अद्यत्वे भारतविख्यातः। श्री-सुन्दरप्रसादमहाभागः कृतित्वेन सह असंख्येभ्यः शिष्येभ्यः शिक्षां ददौ। कालकामहाराजः तद्भ्राता विन्दादीनमहाराजश्च **कालकाविन्दादीन**नाम्ना भारते नृत्यं प्रदर्शयन् विख्यातः बभूव।

**उपसंहारः -**

इतोऽपि शम्भुमहाराजः नृत्याय **पद्मश्री** इत्युपाधिं प्राप। नारा-यणप्रसादः **नृत्याचार्य** इत्युपाधिं प्राप्तवान्। नृत्ये अविस्मरणीयम् अवदानं स्थापितवन्तः श्रीबिर्जुमहाराजः, जयलालः, श्रीगोपीकिषाणः, पुरणलालः, सीतारदेवी, श्रीमणिवर्धनः, श्रीमणिशङ्करचक्रवर्ती, श्रीबिहारीलालः, श्रील-च्छुमहाराजः, रोशनकुमारी, दमयन्तीजोशी, नवाव-ओयाजेद-आलिशाहः इत्यादयः प्रख्याताः पण्डिताः अद्यावधि उत्तराद्दक्षिणपर्यन्तं पूर्वात्पश्चिमपर्यन्तं च सर्वोच्चशिखरे मनुष्याणां हृदये च राराज्यन्ते।

**परिशीलितग्रन्थसूची–**

१. भट्टाचार्यः समरेन्द्रः, भारतीयदर्शनम्, बुक् सिण्डिकेट् प्राइभेट् लिमिटेड, कलकाता, १९९६

२. मुखोपाध्यायः महुया, गौडीयनृत्यम्, दि एशियाटिक् सोसाइटि, कलकाता, २०००

३. घोषः शम्भुनाथः, कत्थक नृत्येर रूपरेखा, आदिनाथब्रादार्स, कलकाता, १९७९

४. चक्रवर्ती मन्दिरा, फिरङ्गी, दमदम सङ्गीतम्, कलकाता, २००४

५. अधिकारी अनुपशंकराः, नृत्यवितान, आदिनाथब्रादार्स, कलकाता, १९७३

६. वन्द्योपाध्यायः सुरेशचन्द्रः चक्रवर्ती छन्दा च, भरत नाट्यशास्त्र, नवपत्रप्रकाशनम्, कलकाता, १९८०

*********

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५
ISSN: 0975-1769 UGC CARE ID:101000019

# भारतीयज्ञानपरम्पराशिक्षणम्
## (विकसितभारताय संस्कृतविश्वविद्यालयः)

**प्रो. राघवेन्द्रभट्टः**
आचार्यः, साहित्यनभागः
के.सं.वि., रा.गा. परिसरः
(Sub ID: CSU/SV-049)

**शोधसारः** - *भारतीयविद्यानाम् अध्ययनस्य अध्यापनस्य च विशिष्टा काचित् परम्परा वर्तते। किन्तु अद्य भारते प्रवर्तमाना शिक्षाप्रणाली वैदेशिकशिक्षापद्धतिप्रभवा विद्यते। प्रणाल्या सह शिक्ष्यमाणा विषया अपि बहवः अभारतीयाः। तदनुरूपा औद्योगिकी क्रान्तिः। तस्मात् कारणात् भारतीयविद्यानामपि अनादरः अभवत्। अनया प्रवर्तमानया आधुनिक्या पद्धत्या भारतस्य विकासः यथापेक्ष्यं सञ्जातो वा इति बहूनां शिक्षाविदां प्रश्नः। तत्र न सञ्जातः इति प्रमाणसिद्धम् उत्तरम्। तत्तद्देशस्य प्रकृत्यनुरूपतया प्रदीयमाना शिक्षा खलु व्यष्टेः समष्टेश्च विकासहेतुर्भवति। आधुनिकपद्धतौ सत्स्वपि नैकेषु गुणेषु, भारतीयविद्यानाम् अध्ययने अध्यापने च यः प्रहारो जातः स महाहानिकारकः अभवत्। तेन कारणेन भारतस्य स्वता, भारतीयज्ञानविज्ञानयोः यथावसरं विनियोगश्च न अभवत्। तेन सम्प्रत्यपि काले विकासमार्गः दुर्बलः जायमानो लक्ष्यते। तस्य अनुसन्धानेन ज्ञायते यत् भारतस्य सर्वात्मना विकासः भारतीयविद्यानाम् अवलम्बनेन भारतीयशिक्षापद्धतेः समाश्रयेण च सम्पत्स्यते इति। एतस्मिन् पथि भारतसर्वकारः नूतनराष्ट्रियशिक्षानीतौ सूक्ष्मेक्षिकां निदधाति। भारतीयविद्यानाम् शिक्षाक्षेत्रे सर्वस्तरेषु अध्ययनाय पद्धतेरपि आश्रयणाय अन्वितिं प्रकल्प्य अवसरं ददाति। एवं स्थिते, संस्कृतशास्त्रशिक्षायाः महती भूमिका लक्ष्यप्राप्तये पदं लम्बते। तत्र संस्कृतविश्वविद्यालयाः स्थाने खलु उत्तरदायिनः। भारतस्य अपेक्षा, तदनुरूपाः संस्कृतशास्त्रकार्यक्रमाः, संस्कृतच्छात्ररुचिवर्धनम्, शिक्षार्थं भौतिकसम्पत्तीनां संयोजनं यथोद्देश्यं तदुपयोगश्च सातत्येन भवेयुः।*

**कूटशब्दाः** - संस्कृतम्, शास्त्राध्ययनम्, गुरुः, विद्यार्थी, प्राथमिकसौकर्यम्, आन्तरिकगुणाधानम्, अनुशासनम्, अध्यापकाः, परिणामः च।

भारतं विकसितस्तराभिमुखं वर्तते। तत्र संस्कृतशिक्षायाः शास्त्रशिक्षायाश्च युगानुकूलतामनुसृत्य राष्ट्रियशिक्षानीतेः समन्वयं विधाय संस्कृतविश्वविद्यालयेषु शिक्षणविधीनां संरचना क्रियान्वयश्च अपरिहार्यतया अनुष्ठेयौ वर्तेते।

भारते पारम्परिकसंस्कृतमहाविद्यालयविश्वविद्यालयेषु वेदान्तन्यायमीमांसाव्याकरणसाहित्यादिशास्त्रविषयाः पाठ्यत्वेन निर्दिष्टा वर्तन्ते। विद्वांसोऽध्यापकाः, ग्रन्थालयः, भोजनावासव्यवस्था, छात्रवृत्तिः इत्याद्याः शास्त्राध्ययनानुकूला व्यवस्थाः, विश्वविद्यालयेषु महाविद्यालयेषु च केषुचित् सन्ति। किन्त्वेतेष्वपि आनुकूल्यवत्सु अध्यापनकेन्द्रेषु शास्त्राध्ययनशीला विद्यार्थिनो वैरल्येन दृश्यन्ते। शास्त्राध्ययनाय प्रविष्टवन्तोऽपि बहवः, गच्छता कालेन तस्माद्विमुखा भवन्ति। कस्माद्धेतोः ? अत्र केचिद्ब्रूयुः शास्त्राणि दुर्बोध्यानीति, अन्ये अध्यापका न पाठयन्तीति, अपरे शैक्षिकसत्रे अध्यापनदिवसापेक्षया विरामदिवसा एव अधिका इति, इतरे च इतराणि संस्थाकार्याणि अवश्यकर्तव्यानि निरन्तराध्यापनेऽन्तरायं जनयन्तीति।

तत्र ते प्रष्टव्याः शास्त्राणि ये दुर्बोध्यानीत्याहुः, किमधीत्य युष्माभिस्तानि तथेत्युच्यन्ते ? आहोस्विदनधीत्येति। अथ नाद्यः विधिवदधीतविद्यस्य पुंसः शास्त्रं करतलामलकमिव सुवेद्यं भवति। नापि द्वितीयः अज्ञानिवचनस्य अप्रामाण्यात्। अध्यापका न पाठयन्तीति न साधु। बहवो ह्यध्यापकाः कार्यसमये अध्यापनं कुर्वन्तः, तत्परमपि गृहे पाठयन्तो दृश्यन्ते। शैक्षिकसत्रे अध्यापनदिवसापेक्षया विरामदिवसा एव अधिका इत्यपि न विचारसहम्। एकस्मिन् शैक्षिके वर्षे द्विशताद् अधिककार्यदिनानां समीक्ष्य विनियोगः कर्तुं शक्यत्वात्, तथा कुर्वतां प्रशासकप्राचार्याणां विद्यालयेषु विद्यमानत्वाच्च। इतराणि कार्याणि अध्यापने बाधां जनयन्तीति। सर्वकारस्य विश्वविद्यालयस्य वा आदेशानुसारमनुष्ठेयानि उत्सवरूपेण स्वातन्त्र्यदिवसः, संस्कृतदिवसः, हिन्दीदिवसः, कन्नडदिवसः, गणतन्त्रदिवसः इत्यादीनीत्यर्थः। एतेषामायोजनसिद्धताकार्याणि समयसाध्यानि भवन्ति। तस्माद्विघ्न इति चेन्न। वर्षे तादृशोत्सवा दशसंख्याकाः स्युः, किञ्च प्रतिवर्षमनुष्ठेयानाममीषां नाधिकसिद्धता अपेक्ष्यत इत्यपि सत्यम्। तस्माद्विघ्नबाहुल्यं न शङ्कनीयम्। न च वाग्वर्धिनीसभा, वाक्यार्थसभा, शास्त्रेषु विदुषां विशिष्टव्याख्यानानि च

असकृदनुष्ठेयानि अध्ययनसमयं कवलीकुर्वन्तीति वाच्यम्, तेषामध्ययनाङ्गत्वेनैवोपादानात् श्रद्धया तत्र उपस्थितवत्सु च्छात्रेषु शास्त्रगतिवृद्धिदर्शनाच्च।

कतिपयेऽन्यथापि प्रतिवदेयुः, अधीतशास्त्रस्य पुंसो नास्त्युद्योगावसरस्तस्मान्न शास्त्रं स पिपठिषतीति। इतरपदवीधराणामपेक्षया शास्त्र्याचार्यपदवीधराः श्रमानुगुणं प्रतिवत्सरं वृत्तिं लभमाना भूयस्या संख्यया वर्तन्त इति प्रमाणसिद्धवचनात्ते सम्बोधनीयाः। एवञ्च नानाविसंवादाः छात्राणां शास्त्राध्ययनवैमुख्यहेतुत्वेन क्रियमाणाः अज्ञानपूर्वाग्रहातिवणिग्वृत्तिस्पृहान्यतमविवशमूलका एवेति वयं मन्यामहे।

उक्तया रीत्या दृष्टकारणेऽनुपलब्धे बालकानां शास्त्राध्ययनप्रवृत्तेर्ह्रासस्य किं कारणमिति प्रकारान्तरेणैव चिन्तनीयमिति नः प्रतिभाति। अथ शास्त्राणि परम्परया ज्ञातानि अद्यापि तत्र तत्र मनीषिणो निजगेहे मनस्विनो बालानध्यापयन्त एकस्मिन् शास्त्रे द्वयोरनेकेषु वा तान् विदुषीकुर्वन्ति। तादृशविद्यामन्दिरस्य समीक्षणे कृते विद्यार्थी, अध्यापकाः, अध्यापनभूमिश्च पुनःपुनरनुसन्धानात्मना मानसं व्याप्नुवन्ति। कस्तावद्विद्यार्थी नाम? तत्र पद्यमिदं श्रूयते -

**आहूताध्यायी गुरुकर्मस्वचोद्यः पूर्वोत्थायी चरमञ्चोपशायी।**
**मृदुर्दान्तो मतिमानप्रमत्तः स्वाध्यायशीलः सिद्ध्यति ब्रह्मचारी[1]॥**

को विद्यार्थी इति प्रश्नस्योत्तरमत्रास्ति। आहूते समये गुरुमुपसृत्य पठनशीलः, गुरूक्तेषु तत्कर्तृकेषु च कार्येष्वविडम्बनकारी, गुरोरुत्थानात्पूर्वमुत्थानशीलः, पश्चाच्चोपशयनशीलः, (पूर्वोत्थायी चरमञ्चोपशायी इत्येताभ्यां अध्ययने महोत्कण्ठा भवेदिति सूच्यते) विनम्रः, तपः-क्लेशसहः, धीमान्, नित्यमध्ययनपरो विद्यार्थीति प्राज्ञैरुक्तम्। किञ्च शुश्रूषुर्विद्यामधिगच्छति। यथोक्तम् -

**यथा खनन् खनित्रेण नरो वार्युपगच्छति।**
**तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति [2]॥**

---

[1] महाभारतम् १.९१.२

[2] मनुस्मृतिः २.१९३

इत्थंभूतलक्षणा बालाः कतिपये गुरुमुपसरन्ति। अनन्यक्रियाः क्रियामात्र-निहितबुद्धयस्तेऽन्ते-वासिनः शास्त्राणि स्वाधीनीकुर्वन्ति। गुरुश्च

**शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेषवान्।**
**शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान्॥**
**आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः।**
**निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते**[3]**॥**

प्राज्ञैरुक्तः। शान्तस्य संयमिनो विवेकः जागृदवस्थः स्यात्। येनानर्थो न सम्भवेत्। दान्तस्य तपःक्लेशसहनशीलस्य लक्ष्यसिद्धिर्भवति। कुलीनता, विनयः, शुद्धवेषश्च शिष्यप्रेरकाः। आचारः प्रथमो धर्म इत्यत आचारवान् स्यात्। स्थिरः, स्थिरत्वं शिष्यशिक्षाया अपेक्षितो विशिष्टो गुणः। कायेन वाचा मनसा शुद्धः, दक्षः, धीमान्, ध्याननिष्ठः, मन्त्रतन्त्रविशारदः भवेत्। येन अध्यापनमत्युचितं प्रवर्तेत। आश्रमधर्मपरायण इत्यनेन कर्तव्ये नैर्भर्यं सूच्यते। निग्रहे अनुग्रहे च शक्तः, येनान्तेवसतां विहितकर्मणि प्रवृत्तिर्निषिद्धकर्मणो निवृत्तिश्च सुकरः। उपाध्यायस्यासावेकैकोऽपि गुणः शिष्यं संस्कारपूतम्, शास्त्रपारङ्गतम्, धीमन्तम्, विनीतम्, चरित्रवन्तम्, सत्त्वातिशयिनञ्च कर्तुं बहूपकरोति।

पुरा गुरुकुलेषु विश्वविद्यालयेषु वा समधीत्य विद्यार्थिनः शास्त्रवेत्तारोऽभूवन्निति नावेदितं विदुषाम्। तत्र व्यवस्था कीदृशी आसीत् उपाध्यायाः कीदृशाः सङ्गृह्यन्ते स्म अध्ययने रुचिः कथमुत्पाद्यन्ते स्मेत्यादिविषयाः प्राचीनग्रन्थेषु न्यरूप्यन्त। कवीश्वरो बाणभट्टः कादम्बर्यां तद्व्यवस्थां प्रत्यपी-पदत्। स ग्रन्थभागः प्रकृतमुपकरोतीति मत्वोपस्थाप्यते। उज्जयिन्या नृपः तारापीडः पुत्रं चन्द्रापीडं शिक्षयितुं व्यवस्थां पर्यकल्पयत्। तदर्थं स विद्या-मन्दिरमकारयदिति। तथा च 'तारापीडः क्रीडाव्यासङ्गविघातार्थं बहिर्नगरा-दनुसिप्रम् अर्धक्रोशमात्रायामम्, अतिमहता तुहिनगिरिशिखरमालानुकारिणा सुधाधवलितेन प्राकारमण्डलेन परिवृतेन, अनुप्राकारमहितेन महता परि-खावलयेन परिवेष्टितम्, अतिदृढकपाटसम्पुटम्, उद्घाटितैकद्वारप्रवेशम्,

---

[3] आगमरहस्यम् ४.२०-२१

एकान्तोपरचिततुरगबाह्यालीविभागम्, अधःकल्पितव्यायामशालम्, अमरागाराकारं विद्यामन्दिरमकारयत्[4]।'

एतेषां कथावाक्यानामर्थविवरणमकृत्वा शास्त्रशिक्षानुकूलतया चिन्तनयोग्या विचारा उपस्थाप्यन्ते। तत्रादौ प्राथमिकसौकर्यमुच्यते।

**प्राथमिकसौकर्यम् (Infrastructure)**

**शास्त्रविश्वविद्यालयस्य प्रदेशः** शास्त्राध्ययनयोग्यः प्रदेशो विश्वविद्यालस्य निर्माणार्थमादौ चेतव्यः। *क्रीडाव्यासङ्गविघातार्थ*मिति। बालस्तावत्क्रीडासक्तः। क्रीडा शास्त्राध्ययनप्रतिबन्धिका। नगरे क्रीडोत्तेजकस्य नैकस्यावसरस्य सत्त्वात् अध्ययनप्रतिबन्धिकायाः क्रीडासक्तेर्निवारणार्थं नगराद्बहिः अध्ययनपरिसरः स्यात्। **जलस्रोतः** *अनुसिप्र*मिति। नदीतीरे गुरुकुलस्थापनेन अध्येतॄणां जलमूलकस्नानभोजनादिकार्येषु असौविध्यं न भवति। कूपादीतरजलावलम्बनं गच्छता कालेन सम्भवत्यधिकोदकोपयोगे पर्यायव्यवस्थान्वेषणक्लेशपर्यवसायि भवेत्। **स्थलपरिमाणम्** *अर्धक्रोशमात्रायाम*मिति। शैक्षिकपरिसरस्य स्थलविस्तार उक्तः। नानाविद्याविभागानां बोधनानुकूलानि पर्याप्तमात्राणि भवनानि भवेयुः। येषां सत्त्वे छात्रोपस्थितिः, अध्ययनमध्यापनञ्च सुखेन स्यात्। **सुरक्षाभित्तिः** *प्राकारमण्डलेन परिवृतेन, अनुप्राकारमहितेन महता परिखावलयेन परिवेष्टित*मिति। शैक्षिकस्थलं परितः शुभ्रप्राकारः विशालेन परिखावलयेन परिवृतो भवेत्। यस्य निर्माणेन घातुकशक्तेरन्तःप्रवेशो निरुध्यते, विद्यार्थिनामननुमतगमनागमने निषिध्यते। **प्रवेशद्वारम्** *अतिदृढकपाटसम्पुटम्, उद्घाटितैकद्वारप्रवेश*मिति। सुरक्षार्थं भवनद्वारकवाटो दृढः स्यात्। स्वच्छन्दाहिण्डमानतां नियन्त्रयते भवनस्यैकद्वारोद्घाटनम्। **याननिवेशः** *एकान्तोपरचिततुरगबाह्यालीविभाग*मिति। विद्यालयस्यैकदेशे याननिवेशो व्यवस्थाप्यः। **व्यायामशाला** *अधःकल्पितव्यायामशाल*मिति। भवनस्याधो भागे व्यायामशाला विरचिता भवेत्। एवं शास्त्रविश्वविद्यालयनिर्माणार्थमनुकूलाः सप्तबिन्दवः प्रोक्ताः।

ततो विद्यामन्दिरे स राजा गुणाधानमकारयदिति। तथा च 'सर्वविद्याचार्याणाञ्च सङ्ग्रहे यत्नमतिमहान्तमन्वतिष्ठत्। तत्रस्थञ्च तं केशरिकि-

---

[4] कादम्बरी कथाप्रारम्भः पृ.सं. २३४

शोरकमिव पञ्जरगतं कृत्वा प्रतिशिद्धनिर्गमम् आचार्यकुलपुत्रप्रायपरिजन-परिवारम्, अपनीताशेषशिशुजनक्रीडनव्यासङ्गम्, अनन्यमनसम्, अखिल-विद्योपादानार्थमाचार्येभ्यश्चन्द्रापीडं शोभने दिवसे वैशम्पायनद्वितीयमर्पया-म्बभूव। प्रतिदिनञ्चोत्थायोत्थाय सह विलासवत्या विरलपरिजनस्तत्रैव गत्वैनमालोकयामास राजा[5]।' इति

**आन्तरिकगुणाधानम् (lnternal Quality Adoption)**

**अध्यापकाः** *सर्वविद्याचार्याणाञ्च सङ्ग्रहे यत्नमतिमहान्तमन्वति-ष्ठदिति*। अत्र 'सर्वविद्याचार्याणाम्' इति पदम्, 'यत्नमतिमहान्तम्' इति च बहुधाचिन्तनीयमर्थं प्रतिपादयति। शास्त्रेषु वैदुष्यसम्पन्नानामाचार्याणां सङ्ग्र-हार्थम् 'अतिमहान्तं यत्नम्' कुर्यात्। शास्त्राध्यापनार्थं सुयोग्या अध्यापका नियोजनीया इत्यर्थः। सुयोग्याश्च

**'विद्वत्त्वं दक्षता शीलं सङ्क्रान्तिरनुशीलनम्।**
**शिक्षकस्य गुणाः सप्त सचेतस्त्वं प्रसन्नता[6] ॥**

**चरणे द्वे शिक्षकस्य पठनं लेखनं तथा।**
**एकेन रहितः खञ्जो द्वाभ्यान्तु पङ्गुरेव सः[7]॥**

वैदुष्यादिसप्तगुणोपेतोऽध्ययनलेखनशीलश्च अध्यापकोत्तमो भवति। किञ्च

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**
**धैर्यं लयसमर्थञ्च षडेते पाठका गुणाः [8]॥**

षड्भिरध्यापनगुणैर्युक्तः' इति प्राज्ञोक्तगुणवन्तः। एतादृशाचार्यनियो-जना शास्त्रविश्वविद्यालयस्य प्राणप्रतिष्ठापना एव। **विद्यार्थिनां भ्रमणनिषेधः** *तं केशरिकिशोरकमिव पञ्जरगतं कृत्वा प्रतिशिद्धनिर्गम*मिति। इन्द्रियाणि सहजतया विषयलोलुपानि विशेषतो यूनाम्। विश्वविद्यालयेन क्रियमाणो नियमो विद्यार्थिनां शास्त्रव्यसनं वर्धयेत्। अकाले परिसरे इतस्ततो बालका

---

5 कादम्बरी कथाप्रारम्भः पृ.सं. २३५

6 गुरुमहिमा १.२६

7 आलवालम्, सुपद्या-६ पृ.सं.५०

8 पाणिनीयशिक्षा श्लोकः-३३

नाहिण्डेरन्निति निर्दिश्यमानो विधिः तेषामध्ययने सातत्यमाददाति। **विद्यापीठस्य परिवारः** *आचार्यकुलपुत्रप्रायपरिजनपरिवार*मिति। विश्व-विद्यालये शास्त्राध्ययनानुकूलवातावरणं सदा रक्षणीयम्। तत्र परिवारस्यापि कारणता वर्तते। आचार्याः, सत्कुलप्रसूतप्रचुराः, सहाध्यायिनः परिजनाश्च तत्र भवेयुः। कुलपुत्रप्रायाः सत्कुलप्रसूता इति कालान्तरविषयः। अद्य प्रवेशं लभमाना बालका विविधक्रियाकलापैर्गुणिनः कर्तव्या इति नो भाति। **एकाग्रतारक्षणम्** *अपनीताशेषशिशुजनक्रीडनव्यासङ्गम्, अनन्यमनस*मिति। शास्त्राध्ययनार्थं बालकस्य विशिष्टं चित्तैकाग्र्यमपेक्ष्यते। तच्च शिशुक्रीडादिविनोदकव्यासङ्गस्य स्थानाकल्पनाद्भवति। **प्रवेशमुहूर्तः** *शोभने दिवसे* इति। बालकः शुभतिथ्यादौ प्रवेशयितव्यः। विद्यापीठारम्भः पाठारम्भश्च शुभकाले कर्तव्यः। **वयः** *शैशवमतिचक्राम चन्द्रापीडस्ये*ति। कौमारे वयसि बालकः शास्त्राध्ययनमारभेत। **अध्ययनावधिः** *अयमत्रभवतो दशमः संवत्सरः विद्यागृहमधिवसतः* इति। दशवर्षाणि शास्त्राध्ययनस्य निर्दिष्टानि। **क्षेमविचारः** *प्रतिदिनञ्चोत्थायोत्थाय सह विलासवत्या विरलपरिजनस्तत्रैव गत्वैनमालोकयामास राजे*ति। पितृभिः काले काले विद्यापीठं गत्वा पुत्रोऽवलोकनीयः। येन सोऽपि असकृद्गृहगमनचिन्ताया मुक्तो भवति। एवं शास्त्रविश्वविद्यालयस्य आन्तरिकगुणादायकाः सप्तबिन्दवः प्रोक्ताः।

**परिणामः (Result)**

विद्यापीठे पूर्वोक्तसौकर्यविधानाल्लब्धं फलं बाणभट्टो न्यरूपयत्। ‘चन्द्रापीडोऽप्यनन्यहृदयतया तथा यन्त्रितो राज्ञा अचिरेणैव यथास्वमात्मकौशलं प्रकटयद्भिः पात्रवशादुपजातोत्साहैः आचार्यैः उपदिश्यमानः सर्वा विद्या जग्राह। मणिदर्पण इवातिनिर्मले तस्मिन् सञ्चक्राम सकलः कलाकलापः। तथा हि पदे वाक्ये प्रमाणे धर्मशास्त्रे राजनीतिषु व्यायामविद्यासु चापचक्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषु सर्वेष्वायुधविशेषेषु रथचर्यासु गजपृष्ठेषु तुरङ्गमेषु वीणावेणुमुरजकांस्यतालदर्दुरपुटप्रभृतिषु वाद्येषु तुरगवयोज्ञाने पुरुषलक्षणे चित्रकर्मणि पत्रच्छेद्ये पुस्तव्यापारे लेख्यकर्मणि सर्वासु द्यूतकलासु गन्धशास्त्रेषु शकुनिरुतज्ञाने ग्रहगणिते रत्नपरीक्षासु दारुकर्मणि दन्तव्यापारे वास्तुविद्यासु आयुर्वेदे यन्त्रप्रयोगे विषापहरणे सुरङ्गोपभेदे तरणे लङ्घने प्लुतिषु रतितन्त्रेषु इन्द्रजाले कथासु नाटकेषु

आख्यायिकासु काव्येषु महाभारतपुराणेतिहासरामायणेषु सर्वलिपिषु सर्वदेशभाषासु सर्वसंज्ञासु सर्वशिल्पेषु छन्दस्सु अन्येष्वपि कलाकैशलेषु परं कौशलमवाप[9]।' इति।

चन्द्रापीड आचार्यैरुपदिश्यमानः पदादिसर्वा विद्या जग्राह इत्युक्तम्। अत्र किं पूर्वोक्तसर्वविद्याग्रहणं लोकसम्भव्युत कविकल्पितमिति संशयो भवेत् मतिमताम्। यद्यपि कादम्बरीवस्तु कविना कल्पितम्; किन्तु लोकसम्भवयोग्यं वस्तु सरसं यथा स्यात्तथा कविना कल्पितम्। अन्यथा सर्वथा लोकातीतस्य कल्पनादनौचित्यं स्यात्। औचित्यभङ्गं परस्य काव्येऽपि भवन्तं महाकवयो न सहन्ते किमुत निजस्य। किञ्चात्र *अनन्यहृदयतया* इत्यनेन शिष्यस्य **श्रद्धा,** *तथा यन्त्रितो राज्ञा* इत्यनेन **अनुशासनम्,** *अचिरेणैव* इत्यनेन **सतताभ्यासः** *पात्रवशाद्* इत्यनेन **शास्त्रज्ञानसम्पादने पात्रता,** *यथास्वमात्मकौशलं प्रकटयद्भिः* इत्यनेन **गुरोः शिष्यगतकौशलप्रकाशनदक्षता** च सर्वविद्याग्रहणे मुख्यसामग्री इत्यवगन्तव्यम्। अतः सकलसामग्रीसत्त्वे सर्वविद्याग्रहणं लोकसम्भवीति नो मतिः। अथवास्तु सर्वविद्यानां ग्रहणं लोकासम्भवीति, एकस्या द्वयोः तिसृणां वा ग्रहणन्तु लोकसम्भवीति निर्विवादं गृह्यताम्।

शास्त्राणां रक्षणमेवोद्दिष्टमस्मिन् लेखे न पुनः समाजे तद्विनियोगः इति न मन्यन्तामार्यमिश्राः! कालोचितचेष्टावन्तो भूत्वा जना इष्टं प्राप्नुयुरेव। किन्तु 'ज्ञानपूर्वकप्रयोगः' इति वाक्यार्थः सर्वथा सर्वदा च अनुसन्धेयोऽस्माभिः।

संस्कृतविश्वविद्यालयेषु बहुविषयकाध्ययनाय छात्राणां मुक्तावसरः, तदर्थं प्रेरकमार्गदर्शनम्, तथाध्यापनपद्धतिश्च भवेत्। पाठ्यक्रमे एव अधीतानां भारतीयशास्त्रशाखाविषयाणाम् अभिव्यक्तये भूयानवसरः कल्पनीयः। तेन ज्ञातस्य विषयस्य समाजे विनियोगः सुकरो भविष्यति। स्वाध्यायः प्रवचनञ्च अद्य अत्यन्तापेक्षितं कर्म राष्ट्रविकासाय। एवंविधिना अधीतविद्यः बहुषु विषयेषु नैपुणीमादधीत। एकस्मिन् शास्त्रे वा निर्दुष्टं वैदुष्यं प्राप्नुयात्। देशे देशान्तरे वा अद्यतनापेक्षायाः पूर्तये योग्यतां लभेत। तदर्थं विशिष्टा

---

[9] कादम्बरी, कथाप्रारम्भः, पृ.सं. २३७-२३८

काचित्परियोजना इयं नूतनशिक्षाप्रणाली इति मन्यमानैः सर्वैरध्यापकैरपि सततोद्यमः कर्तव्यः। सतताध्यापनशीला विद्वांसोऽध्यापकाः,

**आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः।**
**आप्तः शक्तोऽर्थदः साधुः सोऽध्याप्यो दश धर्मतः[10]॥**

इत्युक्तगुणा विद्यार्थिनश्च विश्वविद्यालयेषु वर्धेरन्नित्याशास्महे।

**सन्दर्भग्रन्थाः वेब्-सामग्री च**


१. आगमरहस्यम्, डा, सुधाकर मालवीय, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
२. आलवालम्, राघवेन्द्रभट्टः, अखिलभारतीयसाहित्यपरिषत्, शृङ्गेरी
३. कूर्मपुराणम्, डा. महेश चन्द्र जोषी, चौखम्बा कृष्णदास अकादमी, वाराणसी
४. पाणिनीयशिक्षा, डा.रमाशङ्कर मिश्र, चौखम्बा सुरभारती प्रकाशन, वाराणसी
५. बाणभट्टकृतकादम्बरी, अचार्यशेषराजशर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी
६. मनुस्मृतिः, पं.हरगोविन्द शास्त्री, चौखम्बा सम्स्कृत संस्थान, वाराणसी
७. महाभारतम् गीतप्रेस्, गोरखपुर
८. शब्दकल्पद्रुमः, राजा राधाकान्त देव, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली
९. www.sankrit.nic.in
१०. www.yourarticlelibrary.com
११. www.naac.gov.in


*********

[10] कूर्मपुराणम् १४.४०

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५
ISSN: 0975-1769 UGC CARE ID:101000019

# पताकाम्नायेऽभिचित्रितायाः भारतराष्ट्रीयमुद्रायाः दार्शनिकं विवेचनम्

**डॉ. कामेश्वर शुक्लः**
आचार्यः, संस्कृतविभागः
गुवाहाटी-विश्वविद्यालयः
(Sub ID: CSU/SV-249)

**शोधसारः** - *राष्ट्रीयचिह्नानि लोकतान्त्रिकस्य कस्यचिदपि राष्ट्रस्य, तद्राष्ट्रीयसंस्कृतेः, दार्शनिकचिन्तनस्य, अध्यात्मप्रवणतायाः, ज्ञानगरिम्णश्च प्रतीकभूतानि भवन्ति। तच्चिह्नानि देशवासिनां मनस्सु स्वकीयं राष्ट्रं प्रति गौरवस्य, स्वाभिमानस्य, देशभक्तेश्च भावं सञ्चारयन्ति। परस्परमेकतामात्मीयताञ्च वर्द्धयन्ति। राष्ट्रेतिहासं, देशवासिभिः राष्ट्राय विहितं बलिदानं, सोढं संघर्षञ्च स्मारयन्ति। अस्मद्देशीयराष्ट्रीयचिह्नेषु राष्ट्रीयमुद्रागतं चिह्नमन्यतमम्।*

*आचार्यः मनोरञ्जनशास्त्री तदीये पताकाम्नाये भारत-राष्ट्रीय-मुद्राङ्कितानां प्रतीकानां वेदोपनिषदां तथा च भारतीयदर्शनाधारेण सविस्तरं विवेचनं कृतमस्ति। प्रस्तुते शोधप्रबन्धे तदीयं तद्विवेचनं समीक्षितुं तथा च तद्द्वारेण भारतीयेभ्यः प्रदत्तं प्रसारितञ्च राष्ट्रीयोपदेशं प्रतिपादयितुं प्रयासो विहितो वर्तते।*

**कूटशब्दाः** - पताकाम्नायः, मनोरञ्जनशास्त्री, भारतराष्ट्रीयमुद्रा, प्रतीकवादः।

भारतवर्षं वसुन्धरायाः मस्तकम्। संस्कृतं तत्र सुन्दरः सिन्दूरबिन्दुः। सुधीजनास्तस्य सुषमासञ्जीविनः। तेषां समवायः मानवतायाः आश्रयः पूर्वोत्तरभारतं च तस्य योग्यतमं स्थलम्। पूर्वोत्तरभारतेऽपि अन्यतमस्य असमप्रान्तस्य तत्रत्यानां मनीषिनाञ्च संस्कृतं प्रति उल्लेखयोग्यं गौरवमण्डितञ्च अवदानं वर्तते। अस्यैव प्रदेशस्य वर्तमानदरङ्ग-मण्डलान्तर्गत-भेरुवाग्राम-वास्तव्येन विद्वत्कुल-ललामभूतेन आचार्यमनोरञ्जनशास्त्रिमहोदयेन प्रणीतः ***पताकाम्नायः*** भारत-राष्ट्रिय-मुद्रापताकयोः व्यञ्जितार्थव्याख्यानात्मकः एको महत्त्वपूर्णः ग्रन्थः।

भारतराष्ट्रीयां मुद्रां पताकाञ्चाधिकृत्य विरचितोऽयं ग्रन्थः पूर्वार्द्धः उत्तरार्द्धश्चेति भागद्वये विभक्तो वर्तते। पूर्वार्द्धे तावत् राष्ट्रीयमुद्रायाः उत्तरार्द्धे राष्ट्रीयपताकायाश्च शास्त्रीयं तात्त्विकं सयुक्तिकं च दार्शनिकं विवेचनं सुचारु-तया विहितमस्ति। प्रायशः अनुष्टुभ्छन्दसि समुपनिबद्धेषु सप्तत्यधिकैक-शतसंख्यकश्लोकेषु प्रणीतोऽयं ग्रन्थो ग्रन्थकारस्य विविधशास्त्रावगाहिज्ञानं प्रकटयति, तस्य सूक्ष्मेक्षिकां प्रतिभां व्यनक्ति, पाठकानां मनांसि आवर्जयति विवेकं प्रबोधयति दर्शनतत्त्वञ्च अवगमयति।

यद्यपि स्वतन्त्रताप्राप्तेः परं राष्ट्रीयां मुद्रां पताकां चावलम्ब्य विविधाः रचनाः समजायन्त किन्तु "पताकाम्नाये" शास्त्रिमहोदयेन स्वीयदिशा किमपि अभिनवं रहस्यजातं प्रतिपादितं वर्तते। सांख्य-वेदान्त-न्याय-मीमांसाप्रभृति-आस्तिकदर्शनानां बौद्ध-जैनप्रभृति-नास्तिकदर्शनानाञ्च मुख्यप्रतिपाद्यविषयाः मुद्रापताकयोः व्याजेन सुस्पष्टतया व्यञ्जिताः सन्ति। प्रस्तूयमाने लघुकाये-ऽस्मिन् प्रबन्धे ग्रन्थे प्रतिपादितानां कतिपय- प्रसिद्ध- आस्तिकदार्शनिक-मतानां समीक्षात्मकं वर्णनमेव कर्तुं प्रयासः कृतो वर्तते।

ग्रन्थस्यास्य दार्शनिकोद्भावानामुपस्थापनात् प्राक् राष्ट्रीयमुद्रायाः स्वरूपस्य संक्षिप्तः परिचयः उल्लेखमर्हति। मुद्रायां पूर्वपश्चिमोत्तरदक्षिणदि-गभिमुखाः परस्परं लग्नपृष्ठदेशाः ऊर्ध्वोत्क्षिप्तकेशाश्च चत्वारः सिंहाः दण्डाय-मानाः परिलक्ष्यन्ते। तेषां सिंहानामधः नाभिनेमियुतम् एकं चक्रं विद्यते। चक्रस्य मध्यकेन्द्रं नाभिः बहिर्वेष्टनं च नेमिः इति आख्यातमस्ति। तस्मिन् चक्रे संयोग-शलाकारूपाः चतुर्विंशतिः अराः वर्तन्ते। तद्वामभागे वृषस्य दक्षिणभागे च अश्वस्य आकृतिः दृष्टिपथम् आयाति। तच्चक्रस्याधस्तात् मुण्डकोपनिषदि विनिर्दिष्टम् -

**सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः।**
**येनाक्रमन्वृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं विधानम्।।**[1]

इति सत्यस्य जयघोषमयं वाक्यम् अङ्कितं वर्तते। अनेन उपनिषद्वाक्येन च भारतराष्ट्रस्य सत्यैकनिष्ठत्वमङ्गीकृतमस्ति।

---

[1] मु.उ. 3/1/6

विदितमेवास्माभिः यत् सांख्यदर्शनस्य प्रकृतिपुरुषयोः द्वैधीभावं परिसमाप्य वेदान्तदर्शने तयोः समावेशः एकस्मिन्नेव परमतत्त्वे ब्रह्मणि विधीयते। वेदान्तदर्शनानुसारं ब्रह्मैव जगतः निमित्तकारणत्वेन उपादान-कारणत्वेन च उररीक्रियते। अस्य एकीभावस्य उपस्थापनहेतोः दर्शनमिद-मद्वैतवादिदर्शनमुच्यते। मायायाः प्रपञ्चं भित्त्वा स्थूलतः सूक्ष्मं प्रति प्रविष्टे सति आत्मनः ब्रह्मणश्च एकीभावे सन्देहपरिसमाप्तिः संघटते। अन्तःकरणस्य मन-बुद्धि-अहङ्काररूपाः याः वृत्तयः, आभ्यः वृत्तिभ्यः आबद्धा या चेतना, तस्याः स्वनाम भवति प्रत्यगात्मा, कूटस्थः, व्यक्तिगत आत्मा वेति। तथैव विशुद्धा विनिर्मुक्ता च चेतना ब्रह्मेति आख्यायते। मायया वशीभूतान्तः-करणवृत्त्याबद्धं ब्रह्मैव आत्मस्वरूपम्। यथा घटाकाशाकाशयोः अभेदः तथैव आत्मपरमात्मनोः अपि न कश्चित् भेदः। **"अयमात्मा ब्रह्म", "आत्मैवेदं सर्वम्"** प्रभृतिमहावाक्यं आत्मब्रह्मणोः ऐक्यं विज्ञापयति।

**स य एषोऽणिमैतदात्म्यमिदं सर्वं**
**तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो।**[2]

इति छान्दोग्योपनिषदः इयमुक्तिरपि आत्मब्रह्मणोः अभिन्नतां प्रतिपादयति। शास्त्रिमहोदयेन स्वीयग्रन्थे राष्ट्रीयमुद्राद्वारेण अद्वैतवेदान्तस्याभिमतमिदम-तीव सुललितया विस्पष्टगिरा च अभिव्यञ्जितमस्ति। यथा -

**अरास्तु प्राणास्तन्मात्र-ज्ञानकर्मेन्द्रियाणि च।**
**अन्तःकरणयुक्तानि चतुर्विंशति-संख्यया।।**
**परमात्माभिबद्धानि जीवनेमियुतानि च।**
**तच्चक्रं भ्रामयन्नास्ते मायया परमेश्वरः।।**
**कालनेमियुतं चक्रं सच्चिदानन्दनाभिकम्।**
**अन्तः करणभूतेन्द्रिप्राणारं ब्रह्म शाश्वतम्।।**
**अद्वैतं द्वैतवद्भातं निर्गुणं शान्तमव्ययम्।**[3]

पञ्चप्राणाः, पञ्चतन्मात्राणि, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनोबुद्धि-चित्ताहङ्काररूपाणि चत्वारि अन्तःकरणानीति मिलित्वा चतुर्विंशतिः

---

[2] छा.उ. 6/8/7

[3] पताका., 59-62

संख्यकानि भवन्ति। तानि परमात्मरूपे नाभौ बद्धानि, कर्मफलभोक्तारः जीवाः, ते एवं नेमिरूपं तेन च युतानि सन्ति। परमेश्वरः तादृशमेतच्चक्रं स्वीयमाया-शक्त्या भ्रामयन्नास्ते। यथा च बृहदारण्यकोपनिषदि-

**स वा अयमात्मा सर्वेषां भूतानामधिपतिः, सर्वेषां भूतानां राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः।**[4]

श्रीमद्भगवद्गीतायामपि प्रोक्तम् -

**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।**
**भ्रामयन् सर्वभूतानि मन्त्रारूढानि मायया।।**[5]

अस्य चक्रस्य परब्रह्मरूपकत्वं प्रतिपादयता ग्रन्थकारेण निर्दिश्यते यत् कालरूपिण्या नेम्या, सच्चिदानन्दब्रह्मरूपिण्या नाभ्या, अन्तःकरणभूतेन्द्रिय-प्राणैः इति प्रागुक्तैः चतुर्विंशतिसंख्यकैः अरैश्च युतं इदं चक्रं शाश्वतं सर्वदा एकरूपं अविकारि च वर्तते। मायया जगत्प्रपञ्चरूपेण रज्जुः यथा सर्पवद् अवभासते तथा ब्रह्मैव प्रपञ्चरूपेण चानेन प्रतिभासते इति मुद्राङ्कितेन चक्रेण अभिव्यञ्जितं विद्यते। श्वेताश्वतरोपनिषदि तु चक्रमिदं किञ्चिद् अन्यथा वर्णितं वर्तते यथा -

**तमेकनमिं त्रिवृतं षोडशान्तं शतार्धारं विंशतिप्रत्यराभिः।**
**अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम्।।**[6]

तत्र वर्णितानामपि चक्रावयवानाम् अत्रान्तरभावसम्भवात् नानेन विरोधमावहतीति ग्रन्थकारस्याभिमतमत्र प्रणिधानयोग्यम्। राष्ट्रीयमुद्रायाः सांख्ययोगसिद्धान्तव्यञ्जकत्वं प्रकाशयन् ग्रन्थकारः उल्लिखति-

**अथवा तद्गतं चक्रमविवेकप्रधिस्थितम्,**
**चतुर्विंशतितत्त्वारं चिन्नाभं जगदात्मकम्।**

---

[4] बृ. उ. 2/5/15

[5] गीता. 18/61

[6] श्वे.उ. 1/4

**यद्ध्यात्वा साधकः साक्षात् सांख्ययोगमते स्थितः,**
**व्यक्ताव्यक्तज्ञविज्ञानात् सद्यो मोक्षाय कल्पते ॥**[7]

अनेन प्रकृतिमहदहङ्कारैकादशेन्द्रिय-पञ्चतन्मात्र-पञ्चभूतानीति चतुर्विंशतितत्त्वानि व्यक्तरूपेण तदेतैः चतुर्विंशत्या अरैः समायुक्तं चक्रम् अव्यक्तरूपेण तथा च चक्रस्य मध्यभागस्था नाभिः ज्ञरूपेणेति अभिव्यञ्जितमस्ति। अन्ते च -

**पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे रतः।**
**जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः।।**

इति जयमङ्गलाकारस्य कथनम् **"तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्"**[8] इति सांख्यदर्शनस्य च मूलप्रतिपाद्यविषयः समर्थितोऽस्ति।

ग्रन्थकारस्य **"सांख्ययोगमते स्थितः"** इति उपर्युक्तवचनं विशेषमर्थमावहति। **"संख्या कृतमिति सांख्यम्"** सांख्यं च योगश्च इति सांख्ययोगौ तयोः सांख्ययोगयोः मते स्थितः साधकः सद्यः मोक्षाय कल्पते इति अन्वयः। अत्र ग्रन्थकारेण सांख्य-योगयोः अभिन्नता प्रतिपादिता विद्यते। वस्तुतः सांख्यसूत्रे उपनिबद्धाः सिद्धान्ताः वेदेषु, उपनिषत्सु, गीतायां च दरीदृश्यन्ते। अतः सांख्यदर्शनस्य प्राचीनता निर्विवादा। किन्तु यस्मिन् काले सांख्यदर्शनं स्वतन्त्रदर्शनरूपेण स्थानमलभत तदानीं पूर्ववर्तिनाऽपि सिद्धान्तान् एकस्मिन् सूत्रे संगृह्य कर्मणः संन्यासग्रहणं ब्रह्मज्ञानाय आत्मनियोगश्च जीवस्य लक्ष्यं निर्धारितम्। तदेव "सांख्ययोगः", "ज्ञानयोगः", "संन्यासयोगः" वेति नाम्ना प्रसिद्धिमगात्। एषा एवं अवस्था उपनिषत्सु अनया रीत्या प्रकाशि-तास्ति -

**भिद्यते हृदयग्रन्थि छिद्यन्ते सर्वसंशयः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।**

---

[7] पताका., 80-81

[8] मु.उ., 2/2/8

गीतायामपि उक्तम् - "**सांख्ययोगौ पृथग्बाला, प्रवदन्ति न पण्डिताः।**"[9]

ग्रन्थकारेणापि प्राचीनमिदमभिमतं समर्थितमस्ति। एवमेव "**वृषः स्यात् प्रकृतिः सोमः पुमानग्निर्हयाकृतिः। ताभ्यां प्रवर्तिता सृष्टिश्चक्रेण परिलक्ष्यते**" इति प्रतिपाद्यग्रन्थकारमुद्रायाः अधो भागे अङ्किताभ्यां वृषाश्वाभ्यां प्रकृतिपुरुषविवेकः उताहो वृषेण अविवेकहेतुकं बन्धनं ह्येन च विवेकहेतुः मोक्षः इति सांख्ययोगसिद्धान्तः संकेतितो विद्यते।

वैशेषिकदर्शनप्रवर्तकस्य महर्षेः कणादस्य अनुसारं धर्माचरणेन समुत्पन्नं द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याभ्यो यत् तत्त्वज्ञानं तेनैव मोक्षावाप्तिः संजायते। यथोक्तं तेन "**धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्**" इति। अनेन स्पष्टमेतत् यत् अत्र कणादेन षड्पदार्थाः एव स्वीकृताः तथा च एतेषु एव जगतः समग्रवस्तूनां सन्निवेशो विहितः। वैशेषिकसूत्रस्य भाष्यकारेण प्रशस्तपादेनापि इमे एव षड् पदार्थाः स्वीकृताः। किन्तु श्रीधराचार्य-उदयनाचार्य-शिवादित्यप्रभृतयः उत्तरवर्तिन वैशेषिककाराः "अभावः" इत्याख्यं सप्तमं पदार्थमपि अङ्गीकुर्वन्ति। आचार्य-शास्त्रिमहोदयेनापि स्वग्रन्थे सप्तपदार्थान् स्वीकुर्वता मुद्रया सूचितः वैशेषिकसिद्धान्तः प्रतिपादितो वर्तते। भाषापरिच्छेदेऽपि एतद्विषयिणी एका कारिका प्राप्यते -

**द्रव्यं गुणस्तथाकर्म सामान्यं सविशेषकम्।**
**समवायस्तथाऽभावः पदार्थाः सप्तकीर्तिताः ॥**[10]

ते सप्तपदार्थाः एव मुद्रायामङ्कितस्य चक्रस्य अवयवत्वेन कल्पिताः सन्ति। यथा द्रव्यं नाम पदार्थः चक्रस्य नाभिः, गुणास्तावत् चतुर्विंशतिः अराः, समवाय-सामान्य-विशेषा इति पदार्थत्रयं नेमिरूपम्, अभावः खलु चक्रगतः विवरः (रन्ध्रः), चक्रस्य भ्रमिः (भ्रमिकं) तावत् कर्मनामकः सप्तमः

---

[9] (a) सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः। एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्।। गीता, 5-4

(b) यत्सांख्यैः प्राप्यते स्थानं तद् योगैरपि गम्यते। एकं सांख्यं च योगं च यः पश्यति स पश्यति।। गीता, 5-5

[10] भा.प., 1,2

पदार्थः। तदित्थं समग्र-पदार्थघटितस्वरूपं तच्चक्रं वृषरूपिणा धर्मेण नियन्त्रितम् अश्वरूपस्य ज्ञानस्य च साधनभूतं वर्तते। यथोक्तम् -

**वैशेषिकनये चक्रं द्रव्यनाभं गुणाकरम्।**
**समवायक-सामान्य-विशेषपरिवेष्टनम्।।**

**अभावरन्ध्रकं कर्मभ्रमिकं जगदात्मकम्।**
**धर्मेण विधृतं तत्तु ज्ञानसाधनमुत्तमम्।।**[11]

प्रमाण- प्रमेय - संशय - प्रयोजन- दृष्टान्त – सिद्धान्त - अवयव - तर्क - निर्णय - वाद - जल्प – वितण्डा - हेत्वाभास - च्छल - जाति – निग्रह-स्थानानीति न्यायदर्शनाभिमताः षोडशपदार्थाः येषां ज्ञानेन निःश्रेयसः प्राप्तिः भवति। यथा दीपकालोके वयं घट-पटादीनि वस्तूनि अभिज्ञातुं समर्थाः भवामः तथैव ज्ञानालोके एव एतेषां पदार्थानां वास्तविकः स्वरूपबोधः सञ्जायते। अतः ज्ञानस्य स्वरूपं महत्त्वपूर्णम्। प्रमा अप्रमेति ज्ञानस्य प्रमुखं भेदद्वयम्। तत्र यथार्थज्ञानं प्रमा अयथार्थज्ञानम् अप्रमेति अभिमतम्। किन्तु तत् यथार्थज्ञानं प्रमातारं प्रमेयं च विना असम्भवम्। ज्ञानस्याधारः खलु विषयः, स एव प्रमेयपदवाच्यः। अतः प्रमातुः प्रमेयस्य प्रमाणस्य च यथार्थ-ज्ञानाय (प्रमार्थं प्रमित्यर्थं वा) आवश्यकता भवति। ग्रन्थकारैः न्यायसिद्धान्तोऽयं राष्ट्रीयमुद्रायां सम्यक्प्रकाशितो विद्यते। मुद्रायां विद्यमानं यत् चक्रं, चक्रस्था या नाभिः सा प्रमातृरूपेण, नेमिः प्रमितिरूपेण, कल्पितास्ति। प्रमितेरेव फलत्वेन प्रमेयतोऽपि प्राधान्यात् तस्या नेमित्वकल्पनं विहितं विद्यते। उपर्युक्ताः षोडशपदार्थाः अराः प्रमेयशब्देनात्र वैशेषिकोक्ताः षड्पदार्थाः अपि गृह्यन्ते। "**अस्ति अन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवायाः प्रमेयमिति**" वात्स्यायनोक्तिः अत्र प्रमाणम्। एवं प्रत्यक्षानुमानशब्दोपमानानि चत्वारि प्रमाणानि, द्रव्यादिषड्प्रमेयाः, संशयादयश्चेतरे चतुर्दशपदार्थाः इति मिलित्वा चक्रे निर्दिष्टानां चतुर्विंशतेः अराणां संगतिः जायते। ईदृशमेतच्चक्रं पदार्थगण-घटितस्वरूपम् अतएव महदिति। यथोक्तं -

**प्रमातृनाभिकं नयनये यमितिनेमिकम्।**
**इतरैर्घटितारं तच्चक्रं तत्त्वमयं महत्।।**

---

[11] पताका., 82-83

**धर्मज्ञाने वृषाश्वाभ्यां बन्धमोक्षावथाऽपि वा।**[12]

अत्रापि वैशेषिकनय इव वृषेण धर्मः बन्धनं वा, अश्वेन च ज्ञानं मोक्षः वा प्रख्यातो विद्यते। पताकाम्नायस्य अनुशीलनेन एतत् निश्चप्रचं वक्तुं शक्यते यत् आचार्यशास्त्रिमहोदयः विविधविद्यापारदृश्वा अनेकशास्त्रनिष्णातश्चासीत्। वैदिकसाहित्ये दर्शनेषु, धर्मशास्त्रेषु, पुराणेषु, व्याकरणे, काव्यनाट्यशास्त्रेषु च तस्य अस्खलिता गतिः परिलक्ष्यते।

**उपसंहारः**

प्रतीकवादो गभीरतमव्याख्यानञ्चेति भारतीयं प्रसिद्धं प्रवृत्तिद्वयम्, यत्र भारतीयाः मनीषिणः आदिकालादवगाहमानाः विलोक्यन्ते। पताकाम्नाय-कारेण सैव प्रवृत्तिरनुसृताऽस्ति। वेदोपनिषत्सु भारतीय-दर्शन-ग्रन्थेषु च समुपनिबद्धानां विचाराणां पृष्ठभूमौ भारतराष्ट्रीयमुद्रायाः प्रतीकवादस्य विस्तृतं वर्णनमत्र तेन विहितमस्ति। तदीयं व्याख्यानमिदं न केवलं राष्ट्रीयं महत्त्वं प्रतिपादयति, अपि तु भारतीयान् सनातनधार्मिकाध्यात्मिक-सिद्धान्तानपि वितनोति। मुद्राङ्किताः सिंहाः स्वातन्त्र्याभय-वीर्य-शौर्य-गुणान्विताः। ते च गुणाः भारतीयानां तद्गुणवत्त्वं सम्भावितं व्यञ्जयन्ति। भारतीयेषु गुणचतुष्टयस्य परस्पराविरोधेन समभावेन च सर्वेषां शक्तिसाम्यं, ततः चरित्रसाम्यं, ततश्च सर्वेषां सहयोगः, ततः परस्परैकमत्यम्, हृदयवचनमनस्कामानां साम्यं ऋक्श्रुत्युक्तं भवेदिति ग्रन्थकारस्योपदेशः प्रकाशतां याति। एवंरूपेण मुद्राङ्कितं चक्रं सर्वेषामेव सम्प्रदायानां स्वस्वधर्मचक्ररूपेणाव-स्थितमभिमतं चेति विभिन्नधर्मावलम्बिनोऽपि स्वस्वधर्मानुष्ठानानि निर्वहन्तः तत्र तत्र बद्धादरा एव परस्पराविरोधेना-नुवर्तेरन्निति ग्रन्थकारस्याशयोऽभिव्यज्यते। अन्नसाधनतया वृषभस्य पुष्टिप्रयोजकत्वं प्रत्यक्षसिद्धम्। तेन हि राष्ट्रपोषणमिति सर्वजनविदितम्। तथैव युद्धादिसाधनतया अश्वस्य राष्ट्र-रक्षासाधनत्वं साक्षात्प्रकटीकृतम्। तेन च राष्ट्ररक्षणजातं कृत्यं समर्थितम्। एतच्च द्वयमेव भारतीयानां श्रेयसे मुख्यं कृत्यम्। अत्र हि ग्रन्थकारेण वृषभा-श्वाभ्यां तदेवावश्यकं कर्त्तव्यं संसूचिमित्यलं विस्तरेण।

---

[12] पताका., 84-85

## ग्रन्थसूची


- कणादः, **वैशेषिकसूत्रम्**, बरोदा, ऑरियान्टाल इंस्टीटिउट, 1961
- दशोरा नन्दलालः(व्याख्या.), **पातंजल योग सूत्र**, हरिद्वार, तृतीयं संस्करणम्, रणधीर प्रकाशनम्, 1997
- दशोरा नन्दलाल, **ग्यारह उपनिषद् संग्रह**, दिल्ली, आस्था प्रकाशन मन्दिर, 2022
- भट्टाचार्यः विश्वनाथपञ्चाननः, **भाषापरिच्छेदः**, मुम्बई, लक्ष्मीवैंकटेश्वर-मुद्रणालयः, 1950
- रामसुखदासः(सम्पा.), **श्रीमद्भगवद्गीता**, गोरखपुर, गीता प्रेस
- Sinha Nandalal, **The Samkhya Philosophy**, New Delhi, Munshiram Manoharlal Publishers Pvt. Ltd., 2013
- Chandra Satisa(Trans.), **The Nyaya Sutras of Gotama**, Allahabad, The Panini Office, 1913


*********

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५
ISSN: 0975-1769 UGC CARE ID:101000019

# नीतिशतके मानवतावादस्यावधारणा

**डा. मृत्युञ्जय गराँइ**
सहायकप्राध्यापकः, संस्कृतविभागः
रामकृष्णमहाविद्यालयः, मधुबनी, विहारः
(Sub ID: CSU/SV-015)

**शोधसारः** - *भर्तृहरिप्रणीतं नीतिशतकं खलु सुभाषितानामेकमनवद्यं संकलनम्। व्यवहारिकजीवनेऽस्य महान् प्रभावोऽस्ति। नीतिशतके बहुविधः सारगर्भितप्रसङ्गो बहुत्र परिदृश्यते। तत्र मानवतावादः खल्वतीव महत्त्वपूर्णः। मानवतावादोपयोगीनि बहुविधानि तत्त्वानि सम्यक्तयाऽत्र परिदृष्टानि। येषु विद्वत्समादरता-वाग्भूषणविद्या-सत्सङ्ग- परोपकार- दानशीलता- प्रजापालना- हिंसादीनि तत्त्वानि तावदन्यतमानि। एतैः तत्त्वैरेव मानवतावादस्य पूर्णविकासः सम्भवति। आधुनिकयान्त्रिकजीवने यस्य महानुपयोगः सर्वथाऽनुभूयते। एवं कतिपयतत्त्वानां विश्लेषणं प्रस्तुते लेखेऽस्मिन् नातिविस्तरेणोपस्थाप्यते।*

**कूटशब्दाः** - नीतिशास्त्रम्, मानवतावादः, शतकत्रयम्, मूल्यबोधः, मुक्तक-काव्यम्, उद्योगपरायणता, परोपकारः, अहिंसा।

**उपोद्घातः** - विश्वसंसारस्यादर्शभूता भारतीयशिक्षापद्धतिः सुप्राचीनवैदिक-कालादारभ्य साम्प्रतिककालं यावत् समृद्धशीला विराजते अखिले संसारे। प्राचीनभारते शिक्षापद्धतिरियमतीव सुप्रशंसनीया आसीत्। नालन्दा-तक्ष-शिलादीनां जनप्रियत्वमेव अस्याः महत् प्रतिफलनम्। प्राचीनकालस्येव अधुनाप्यस्माकं शिक्षाव्यवस्थायाः महीयसी गरिमा वर्तते। वस्तुतस्तु बहु-भाषायां बहुविधविषयसन्निवेशेनेयं शिक्षाव्यवस्था महती समृद्धा जाता। तत्रास्ति संस्कृतभाषायाः महदवदानम्। साहित्य-व्याकरणालंकार-नीति-धर्मार्थ-काम- दर्शनायुर्वेद-कोष-ज्योतिष-गणित-विज्ञानादय अनेके विषया अत्रान्तर्भूताः सन्ति। एषु विषयेषु नीतिशास्त्रस्यापि प्रशस्यस्थानमस्ति। नीतिशास्त्रे मानवानां नैतिकमूल्यबोधेन सह मानवतावादस्य प्रकाशनमपि

परिलक्ष्यते। अधुनाऽसारे संसारे मानवतावादस्य नितरामपकर्षो दृश्यते। मानवीयमूल्यबोधं परित्यज्य स्वप्रयोजनमेव परमा सिद्धिरिति मत्वा मनुष्या असारजीवनयापनं कुर्वन्ति। किं सत् किमसदिति ज्ञानं विवेचनं अकृत्वा ते सदा स्वार्थान्वेषणे सचेष्टाः भवन्ति। मनुष्याणामेवमसारे जीवने नीत्युपदेशो महौषधिसमः। अतः संस्कृतपाठ्यविषये छात्राणां कृते नीतिशास्त्रमपरिहार्यम्। तत्र बहुषु नीतिशास्त्रकारेषु समुपलभ्यमानेष्वपि तत्रभवतः आचार्यभर्तृहरेः स्थानं शीर्षमिति मन्यते विपश्चिद्भिः। संस्कृतवाङ्मये तस्य नीतिशतकम्, शृङ्गारशतकम्, वैराग्यशतकम् चेति शतकत्रयमतीव सुप्रसिद्धम्। त्रिलोकपावनीगङ्गा यथा हिमशिखरात् प्रोह्य आर्यावर्तस्य पुण्यभूमिं पूत्वा असीमसागरे निलीयते तथैव भर्तृहरेः शतकत्रयमपि नैतिकतायाः शुद्धाहारे किशोरवर्गस्य चरित्रं निर्माय यौवने सौन्दर्यप्रियतायाः राजमार्गमानीय वृद्धावस्थायां वैरागस्य वीरगतिं प्रदत्ते। तत्र नीतिशतकं तावदत्युज्ज्वलं रत्नम्। लोकव्यवहारमाश्रित्य नीतिसम्बन्धितेन श्लोकसंग्रहेण निर्मितमिदं मनोज्ञं मुक्तककाव्यम्। नीतिशतके नैतिकव्यवहारिकोपदेशानां भाण्डारोऽस्ति। किं बहुना, नैतिकोपदेशेनात्र मानवतावादोपयोगीनि बहुविधानि तत्त्वानि परिदृष्टानि। येषु विदुषां समादरता, वाग्भूषणम्, विद्या, सत्सङ्गः, परोपकारः, दानशीलता, प्रजापालनम्, अहिंसा चेत्यादिनि तत्त्वानि तावदन्यतमानि। एतैः तत्त्वैरेव मानवतावादो विकसितो भविष्यति, आधुनिकयान्त्रिकजीवने यस्य महान् उपयोगः सर्वथा अनुभूयते। विश्लेषणशैलीमाश्रित्येवं कतिपयतत्त्वानामालोचनमत्र नातिविस्तरेणोपस्थाप्यते।

### १. विदुषां समादरता

विद्वान् जनः खलु समाजस्य हितचिन्तकः। समाजस्य तथा देशस्य समृद्धौ विदुषां महती भूमिका अस्त। विद्वांसः जनाः सर्वदा मान्याः पूज्याः आदरणीयाः चेति। तेषां वाणी सदा युक्तिनिष्ठा सुचारु भवति। तेषां समीपे एव अनेके शिष्याः विद्याशिक्षालाभं कुर्वन्ति। अतः समाजे विद्वांसः खलु मानवनिर्मा-णस्य प्रकृतकारिगराः वर्तन्ते। समाजे तथा देशे तेषां प्रशस्यस्थानमस्ति। यथोक्तं सुभाषितग्रन्थैः -

**"स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।"**

अतएव प्रतिदेशं राज्ञा सर्वकारेण वा तेषां समादरः करणीयः। एषां प्राप्य-सम्मानमवश्यमेव दातव्यम्। यद्येवं नियमस्य व्यभिचारो दृश्यते तर्हि राज्ञः सर्वकारस्य वा मूढत्वं प्रतिपद्यते। सामाजिकी विशृङ्खला तत्र समुत्पद्यते। सम्प्रत्यस्माकं देशे विदुषां समादरता सम्यकतया नैव रक्षिता। विद्वान् बहुत्र स्वजनपोषणस्य (Nepotism) बलिपशुः भवति। कदापि एवं न काम्यः। अतएव सम्यगुक्तं श्रीमता भर्तृहरिणा-

**"शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमाः**
**विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः।**
**तज्जाड्यं वसुधाधिपस्य, कवयो ह्यर्थं विनापीश्वराः**
**कुत्स्याः स्युः कुपरीक्षका हि मणयो यैरर्घतः पातिताः।।**
**हर्तुर्याति न गोचरं, किमपि शं पुष्णाति यत्सर्वदा-**
**प्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम्।**
**कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं**
**येषां तान्प्रति मानमुज्झत नृपाः कस्तः सह स्पर्धते।।"**[1]

अर्थात् सुप्रसद्धाः विद्वांसः यदि निर्धनाः सन्ति चेत् तत्तस्य राज्ञो मूढत्वं यस्य राज्ये ते नवसन्ति। यथा बहुमूल्यानि रत्नानि यदि अल्पपरीक्षकै-रल्पमूल्यानि कृतानि चेत् तत्परीक्षका एव निन्द्या न तु तेन रत्नानां महत्त्वे किमपि न्यूनत्वमायाति। एवंप्रकारेण श्लोकद्वयेऽस्मिन् व्यञ्जनागर्भेण विदुषां समादरत्वं प्रतिपादितम्। यत् सर्वदेशे सर्वकाले च अवश्यमेवानुकरणीयम्। एवं सम्यक-तयानुकरणेन मानवतावादस्य पन्थाः प्रशस्तो भविष्यति।

### २. वाग्भूषणम्

मानवस्तावत् सङ्घबद्धः तथा सामाजिको जीवः। समाजे वसवास-कालेऽपरान् प्रति सुसम्पर्कोऽपि अत्यावश्यकः। सुमधुरवाग्व्यवहारेण एव सुसम्पर्कोऽयं सम्भवति। वस्तुतः सुवाक्येन शत्रुरपि मित्रता जाता। किं बहुना, सुप्रयुक्तः शब्दः कामधेनुतुल्यो भवति। यथोक्तं महाभाष्ये-

**"एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधूग् भवति।"**[2]

---

[1] नीतिशतकम् १५-१६

[2] पातञ्जलमहाभाष्यम्, प्रथमाह्निकम्

सुमधुरो वाग्व्यवहारः खल्वस्माकं संस्कृत्याः महानादर्शः। एतेन सौभातृत्वं समुद्भवति। नीतिशतकेऽस्य वाग्भूषणस्य महती प्रशंसा कृता। तत्रोक्तम्-

> **"केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः**
> **न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।**
> **वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते**
> **क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।"**[3]

अर्थात् शुद्धा वाणी यत् सौन्दर्यं जनयति तत् चिरस्थायि भवति। एवं वाग्भूषणं मनुष्याणां परमाभूषणम्। येन मनुष्याणां कालुष्यं निर्गत्य सौभातृत्वस्य भावः प्रकटितो, यो मानवतावादस्य महानुपकारकः।

**३. सत्सङ्गः**

व्यवहारदृष्ट्या संसारेऽस्मिन् मनुष्यद्वयं विद्यते- सज्जनः दुर्जनश्च। परन्तु नहि कोऽपि जनो जन्मना एव सज्जनो भवति नापि दुर्जनः। वस्तुतः संसर्गादेव जनाः सज्जनाः दुर्जनाश्च जायन्ते। यद्यपि जन्मना सह गुणदोषौ समागच्छतः, जन्मना एव च भिन्नभिन्नस्वभावाः उत्पद्यन्ते तथापि जीवनस्योपरि संसर्गस्यापि महान् प्रभावोऽस्ति। यो यादृशेन पुरुषेण सह सङ्गतिं करोति तस्य तादृश एव स्वभावो भवति। उपमाप्रयोगेन प्रसङ्गोऽयं विशदी-क्रियते नीतिशतके-

> **"स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते**
> **प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते।।"**[4]

दुर्जनैः सह संसर्गेण विशुद्धाऽपि बुद्धिः मलिनतामुपयाति। अपि च सतां सङ्गः हि भेषजम्। सत्सङ्गेन चरित्रं निर्मलं भवति। अतः यथाशक्ति सत्पुरुषा-णामेव सङ्गतिः कर्तव्या। यथोक्तं श्रीमता भर्तृहरिणा-

> **"जाड्यं धियो हरति, सिञ्चति वाचि सत्यं**
> **मानोन्नतिं दिशति पापमपाकरोति।**
> **चेतः प्रसादयति दिक्षु तनोति कीर्तिं**

---

[3] नीतिशतकम् १९

[4] तत्रैव ६७

**सत्सङ्गतिः कथय किं न करोति पुंसाम्।।"[5]**

अर्थात् सज्ञ्नसङ्गतिः जननां बुद्धिमान्द्यं हरति, सत्यतां वर्धयति, सम्मानं प्रददाति, पापकर्मणो निवार्य पुण्यं वर्धयति, चित्तप्रसादनं करोति दिक्षु च यशः प्रसारयति। एतएव सर्वार्थसाधकः खलु सत्सङ्गः। अधुना मानवजीवने सत्यता-सुबुद्धि-चित्तशान्ति-पुण्यादीनामभावो सर्वत्र लक्ष्यते। मानवतावाद-स्यावक्षये युगे नीतिशतकोक्ता सत्सङ्गतिरियं चेत् सम्यकतया परिपाल्यते तर्हि आदर्शमानवजीवननिर्माणं कठिनं न भविष्यति- इत्यत्र नास्ति सन्देहलेशः।

**४. परोपकारः**

मानवतावादस्य विकासे परोपकारस्यास्ति महती भूमिका। परेषां हिताय यत् यत् कार्यं क्रियते तत् सर्वं परोपकार इति कथ्यते। ये ये गुणाः मानवजीवनस्य महत्त्वं वर्द्धयन्ति तेषु परोपकारस्य प्रमुखं स्थानं वर्तते। परोपकारस्य भावना हि अन्तःकरणे पवित्रतामुत्पादयति, शुष्केऽपि हृदये स्नेहरसं प्रवाहयति, प्राणीमात्रे च भ्रार्तृभावं वर्द्धयति। परोपकारस्यास्य कथा नीतिशतके बहुत्र परिदृष्टा। यदा मदोन्मत्तः इन्द्रः हिमालयस्योपरि प्रहारमकरोत् तदा पक्षच्छेदनभयात् हिमालयपुत्रो मैनाकः पितरं परित्यज्य समुद्रे आत्मगोपनमकरोत्। नीतिशतककारदृष्ट्या कार्यमिदमतीव निन्दितम्। यथोक्तं नीतिशतके-

**"वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-**
**प्रहारैरुद्गच्छद्बहुलदहनोद्गार गुरुभिः।**
**तुषाराद्रेः सूनोरहह पितरि क्लेश विवशे**
**न चासौ संपातः पयसि पयसां पत्युरुचितः।।"[6]**

अर्थात् प्रकारान्तरेणात्र परोपकारस्य भावना हि चित्रिता । तथा च परोपकारस्य गरिमा कदापि न करणीया। परन्तु परोपकारस्य कृतज्ञता सर्वदा परिपालनीया। इत्येवं महती शिक्षा नीतिशतके परिप्राप्यते-

**"प्रदानं प्रयच्छन्नं गृहमुपगते सम्भ्रमविधिः**

---

[5] तत्रैव २३

[6] नीतिशतकम् ३६

**प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः।"**[7]

परोपकारिणां विचित्रस्वभावो दृश्यतेऽस्मिन् जगति। फलशालि वृक्षवत् सजलमेघवच्च ऐश्वर्यवन्तः सज्जनोऽपि नम्रो भवति। एवं नम्रता परोपकारिणां स्वभावसिद्धो धर्मः। तथोक्तं नीतिशतके-

**"भवन्ति नम्रास्तरवः फलोद्गमै-र्नवाम्बुभिर्दूविलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्।।"**[8]

एवं परोपकारः मानवतावादविकासेनस्यैकः प्रशस्तः मार्गः।

**५. विद्या**

मानवजीवने विद्यायाः महत् गुरुत्वं वर्तते। संसारे बहुनि वस्तूनि सन्ति परं तेषु सर्वश्रेष्ठमस्ति विद्या एव। केवलं जन्मना मनुष्यः मनुष्यो न भवति अपि तु विद्यया एव भवति। विद्यया हीना मनुष्या मनुष्यरूपं धृत्वाऽपि पशुवदाचरणं कुर्वन्ति। किं कर्तव्यम्, किमकर्तव्यम्, को धर्मः, कोऽधर्मः, कः सन्मार्गः, कोऽसन्मार्ग इत्येवं ज्ञानं विद्यया एव समुत्पद्यते। विद्याऽज्ञानं विनश्य ज्ञानालोकं प्रददाति। अतएव विद्या सर्वेषु वस्तुषु अपि श्रेष्ठं वस्तु मन्यते। हितोपदेशेऽपि इत्येवमुक्तम्-

**"सर्वदर्व्येषुविद्यैव द्रव्यमाहुरनुत्तमम्।**
**अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा।।"**[9]

विद्यारूपं वस्तु मनुष्यस्य श्रेष्ठं स्वरूपं सुगुप्तं च धनम्। भोगैश्वर्ययशःप्रदा, गुरुभिरपि पूज्या, विदेशे वान्धववत् सहायिका, सर्वोत्तमा देवता च विद्यैवास्ति। नृपेषु विद्यैव पूज्यते न तु धनम्। अतः विद्याहीनो नरः पशुरेव गण्यते। यथोक्तं नीतिशतके-

**"विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्**
**विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।**
**विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं**

---

[7] तत्रैव ६४

[8] नीतिशतकम् ७१

[9] हितोपदेशः, मित्रलाभः, कथामुखम्

**विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः।।''[10]**

दोषरहिता विद्या सर्वत्र पूज्या सर्वेषां च कामनीया। तथोक्तं श्रीमता भर्तृहरिणा-

**''किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्यानवद्या यदि**
**व्रीडाचेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम्।।''[11]**

एवं कल्पलतेव विद्या मनुष्याणामज्ञानं तथा कालुष्यं दुरीकरोति। सर्वजीवान् प्रति सौभातृत्वं प्रदर्शयति। मानवतावादस्य विकासने या उत्तमः पन्थाः।

**६. दानशीलता**

भारतीयसंस्कृतौ दानस्य महती गरिमा वर्तते। परिवर्तिनि संसारे सर्वानां वस्तूनां विनाशः सम्भवति। परन्तु यशस्तावत् चिरस्थायि। दानादिकार्यैरेव यशः समुत्पद्यते वर्धते च। दानं हि मनुष्याणां प्रशस्तो धर्मः। सामर्थ्यानुसारेण योग्यपात्रे सदा दानं कर्त्तव्यम्। वस्तुतस्तु दानकार्ये धनस्यापि महानुपयोगो वर्तते। यस्य धनमस्ति तस्यैव दानं शोभते। पुरुषार्थचतुष्टयस्य मध्येऽर्थस्य धनस्य वा महत् स्थानमस्ति। अतएव सन्मार्गेण धनोपार्जनमपि करणीयम्। तथा च धनस्य रक्षणावेक्षणं नापि सुकरम्। धनं दातव्यं भोक्तव्यं चान्यथा चौर्यादिना तस्य नाशो भवति। यथोक्तं नीतिशतककारेण-

**''दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।**
**यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति।।''[12]**

अर्थात् यो पुरुषो धनं योग्यपात्रे न ददाति स्वयं वा न खादति तदीयधनस्य विनाशो भवति। किं बहुना दानकार्ये यदि कोऽपि जनः दारिद्र्यमुपजायते तर्हि सः सदालंक्रियते। एवमेवोक्तं नीतिशतके-

**''कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता**
**तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु जनाः।।''[13]**

---

[10] नीति.२०

[11] नीतिशतकम् २१

[12] तत्रैव ४३

[13] तत्रैव ४४

अतएव नीतिशतककारेणापि दानस्य महिमा सर्वथा स्वीकृता। समाजे ईदृशी भावना यदि सर्वे मनुष्याः परिपाल्यन्ते तर्हि मानवतावादस्य विकासो दुर्गमो न भवति।

**७. प्रजापालनम्**

समाजस्य तथा देशस्य विकासे प्रजानामस्ति महती भूमिका। प्रजा हि देशस्य धात्री वाहिका च। राज्ञा पालितो जनसमूहस्तावत् प्रजा इत्युच्यते। वर्तमाने युगे प्रजा सर्वकारेण परिचालिता। राज्ञः सर्वकारस्य वा प्रजापालनं तु सम्यकतया करणीयम्। प्रजानां समृद्धिनैव राज्यस्य देशस्य च समृद्धिः निर्भरशीलाऽस्ति। प्रजारञ्जकः राजा एव सर्वथा पूज्यते। सर्वकारस्य स्थितिरपि प्रजानामुपरि निर्भरशीला। प्रजानुरञ्जकराजावत् प्रजापालकराष्ट्रनेताऽपि विश्वे सततं समादृतो भवति। अधुना विश्वे प्रजापालकस्य राष्ट्रनेतुः महानभावो दृश्यते। येन तेन प्रकारेण स्वार्थसिद्धिरेव तेषां परमं लक्ष्यम्। परन्तु यदि प्रजानां सम्यकतया परिपाल्यते तर्हि धरित्री कल्पलतैव फलं प्रदत्ते। एवं नीत्युपदेशो वयं नीतिशतके पश्यामः-

> **"राजन् ! दुधुक्षसि यदि क्षितिधेनुमतां,**
> **तेनाद्य वत्समिव लोकममुं पुषाण।**
> **तस्मिंश्च सम्यगनिशं परिपोष्यमाणे**
> **नानाफलैः फलति कल्पलतेव भूमिः।।"**[14]

अर्थात् यथा वत्सेषु पोष्य पुष्टीकृतेष्वेव गौर्दुग्धं वितरति तथैव रत्नगर्भायाः भुवः समृद्धिरभिलष्यते चेत् तर्हि प्रजा सम्यक् रक्षणीया। प्रजाहितेनैव राजा कृत्यादि फलं लब्धुं शक्यते। एवं प्रजापालने राज्ञा सर्वकारेण वा सह प्रजानामपि मानवतावादस्य विकासो भविष्यति। नीतिशतकेन एवं शिक्षा प्राप्यते।

**८. अहिंसा**

संसारे यदि मनुष्यः सुखं वाञ्छति तर्हि सदाऽहिंसा पालनीया। परेषामहितचिन्तनं तावत् हिंसा। एवं हिंसायाः परित्याग एव अहिंसा

---

[14] नीतिशतकम् ४६

इत्युच्यते। मानवजीवनेऽहिंसायाः माहात्म्यं सर्वत्र प्रगीतम्। यथोक्तं हितोपदेशे- **"अहिंसा परमो धर्मः।"**[15]

नीतिशतकेऽपि अहिंसायाः सूरं सदा प्रतिध्वनितम्। कल्याणमार्गस्य उपस्थापने श्रीमता भर्तृहरिणा उक्तम्-

**"प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्वाक्यं**
**काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम्।**
**तृष्णास्रोतविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा**
**सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः।।"**[16]

श्लोकेऽस्मिन् अहिंसायाः महत्यनुभूतिः सर्वत्र परिदृष्टा। अत्र जीवहिंसा-निवारणस्य कथा वर्णिता। कदापि कुत्रापि मनुष्याणां जीवहिंसा न करणीया। परमात्मा सर्वेषु जीवेषु एव विद्यमानोऽस्ति। तथाच परधने लोभोऽपि अकरणीयः। एतादृशो भाव ईशोपनिषदि अप्युक्तः-

**"ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जिथा मा गृध कस्यस्विद् धनम्।।"**[17]

सर्वभूतान् प्रत्यनुकम्पा सदानुसरणीया। किं बहुना सर्वशास्त्रे समभावोऽपि पालनीयः। इत्येवं महानुपदेशो नीतिशतकस्य श्लोकेऽस्मिन् सम्यकतया परि-प्राप्यते। मानवतावादवर्धने यस्योपदेशस्य महती भूमिका वर्तते।

### उपसंहृतिः

संस्कृतनीतिशास्त्रपरम्परायां भर्तृहरिप्रणीतस्य नीतिशतकस्य गौर-वास्पदस्थानमस्ति। मानवजीवनादर्शस्य समुन्नतेर्यानि कल्याणकारीणि उपादानानि सन्ति, तेषां बीजानि तु नीतिशतके एव निहितानि। मानवता-वादस्यापि आदर्श-मानवजीवन-विनिर्माणे महती भूमिका विद्यते। मानवता-वादेनाखिले विश्वे सौभ्रातृत्वभावस्योजागरो भवेत्। अधुना यस्य महान् उपयोगोऽनुभूयते। अस्य महतः मानवतावादस्य विकशितानि बहुविधानि तत्त्वानि यत्र तत्र समुपलभ्यन्ते नीतिशतके। तेषु विदुषां समादरता, विद्या,

---

[15] हितोपदेशः १/६६

[16] नीतिशतकम् २६

[17] ईशोपनिषद् १

वाग्भूषणम्, परोपकारः, विद्या, दानशीलता, प्रजापालनम्, अहिंसा चेति तत्त्वानि सम्यकतया प्रतिफलितान्यत्र। वर्तमानसमयेऽखिले विश्वे मानवतावादस्य चरमापकर्षो दृश्यते। येन केन प्रकारेण स्वार्थसिद्धिरेव परमा सिद्धिरिति मन्यन्ते मनुष्याः। फलस्वरूपेण मानवतावादो नाम विषयः सदा कलुषितो जातः। अत्र नीतिशतकोपदेशः हि महौषधिसमः। नीतिशतके प्राप्तोऽयमुपदेशः यदि सम्यकतया परिपाल्यते संसारे तर्हि वयं अचिरेणैव मानवतापूर्णसंसारं पश्यामः- इति वक्तुं शक्यते।

**सहायकग्रन्थसूची**


- उपाध्याय, बलदेव (१९८५)। *संस्कृत साहित्य का इतिहास*। वाराणसी: शारदा निकेतन।
- पाण्डेय, जनार्दनशास्त्री सम्पादकः(२०१८)। *नीतिशतकम्*। दिल्ली: मोतिलाल बनारसीदास।
- नारायण राम सम्पादकः(१९५१ विक्रमसंवत्)। *हितोपदेशः*। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान।
- राव, वेंकट (१९७७)। *श्री भर्तृहरि शतकत्रय*। दिल्ली : श्रीराम प्रिंटर्स।
- शास्त्री, राकेश सम्पादकः(१९९६ )। *नीतिशतकम्।* दिल्ली : परिमल पब्लिकेशन्स।


*********

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५
ISSN: 0975-1769 UGC CARE ID:101000019

# धर्मस्य सामाजिकव्याख्या

**डॉ. सुबोधकांत मिश्र**
सहायक अध्यापक
इंडस यूनिवर्सिटी, अहमदाबाद
(Sub ID- CSU/SV-214)

**शोधसारः** - *धर्मः, समाजस्य नैतिक-सांस्कृतिक-आध्यात्मिक-आयामान् परिभाषयति। धर्मः इति महत्त्वपूर्णा अवधारणा अस्ति। सामाजिकदृष्ट्या धर्मः न केवलं व्यक्तिगतजीवनस्य मार्गदर्शनं करोति, अपितु सामूहिकचेतनायाः सामाजिक-संरचनायाः च आकारं ददाति। धर्मस्य सामाजिकव्याख्याने धर्मः समाजस्य नैतिक-मूल्यानि, आचारसंहिता, सामाजिकप्रक्रिया च कथं प्रभावितं करोति इति अवगन्तुं प्रयत्नः क्रियते ।*

*सामाजिकदृष्टिकोणे धर्मः "सामाजिकस्थिरतायाः" माध्यमः इति मन्यते । तस्य मते धार्मिकसंस्काराः, सामूहिकक्रियाः च समाजे एकतां, सौहार्दं च प्रवर्धयन्ति। अपरपक्षे धर्मस्य सामाजिकपरिवर्तनस्य च सम्बन्धः रेखाङ्कितः अस्ति। सः धार्मिकप्रत्ययानां आर्थिकप्रक्रियाणां च परस्परसम्बन्धं स्पष्टीकृतवान्।*

*भारतीयपरिप्रेक्ष्ये जातिव्यवस्था, पारिवारिकसंरचना, सामाजिकदायित्व-निर्धारणे धर्मस्य महती भूमिका अस्ति। यथा मनुस्मृतिवेदयोः उल्लिखिताः सामाजिकनियमाः कर्तव्याः च भारतीयसमाजस्य धर्मस्य च मध्ये गहनं प्रभावं दर्शयन्ति।*

*आधुनिकदृष्टिकोणे वैश्वीकरणस्य आधुनिकतायाः च युगे धर्मस्य भूमिका परिवर्तमाना वर्तते। वैज्ञानिकचिन्तनस्य धर्मनिरपेक्षतायाः च प्रभावेण पारम्परिक-धर्मप्रत्ययाः प्रामुख्यं भजन्ते। तथापि धर्मः सांस्कृतिकपरिचयस्य नैतिकमार्ग-दर्शनस्य च प्रमुखं स्रोतः एव तिष्ठति।*

**कूटशब्दाः** - धर्मः, सामाजिक-एकता, नैतिक-मूल्यानि, सामाजिकसंरचना, धर्म-निरपेक्षता, वैश्वीकरण, जाति-व्यवस्था, धार्मिक-संस्कार ।

अथातो धर्म जिज्ञासा। धर्मं ज्ञातुमिच्छाद्य सर्वत्रैव व्याप्ता वर्तते। साम्प्रतलोकजीवने धर्मः इति शब्दोऽयं सामान्योऽभवत्। अद्य यूरोपीय-भाषास्वपि धर्मशब्दः स्थानं गृहीतवान्। इदं बहुकथितं धर्मः नाम कः? अस्यार्थः कः? न्यायनीत्या सह धर्मस्य कः सम्बधः वर्तते? अन्ततः धर्मः पापपुण्ययोरवधारणास्ति वा? सामान्यलोकजीवने एवं चाद्यतनीये लोक-तान्त्रिके जीवने तस्य प्रासङ्गिकता काऽस्ति? धर्मः सेक्युलरिजम उभौ विलोमौ स्तः वा? एतादृशाः बहवः प्रश्नाः लोके तरूणप्रौढानां मनस्सु आयान्ति। उदाहरणमस्ति- धर्म एव हतो हन्ति, धर्मो रक्षति रक्षितः। यस्यार्थोऽस्ति रक्षितः धर्मः रक्षति, हतः धर्मः हन्ति। एतादृशी एवैका पङ्क्तिः इत्थमस्ति 'यतो धर्मस्ततो जयः'।[1] यत्र धर्मः, तत्र जयः।

अष्टाक्षरीयं पंक्तिः संपूर्णे भारतवर्षे भाषाभेदे सत्यपि सुप्रचलिता पङ्क्तिरभवत्। इदं महाभारतेतिहासस्य योगदानमस्ति तस्मिन् अमूल्यग्रन्थे १२-१५ वारं पङ्क्तिरियं कस्यापि भजनगानस्य धावपदवदायाति केवलमुदाहरणाय सूची अपूर्णा उद्योगपर्वणि कर्णः श्रीकृष्णात्[2], द्रोणाचार्यः दुर्योधनात्[3], भीष्मपर्वणि भगवतः व्यासात् धृतराष्ट्रः[4], अर्जुनः युधिष्ठिरात्[5], संजयः

---

[1] यतो धर्मस्ततो जयः विदित मे
हृषीकेश यतो धर्मस्ततो जयः।
(उद्योगपर्व-१४३-३६)

[2] क्षपयिष्यसि नः सर्वान् स सुव्यक्तं महारणे
विदित में हृषीकेश यतो धर्मस्ततो जयः।
(उद्योगपर्व-१४३-३६)

[3] अश्वत्थामा यथा महा तथा श्वेतहयो मम।
बहुना कि प्रलापेन यतोधर्मस्ततो जयः।
(उद्योगपर्व-१४८-१६)

[4] दिष्टमेतन्नरव्याघ्रनाभिशोचितुमर्हसि
न चैव शक्य संयन्तु यतो धर्मस्ततो जय
(भीष्म पर्व-२-१४)

[5] व्यक्त्वा धर्म च लोमं च मोह चोद्यममास्थिताः
युद्धयध्वमनहंकारायतो धर्मस्ततो जयः।
(भीष्मपर्व- २१-१५ )

धृतराष्टात्[6], भीष्मः दुर्योधनात्[7], द्रोणाचार्यपर्वणि व्यासः युधिष्ठिरात्[8], शल्यपर्वणि माता गान्धारी दुर्योधनात्[9], अनुशासनपर्वणि भीष्मः श्रीकृष्णात्[10], तस्याप्रतियशाश्वतसत्यस्य पङ्क्तिं कथयन् दृश्यते।

इत्थमेव सुघोषितमं वाक्यमस्ति, 'सत्यं वद धर्मं चर'- सत्यं ब्रूयात्, धर्मस्याचरणं कुर्यात्। एतस्य स्रोतः तु न जाने परं च एतत्सर्वे जानन्ति। अयं विद्यापूर्त्याः अनन्तरं गुरुकुलात् स्वगृहं प्रत्यागन्त्रे तरूणाय गुरुणा प्रदत्तः मूल्यवान् आदेशोऽस्ति। तथा संपूर्णं भारतं तम् आदेशं सम्यक्तया जानाति ।

---

[6] नते युद्धनिवर्तन्ते धर्मोपेता महाबला
श्रिया परमया युक्ता यतो धर्मस्ततो जय। (भीष्मपर्व-६५-१६)

[7] राजन् सर्वमयोह्योष समोरागविवर्जितः
यतः कृणस्ततो धर्मो यतो धर्मस्ततो जयः। (भीष्मपर्व-६६-३५)

[8] अनुशंस्यं तपो दानंक्षमां सत्यं च पाण्डव
सेवेथा परमप्रीतो यतो धर्मस्ततो जयः
इत्युक्त्वा पाण्डवं व्यासस्तत्रैवान्तरधीयता (द्रोणपर्व-११-१८३-६६-६७)

[9] दुर्योधनस्त्वया चोक्तो जयार्थी पुरुषं वचः
श्रृणु मूढ़ वचो मह्यं यतो धर्मस्ततो जयः। (शल्यपर्व-६३-६२)
उक्तास्यष्टादशाहानि पुत्रेण जयभिच्छता
शिवमाशास्त्र मेंमातर्युध्यमानस्य शत्रुभिः।। (स्त्रीपर्व १४-८)
सा तथा याच्यमाना त्वं काले काले जयैषिणा
उक्तवत्यसि गान्धारि यतो धर्मस्ततो जयः। (स्त्रीपर्व - १४-६)
क्षमाशीला पुरा भूत्वा साद्य न क्षमसे कथम्
अधर्म जहि धर्मज्ञे यतोधर्मस्ततो जयः।। (स्त्रीपर्व - १४-१२)
मामयं प्राह वार्ष्णेय प्राञ्जलिर्नृपसत्तमः
अस्मिन्ज्ञातिसमुद्धर्षे जयमम्बा ब्रवीतु में। (स्त्रीपर्व - १७-६)
इत्युक्ते जानति सर्वमहं स्वव्यसनागमम्
अब्रवं पुरुषव्याघ्र यतो धर्मस्ततो जयः।।
(स्त्रीपर्व - १७-७)

[10] रक्ष्याश्च तेपाण्डवेया भवान् येषां परायणम् उक्तवानस्मि दुर्बुद्धिं मन्दं दुर्योधनं तदा।।
'यतः कृष्णस्ततो धर्मो यतो धर्मस्ततो जयः वासुदेवेन तीर्थेन पुत्रसंशाम्य पाण्डवैः।।
संघातस्य परः कालस्तवेति च पुनः पुनः
न च मेतद्वचो मूढः कृतवान् स सुमन्दधीः
(अनुशासन-भीष्म स्वर्गारोहणपर्व- १६७-४०-४२/

भारते धर्मस्य महत्वं सर्वे मन्यन्ते। एतन्महत्वं न केवलं सैद्धान्तिकस्तरे, अपितु जीवनस्य मूलाधारोऽपि। तस्य प्रस्तुतीकरणाया-स्माकं पूर्वजाः अस्माकं समक्षे धर्मस्य मूर्तिमन्तरूपपुरुषरत्नानि प्रदत्तवन्तः। महर्षेः वाल्मीकेः प्रश्नस्य समाधानं कुर्वन् महर्षिनारदः स्पष्टतया कथयति यत् दशरथनन्दनरामः धर्मज्ञोऽस्ति। ते धर्मस्य परिरक्षकाः, स्वस्य तथा च स्वजनानां धर्माणां संरक्षकाः सन्ति।[11]

**धर्मस्य व्युत्पतिः-**

धर्मशब्दस्य मूलधातुः धृ अस्ति यस्यार्थोऽस्ति, धरणम्, धारणम्, ग्रहणम्, स्थापनकरणम्, ग्रहणं कृत्वा परिरक्षणम्। शब्दकल्पद्रुमः इति शब्दकोशः धर्मस्य व्याख्यां करोति 'धरति लोकान्, यः सर्वान् भुवनान् धृत्वा अभिरक्षति सः धर्मः। तस्यानुसारं धर्मः सः यः ध्रियते लोकोऽनेन, धरति लोकं वा'। इति ।

धर्मस्य व्युत्पत्तौ यत् कथितम्- धरति लोकान् अथवा धरति लोके वा तदस्य प्रकारकस्य धारणमस्ति। केवलं दैहिकहस्तस्यावलम्बनं न अपितु विश्वसृजनस्य पश्चाद्वर्तिनी स्थितिः परिपालनमस्ति। तस्मिन् सृष्टेः दृढता, भद्रता, रक्षणम् पालनम् पोषणादि अभिप्रेताः सन्ति। अतः कथितमस्ति-धारणात् धर्मः। वैदिक संहितासु धर्मशब्दात् ऋतम् शब्दः अधिकतया प्रयुक्तोऽस्ति। ऋग्वेदे धर्मशब्दः ५६ वारभागतोऽस्ति। धारणम् धर्मः इति कथितः।

बृहदारण्यकोपनिषद् कथयति[12] यत् तेन कल्याणस्वरूपधर्मस्य अभिसृष्टिः विहिता। अतः धर्मादुत्कृष्टं किमपि नास्ति, सः यः धर्मोस्ति, निश्चितं सत्यमस्ति। सूर्यमण्डलस्योदाहरणं स्वीकुर्मश्चेत्- पृथिवी सूर्यस्य परिक्रमणं करोति। चन्द्रः पृथिव्याः परिक्रमणं करोति। अन्ये ग्रहाः अपि इत्थमेव सूर्यस्य परिक्रमणं कुर्वन्तः भवन्ति। तस्यैका निश्चिता समयसारिणी

---

[11] धर्मज्ञः धर्मस्य परिरक्षिता रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता।
(वाल्मीकी रामायण-बालकाण्ड-१ सर्ग-१२-१३)

[12] तस्मात् धर्मात परं नास्ति यो वै स धर्मः सत्यं व तत् (ब्रहदारण्यकोपनिषद् ३१-४-१४)

भवति। यथा मन्दस्य परिक्रमणं त्रिंशत् वर्षेषु पूर्णं भवति। तथा गुरुग्रहस्य १२ वर्षेषु। इदं संपूर्णसूर्यमण्डलं सृष्टेः आरभ्य अधुना यावत् पूर्णतः तालबद्धं, कालबद्धं, सूत्रबद्धं, चलति। अस्य वैश्विक सामञ्जस्यस्य शाश्वतायाः क्षमतायाः नाम प्रकृतिधर्मः अस्ति। धर्मेण विना अयं सम्भवः नास्ति। धर्मेणैव संपूर्णः सृष्टिजालः आबाधितोऽस्ति। जलस्य स्वस्य धर्मः भिन्नः धर्मोऽस्ति। तेन विना तस्य अस्तित्वं समाप्यते तथा जगतः तस्य विद्यमानतापि। यथाग्नेः धर्मोऽस्ति उष्णता। यदि कश्चन अग्निसदृशः वस्तु प्रदर्शयति पुनश्च यदि तस्मिन् उष्णता न स्यात्, केवलं प्रकाशः स्यात् तर्हि वयं कथयिष्यामः यत् सः अग्निः नास्ति, पृथिव्याः धर्मोऽस्ति सर्वेभ्यः आधारप्रदानकरणम्। यदि पृथिवी तं धर्मं त्यजति तर्हि इमे सर्वे शब्दाः अर्थहीनाः भविष्यन्ति।

अस्माकं पूर्वजद्रष्टारः कथयन्ति यत् धर्मः एवास्ति सर्वेषामधिष्ठानम्, धर्मे एव सर्वं प्रतिष्ठितमस्ति, अतः धर्मः महत्तमः कथ्यते। धर्मः सर्वेषां सुस्थिरतायै तथा च संधारणायाऽस्ति।[13] तस्य परिधौ मानवः तथा मानवेतरः समानाधिकारेण समाविष्टोऽस्ति। भीष्मपितामहः धर्मपुत्रं प्रति अवबोधयन् कथयति। यत् सर्वान् संगृह्य तेषामभिरक्षणम् धर्मः अस्ति। तेन संपूर्णं जगत् एकस्मिन् सूत्रे बन्धयते। यः सर्वान् योजयति सः धर्मः।[14]

संपूर्णे संसारे, सचेतानाचेतनयोः यः समानधर्मोऽस्ति, तेनैव सह मानवे विशेषश्रेण्याः धर्म एव अभिव्यक्तोऽभवत्। मानवे आधारितः लौकिक-धर्मः तथा अन्तरङ्गाधारितः अलौकिकधर्मः अभिव्यक्तोऽभवत्। सामान्य-निर्विशेषः नाम प्रकृतिः तेषां असामान्यः सविशेषः धर्मः कथ्यते। सः विचारणीयावसरे योग्येन ऋषिवरेण एवं कथितम् - खादनम्, पानम्, शयनम्, भयम्, भोगादिपशुमानवयोः समाना प्रकृतिरस्ति। या पशुषु नास्ति किन्तु मनुष्येषु वर्तते साऽस्ति धर्मस्य भावना।

---

[13] धर्मो विश्वस्य जगत प्रतिष्ठा धर्मे सर्व प्रतिष्ठितं तस्मात् धर्म परम वदन्ति।"
(महानारायणोपनिषद्-७६-७)

[14] धारणाद्धर्ममित्याहुः धर्मेण विधृता प्रजा
यः स्याद धारणसंयुक्त स धर्म इति निश्चयः।। (महाभारत शान्तिपर्व १०९-११)

अतः धर्महीनः मनुष्यः पशुसमानः भवति।[15]

धर्मस्य संबन्धः एकेन एव नास्ति अपितु अनेकैः अस्ति। घोरे विशाले कानने यदि एक एव मानवः वसति तर्हि तस्य कः धर्मसम्बन्धः? तस्य धर्मः केवलं नरप्राणिवत् तथा आरण्यवासीनामन्येषां पशुवदस्ति। यः मानवधर्मः कथ्यते, सः मानवः तस्मात् धार्मात् अनभिज्ञः भविष्यति। यतो हि तत्र मानवाः विद्यमानाः न सन्ति।

**धर्मः तथा अधिशासनम्-**

धर्मस्येका विशेषताऽस्ति- सः स्वचालकोऽस्ति । तस्य कृते बहिष्ठात्प्रेरणा नावश्यकी भवति।[16] विकसितं हृदयं प्रबुद्धं मनः, एतयोर्धर्मः स्वयं चलनशीलो भवति। तस्माद्यः आनन्दः अनुभूयते स एव तस्योर्जा। परञ्चाधिशासनम् स्वभावं इतः भिन्नः अस्ति। अधिशासने स्वयंसंचालन-क्षमता नास्ति। अधिशासनं केवलं स्वस्यविषये चिन्तयति। परंच धर्मः अन्येषां विषयेऽपि चिन्तयति। अधिशासनं व्यक्तिकेन्द्रितं भवति। धर्मः समूहकेन्द्रितं भवति। धर्मः अपौरुषेयोऽस्ति। अधिशासनम् प्रशासकीय-मस्ति। धर्मस्य प्रेरणा परिस्थितिनिरपेक्षाऽस्ति। अधिशासनस्य प्रेरणा परिस्थितिसापेक्षा भवति। धर्मः अकरणीय कृत्यानि न कारयति, अधिशासनमकरणीयकृत्ये कृते सति दण्डं ददाति। सन्मार्गे धर्मः अग्रसरं करोति, कुमार्गे च अधिशासनं दण्डविधानं विदधाति। धर्मस्य पूरकमस्ति अधिशासनम्। प्रशासनं भवेत् न वा धर्मस्य सत्ता भविष्यति। प्रशासनं यदि नास्ति तर्हि अधिशासनस्य हानिः भविष्यति। धर्माधिशासयोः तुलना नास्ति। उभौ अद्यतनीयकाले सुखिजीवनाय आवश्यकौ स्तः। परञ्च इदं निर्विवादमस्ति यत् मूलतः धर्मः अधिशासनात् प्रभावितो भवति तथा च परिणामकारी च भवति। धर्मः सूर्यः अस्ति चेत् अधिशासनम् दीपकः।

---

[15] आहार-निद्रा-भय- मैथुनं च सामान्यमेतत् पशुभिर्नराणां धर्मो हितेषामधिकोविशेषः धर्मेण हीना पशुभिः समानाःधृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः घी विद्या सत्यमक्रोधः दशकं धर्मलक्षणम्।। (मनुस्मृति ६-६२)

[16] असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मा अमृतं गमय- बृहदारण्यक- (१-३-२८)

जीवने द्वयोरपि भूमिका महत्त्वपूर्णाऽस्ति। धर्मः न कश्चन् दृश्यवस्तु वर्तते न च स्पृश्यवस्तु अस्ति। धर्मस्तु तत्त्वम् अस्ति। सर्वेषां तत्त्वानां सदृशमेव सः निराकारोऽस्ति। प्राणवतः मानवस्य माध्यमेनैव सः साकारः भवितुं शक्यते। धर्मः ये सफलं सक्षमञ्च ये निर्मान्ति तेषां गुणानां स्रोतः मानवोऽस्ति। नैतिकता धर्मस्य पर्यायवाची शब्दोऽस्ति। चौरकार्यादिविकृष्ट कृत्यान् दूरीकरणाय प्रशासनैः योग्याः नियमाः निर्मितास्सन्ति। अतः धर्मस्य एकः नाम विधिरपि अस्ति। धर्मः अर्थात् दानम्। धर्मस्यार्थः नैतिकता, दानकरणम्, कर्तव्यपरायणता नियमाः, करुणा, सेवा, शुश्रुषा परोपकारादि अभवत्। तेलगु, कन्नड, तमिलु, मलयालम एतेषां शब्दाः सन्ति- हिन्दुमतम्, क्रिस्तुमतम्, मुस्लिममतम्, जैनमतम्, बुधमतम्, शैव-मतम्, वैष्णवमतम् इत्यादयः । ये पन्थाः सम्प्रदायाः वा अद्य धर्मनाम्ना ज्ञायन्ते ते वास्तविकतायां मताः सन्ति। मतस्य उद्गमस्थानं कश्चन पुरुषविशेषः भवति। अतः मतम् पौरुषेयमस्ति तथा धर्मः अपौरुषेयोऽस्ति। दक्षिणस्य भाषासु हिन्दूनाम् ईसाइकरणं धर्मान्तरं न कथ्यते। अपितु मतान्तरं कथ्यते। ये सेकुलर धर्मनिरपेक्षः न भवति। अपितु मतनिरपेक्षः कथ्यते। रिलीजियस fanaticism इयम्मतान्धाता भवति। पंथसंप्रदाय-संबन्धितप्रवचनानाम् मतप्रभाषणं कथ्यते।

किन्तु धर्मसम्बद्धः सुविदितः गीतोपदेशः गीतोद्घोषः यदा-यदा हि धर्मस्य भाषान्तरिते कृते सति कश्चन आचार्यः धर्मग्लानि शब्दोऽयं मनग्लाम्यै तथा धर्मरक्षणाय एवंच धर्मसंरक्षणाय मतसंरक्षणम् मैव कथ्यते। तत्र ते धर्मस्यैवाचरण प्रयोगं वा कुर्वन्ति। मतम् धर्मश्च भिन्नौ शब्दौ मन्येते। वयं सर्वे मन्यामहे महाभारतस्य युद्धःधर्मयुद्धमासीत्। अत्रधर्मस्य संकेतः कः? पंथसंप्रदायौनैवास्तम्। पक्षद्वयमेव एकस्यैव सम्प्रदायस्य, एकस्यैव कुलस्य। यदि धर्मस्यार्थः संप्रदाय स्यातर्हि धर्मयुद्धःकथम्? धरति लोकान् यः धर्म आसीत् सः आपात्काले आसीत्। तस्य संरक्षणाय धर्मसंस्थाप-नार्थाय यस्यावतारोऽभवत्, तस्यैव नेतृत्वे युद्धमभवत्। अतः धर्मयुद्धः अभवत्। वास्तविकतायां धर्मः मनात् व्यापकोऽस्ति, इनः अधिष्ठानोऽस्ति। धर्मः समावेशात्मको भवति। मनुस्मृतौ मनुना भणिताः परिभाषिताः धर्मलक्षणानि मानवतया संबन्धितानि सन्ति।

तानि लक्षणानि- धृतिः धैर्यम्, क्षमा, दमः, अस्तेयः, शुचिता, इन्द्रियनिग्रहः, धीः विद्या, सत्यम्, अक्रोधाः। धर्मसाहित्येषु इत्थमेव धर्मस्यासंख्योल्लेखाः वर्तन्ते। भीष्मपितामहः युधिष्ठिरं प्रति कथयति[17]- यः सर्वेषां भूतानां बन्धुः अस्ति, सर्वभूतेष्वेकात्योऽस्ति स एव धर्मयुक्तः कथ्यते। पुरातनानां कवि-वराणामनुसरणं कुर्वन्तः वयमपि कथयितुं शक्नुमः यत्- धर्मेण मतम् च मतेन धर्मः धर्मेण मतेन संयाति नरः। उभौ परस्परौ पुष्टिकारकौ स्तः। मतम् पन्थः वा उपासनासंबन्धी, साधानासंबन्धी, आचारविचाराणामादेश निर्दे-शाणाञ्च निर्धारितपरिक्रमाऽस्ति। धर्मः मतंच भिन्नः-भिन्नः शब्दद्वयमस्ति। अस्यार्थः इदं नास्ति यदनयोर्मध्ये कश्चनापि संबन्धाः नास्ति, वास्तविकतायां एतयोः अत्यन्तं निकटतायाः संबन्धोऽस्ति।

अतः धर्मः जीवनस्य विषये केवलमिहलोकस्यैव विचारं न करोति अपितु धर्मेण परलोकस्यापि विचारः विधीयते । अयमेव कथ्यते अधर्मात्मः। श्रीमद्भगवद्गीतायाः भाष्ये श्रीमद्शंकराचार्यः कथयति यत् धर्मः जगतः स्थितेः हेतुरस्ति।

जगतः स्थितीकरणम् सधर्मेव प्राणिनां अभ्युदयानिःश्रेयस हेतुः अस्ति। अभ्युदयस्यार्थोऽस्ति। अस्मिन् भौतिकजगति प्रगतिः, तथा निश्रेयसः अर्थोऽस्ति मोक्षः, आध्यात्मिकतैव सर्वान्तिमलक्ष्यम् अर्थात् धर्मः इहलोकस्य परलोकस्य च परमोन्नत्याः साधानमस्ति। धर्मः आग्रहपूर्वकं कथयति-मानवस्यान्तिमं साधानमस्ति। आग्रहपूर्वकं कथयति- मानवस्यान्तिमं लक्ष्य-मस्ति मोक्षः। अपि च तस्याधिष्ठाता स्वयमहं धर्मः अस्मि। भारतीय-दर्शनानुसारेण मानवीयजीवनमेका नदी अस्ति। तस्याः जलप्रवाहं च मानवाय सदा चेष्टायुक्तौ अर्थकामौ स्तः। तस्या नद्याः द्वे तटे स्तः धर्मः मोक्षश्च। जीवनरुपिणी नदी तदैव कल्याणकरिणी भविष्यति यदि नदीद्वयस्य तटयोर्मध्यैव प्रवाहितः तथा च तटयोः उल्लंघनमपि न कुर्यात्। भारतीयद्रष्टारः पुरुषार्थानां पालनमावश्यं कथयन्ति। एतेषामनुसारेण इमे चत्वारः पुरुषार्थाः सन्ति धर्मः, अर्थः कामः मोक्षश्च।

---

[17] सर्वभूतानुकम्पी यः सर्वभूतार्जववतः

सर्वभूतात्मभूतश्च स वै धर्मेणयुज्यते (महाभारत-अनुशासन पर्व- १४२-२८)

प्रथमपुरुषार्थरुप धर्मः भारतवर्षे उद्भूतपंथस्य आध्यात्मिक-नैतिकतायाः अधिष्ठानोऽस्ति। जैनः, बौद्धः, वैष्णवः, शैवः, शाक्तश्च इमे संप्रदायाः धर्म मन्यन्ते। धर्मः प्रत्यक्षजीवनात् संबद्धोऽस्ति। सर्वप्रथमं व्यक्तिमात्रेण तस्य व्यक्तिधर्मोऽस्ति। विकसितो भूत्वा सः परिवारवत् भवति तथा तस्यैकः कुटुम्बः धर्मकुटुम्बः कथ्यते । इत्थमेव तमेव परितः जातिः, ग्रामः, प्रान्तः, राष्ट्रं देशः, विश्वाद्याः वर्तुलं विकसति। एतान् परिलपालयितुं व्यक्तिधार्मादतिरिच्य कुलधर्मः जातिधर्मः, देशधर्मः, अध्यापकधार्मादयः अपि भवन्ति। कस्यापि स्तरस्य धर्मः परस्परभालिप्तः भिन्नः वा नास्ति यतोहि सर्वेषां धर्माणां लक्ष्यमेकमेवास्ति। धरति लोकान् व्यवस्थितरीत्या परि-पालनम् किन्तु व्यावहारिकरूपेण यदा-कदा द्वयोः धर्मयोः संघर्षः दृश्यते। तथा एतयोः धर्मयोः संलिप्तः मनुष्यः किंकर्तव्यमूढतामाप्नोति। अस्यैवापरं नाम वर्तते धर्मसंकटः।

धर्मसंकटः तदा भवति यदा द्वेऽपि कार्ये करणीये स्तः परन्तु यदि एकं कार्यं कुर्मश्चेदपरकार्यं विरोधायति। उभावेव कार्यौ धर्मौ स्तः एकस्तु धर्मोऽस्ति अपरश्चाधर्मो नास्ति। अर्थात् अत्र द्वन्द्वः धर्माधर्मयोर्नास्ति अपितु धर्मधर्मयोरस्ति। यदा द्वौ धर्मौ भवतः तदा मनुष्यः आपदामनुभवति। अस्यैव नाम धर्मसंकटोऽस्ति।

यदा-कदा बृहद् धर्मलघुधर्मयोः द्वन्द्वो भवति। तदा लघुधर्ममपहृत्य बृहद्धर्मस्यानुपालनं कर्तव्यम्। इदमेव कर्तव्यमन्यथा संकटः बृहद्भूत्वा सर्वनाशस्य रूपं धारयिस्यति।

अस्यैव तत्वस्य व्याख्यानं कुर्वन् देवेन्द्रश्येनपक्षी राजाशिवितः कथयति यत्- हे राजन् महत्वपूर्णं किमस्ति, गौणंच किम्, इदमेव संवीक्ष्य धर्माधर्मयोनिर्णयः कर्तव्यः। महत्वं यत्रस्ति, तदेवानुसृत्य धर्मनिर्णयः कुर्यात्।[18]

अद्यतनीये लोकतान्त्रिके वातावरणे यदा मानवाधिकारं जातीयाधिकारं, विश्वमानवतादिविषयान् अधिकृत्य कोलाहलं भवति, तदा धर्मसंबन्धितमिदं विवेचनमत्यन्तं लाभप्रदं भविष्यति।

---

[18] गुरुलाघवमादाय धर्मोऽधर्मविनिर्णये
यतो भूयांस्ततो राजन् कुरुष्वधर्मनिर्णयम् (म.भा.वन.- १३१ - १३)

**आपद्धर्मः-**

धर्मसंकटशब्दवत् विशेषः शब्दोऽस्ति आपद्धर्मः। आपद्धर्मः शब्दोऽयं महाभारतेतिहासे भगवता व्यासेन प्रदत्तः। महाभारतादिषु क्वापि साहित्ये आपद्धर्मः शब्दस्योल्लेखो न प्राप्यते। किन्तु व्यासः 43 अध्यायात्मकं बृहदुपवर्गं विरचय्य शान्तिपर्वणि समावेशं कृतवान्।

मानवः यदा-कदा व्यक्तिशः समूहशः वा किंकर्तव्यविमूढो भवति। जीवनयात्रायां यदा विपदः आयान्ति तदा जीवनस्य वातावरणं धूमिलं, अन्धकारमयञ्च भवति। तदा व्यवहारस्य विधिनिषेधो न ज्ञायते एवञ्च मनुष्यः वैचारिकसंकटे आपतततति। तस्याः संकटावस्थायाः निवारकोऽस्ति आपद्धर्मः।[19] तस्य महत्त्वं प्रासंगिकता चास्थायी वर्तते। साक्षाद्धर्मः परिस्थितिनिरपेक्षः अस्ति। किन्तु आपद्धर्मः देशकालपरिस्थितिभिः बाधितो भवति।

आपदि- युद्धम्, विद्रोहः, मनमुखीप्रशासनम्, आर्थिकविषमता, वर्गद्वेषः, राष्टनिष्ठायाः अभावः, अनैतिकतादयः आयान्ति। अस्मिन् सांसारिकजीवने सर्वेऽपि जनाः एकवारमापधर्मस्य सहाय्यं स्वीकुर्वन्ति।

धर्मापधर्मयोरेकमन्तरमितोप्यस्ति। परिस्थितिनिरपेक्षशाश्वतमूल्ये अधिष्ठिते भूते सति धर्मस्याकलनं संभवमस्ति। किन्तु आपद्धर्मोऽधिकः जटिलोऽस्ति। सः परिस्थितौ परिवेष्टितोऽस्ति। स्थायीधर्मस्य मापदण्डेनैव अस्थायी आपद्धर्मस्य परिमापनम् असम्यगस्ति।

वैचारिकव्यावहारिकसंभ्रमस्य अन्धकारमये वातावरणे धर्माधर्मयोः सम्यगाकलनं जटिलमस्ति। आपात्काले धर्मः यदा-कदा अधर्मः भवति, अधर्मश्च धर्मः भवति।[20]

---

[19] धर्माधर्मफले जातु ददर्शह न कश्चन (आपद्धर्म - १३४- २/३)

[20] भवत्यधर्मो धर्मो हि धर्माधर्मादुभावपि कारणाद
देशकालस्य देश कालः स तादृशः
(शां प ७८-३२)

धर्मस्य रक्षणाय पालनाय च बलमावश्यकमस्ति। धर्मात् बलवानम् बलं भवति। बलेनैव धर्मः सफ़लो भवति। यथा गन्तृणामागन्तृणामाधारः भूमिरस्ति तथैव धर्मस्याधारः बलमस्ति।

अथा धूमः सलिले तथा लता वृक्षे आश्रिता भवति। तथैव धर्मः बले आश्रितः वर्तते।[21]

धर्माचार्यः मनुः प्रस्तौति।[22] सामान्यतः गुरुब्राह्मणवृद्धाः आदरणीयाः भवन्ति तथा बालकः प्रेमवात्सल्ययोः। पुनरपि यदि ते आततायिनः अर्थात् सामाजिकोपद्रविणो भूत्वा आयान्ति तर्हि पुनर्विचारं विना तस्य वधाः कर्तव्यः। तस्मिन् कश्चनपि पापो नास्ति स तु सामाजिक धर्मोऽस्ति।

मानवोन्नत्याः उच्चशिखरात् यथास्माकं पूर्वजाः चिरन्तनपरिस्थिति-निरपेक्ष धर्मस्य चिन्तनं मननं च कृतवन्तः तथैव ते व्यावहारिके धारातले अपवादात्मकानाम् आकस्मिकसं भावनानांच विचारः कृतवन्तः तथा रक्षोपायं कुर्वन् आपधर्मस्य कल्पना समाजं पुरतः प्रस्तुतवन्तः।

धर्म पुष्टितवन्त्सु साधानेषु सर्वाधिकप्रभावशाली पंथ सम्प्रदायोऽस्ति। यदा कुलवधोः द्रोपद्याः चीरापहरणं जायमानमासीत्तदा तस्याः हृदय-द्रावकम् आर्तचावहनं श्रुत्वा द्वारकाधीशः श्रीकृष्णः धर्मस्यादृश्यं रूपं धृत्वा तस्याः लज्जायाः रक्षणं करोति।[23] अन्त्यन्तं विकटपरिस्थितौ धर्मः यक्षस्य रूपं धृत्वा युधिष्ठिरात् प्रश्नानकरोत् यत् धर्मस्य समीपतागन्तुं कुत्र द्वाराणि सन्ति?

अहिंसा, समता, शान्तिः, दया अमत्सरश्च।

---

[21] अतिधर्माद बलमन्ये बलाद् धर्मः प्रवर्तते बले प्रतिष्ठितो धर्मो धरण्यामिव
जङ्गमम् धूमो वायोरिव वशे बलं धर्मोऽनुवर्तते।
अनीश्वरो बले धर्मो दुमेवल्लीव संश्रिता
(आ. प. १३४-६/७)

[22] गुरु वा बालवृद्धौ वा ब्राह्मणं या बहुश्रुतम् आततायिनमायान्तंहन्यादेवाविचारयन्
(मनुस्मृति ८-१५०)

[23] ततस्तु धर्मोऽन्तरितो महात्मा समावृणोदवै विविधैः सुवस्त्रैः।
(महाभारत-सभापर्व ६८-४६) भागवत-स्कन्ध -४-अ.-२-३-४

श्रीमद्भागवतपुराणे धर्मसंबन्धीरूपककथा अत्यन्तं प्रबोधाकाऽस्ति। पात्रणां नामानि स्वयं धर्मस्य महत्वस्य परिचायकानि सन्ति। धर्मः सृष्टिकर्तु ब्रह्मणः पुत्रेऽस्ति। तस्य जन्म प्राणदाताब्रह्मणः दक्षिणस्तनादभवत्। प्रजापति स्वस्य त्रयोदश पुत्रीणां दानं प्रदेत्तवान्। एताः धर्मस्य सहधर्मचारिण्यः अभवन्। एतासां नामानि सन्ति- श्रद्धा, मैत्री, दया, शान्ति, तुष्टिः, पुष्टिः क्रिया, उन्नतिः, बुद्धिः, मेधा, तितिक्षा, लज्जा, मूर्तयश्च अन्तिमायाः कन्यायाः मूर्त्योः सन्तानद्वयमासीत्, अन्यासांच एकैक संततिरासीत्। इत्थं आहत्य संतत्यः चर्तुदश आसन्। धर्मश्रधयोः युत्या शुभम्, धर्ममैत्र्योः युत्या प्रसादः, धर्मदययोर्युत्या अभयम्, शान्तिधार्मायोर्दुत्या सुखम्, धर्मतुष्ट्योर्युत्या हर्षः, धर्मपुष्ट्योर्युत्या अभिमानम्, स्मयः, धर्मक्रिययोर्युत्या योगः, धर्मोन्न्त्योर्युत्या दर्पः, धर्मबुधयोर्युत्याऽर्थः, धर्ममेधायोर्युत्या स्मृतिः, धार्मोन्न्त्योर्युत्या क्षेपः, धर्मलज्ञयोर्युत्या अथवा धर्मः एव लज्जा, युत्याः प्रश्रयः विनयता-सृजनता एतेषां आविर्भोवोऽभवत्। अन्तिमेन धर्ममूत्या युगलेन नरनारायणयोः उदयोऽभवत्।

इत्थमेव अधर्मस्यापि रूपककथा विद्यमानाऽस्ति। भागवतपद्म-पुरणयोरनुसारेण अधर्मः ब्रह्मणःपृष्ठभागादुत्पन्नः धर्मविरोधी पुरुषोऽस्ति। अर्थात् यदा धर्मः ब्रह्मणः दक्षिणस्तनादुत्पन्नोऽभवत् तदा अयमधर्मः पृष्ठा-द्वहिरागतः। तस्याधर्मस्य पत्नी मृषाऽस्ति। यस्यार्षोऽस्ति असत्यम्। अधर्म-मृषयोर्सक्तयौ दंभः, माया च आस्ताम्। तौ मिथुनौ अभवताम्। तौ लोभ-निकृती जन्म लेभे। अग्रे गत्वा अस्मिन्नेव कुले क्रोधाहिंसाभययातनाः सन्त-तीना जन्म अभवत्।

धर्माधर्मयोः उभयोरपि जन्म एकस्मादेव शरीरादभवत्। धर्मस्य जन्मकेन्द्रादभवत्। धर्माद् विवाहितगुणाः मानवसमूहाय कल्याणकारिणः सन्ति। एते संस्कृतिदिशायां प्रकृत्याः मानवमुन्नयन्ति। तथा अधर्ममृषयोः संयोगात् यः परिणामः आयाति तस्मिन् दंभः, लोभ, क्रोधादि अवगुणाः मानवाय अहितकारिणः भवन्ति। तथा प्रकृत्याः विकृतिं प्रति अवनयनं कारयन्ति। अर्थात् धर्मः उन्मार्गी अस्ति, परंचाधर्मः कुमार्गी अस्ति।

धर्मः शाश्वतः अस्ति। अपरिवर्तनीयमस्ति यतोहि सः समस्तं जगत् सुदृढं, सुत्यवस्थितंच स्थापयति। धर्मः तात्विकदृष्ट्या स्थिरोऽस्ति। तथा

व्यावहारिकदृष्ट्या गतिमान् अस्ति। अस्यैव नाम सनातनः। यथाद्य ज्ञायते तथा सनातनस्य अर्थः रूढिवादी, कर्कशश्च नास्ति। सनातनः सन तथा तन शब्दयोर्मेलनेन संपद्यते। सन अस्यार्थो भवति पुरातनम् तन शब्दस्यार्थोऽस्ति अद्यतनः एवंच सनातनस्यार्थोऽस्ति यद्यपि पुरातनं तथापि नूतनम्। यथा सूर्योदयः। सूर्योदयः सर्वाधिकं पुरातनमस्ति, सर्वाधिकं नूतनंचास्ति। अतः सः सनातनोऽस्ति। संस्कृतशब्दानां तत्समहिन्दीकरणं कृते सति सर्वकाले यस्य विद्यमानताऽस्ति, तस्याः नाम सना। विद्यमाना याऽस्ति सा तमी कथ्यते। सर्वत्र सर्वकाले यः विद्यमानः भवति स सनातनी।[24] अनेन सनातन शब्दस्यार्थः स्पष्टो भवति, धर्मः निःसंदेहः सनातनोऽस्ति। अयं पुरातनः अद्यतनीयः स्थिरः, गतिमान, अमरश्चास्ति। धर्मः संपूर्णस्य जगतः अधिष्ठानोऽस्ति। धर्मः व्यक्तिपरको नास्ति, पारस्परकोऽस्ति, सः व्यतिरेकी अस्ति, समावेशकोऽस्ति, संग्रहकोऽस्ति। धर्मः स्वयंप्रेरितोऽस्ति तथा संस्कृतिं प्रति नयति। धर्मः भारतस्य समस्त विश्वाय प्रदत्ताद्धितीयमूल्या च निधिः वर्तते।

ऋषितुल्यस्य भारतरत्नस्य डा.भगवानदासस्यानुसारेण धर्मः सोऽस्ति यः किमपि वस्तु धरति, तस्य सत्वस्यावधारणं करोति, तस्य स्वभाविक गुणान् चेष्टाश्च शिथिलं न करोति। तथा प्रधानतः तस्य वस्तुनः अस्तित्वं स्थिरयति।[25]

---

[24] सर्वकाले सना प्रोक्ता विद्यमाने तनीति च
सर्वत्र सर्वकालेषु विद्यमाना सनातनी
(ब्रह्मवैवर्त पुराण-प्रकृति खण्डअ०५)

[25] That which holds a thing together, makes it what it is, prevents it from breaking up and changing into something else, its, charateristic function, its peculiar property, its fundamental attribute, its essential nature, is its Dharma, the l of its being primarily. That which makes the world-process what it in ansl holds all its parts together as One whole, in a breakless all binding chain of causes and effects, is the Law (or totality of laws) of Nature or Nature's God Dharma in the largest sense, the world-order. That scheme or code of Law which bind together human beings in the bonds of mutual rights and duties of causes and consequences of actions, arising out of their temperamental chan ters in relation to each other, and thus maintains society, is human La Manava Dharma. Yet again the code of life based on Veda (all-science of the Laws of Nature in all her departments), the due observance of which leah happiness here and hereafter,

**निष्कर्षः** - धर्मः अनेकेषामंशानां कार्यकारणभावात् बध्यमानः, जगतः संचालकः निसर्गनियमोऽस्ति। अथवा जगत् व्यवस्थाऽस्ति। धर्मः मनुष्याणां भावनां भावनानांच पार्थक्यस्य परिणामस्वरूपं प्रादुर्भूतानां विधि-कृतिकृत्यानां तयाधिकारकर्तव्यानां पारस्परिकतया गुम्फनं कृत्वा समाजसय परिशासनं कुर्वत् विधिविधानस्य व्यवस्थां करोति। धर्मः मानवसमूहं वेदानामधिष्ठाने, अभ्युदयनिःश्रेयसे प्रतिनयमानो जीवनविधानोऽस्ति। संक्षेपे विज्ञानस्यदृष्ट्या धर्मः वस्तुनः निसर्गजन्यः गुणोऽस्ति। नैतिकवैधानिकदृष्ट्या कर्तव्यमस्ति। आध्यात्मिकमनोवैज्ञानिकदृष्ट्या पन्थसंप्रदायोऽस्ति। सामान्यतः सदाचारनियमौ स्तः। सर्वोपरि महत्तमं कर्तव्यमस्ति। धर्मः यावदुच्चोऽस्ति, तावदेव समष्टिव्यापकोप्यस्ति। यावद् पुरातनोऽस्ति, तावदेव नूतनोऽप्यस्ति, यावच्चिरन्तनोऽस्ति, तावदेव गतिमान् वर्तते। यावद्दह्वायामः अस्ति तावदेवैकाग्रोपि विद्यते। सः सर्वभूतहितानाममृतकलशोऽस्ति जगन्मङ्गलस्य कल्पवृक्षोऽस्ति।

अत एव शरशय्यायां शयनं कुर्वन् धर्मवेत्तापितामहः भीष्मः स्वस्यामोघं धर्मोपदेशं प्रारभते। अस्मादेव मङ्गलाचरणात् नमो धर्माय महते, नमः कृष्णाय वेधसे। महते धर्माय नमः, विधात्रे कृष्णाय नमः।[26] धर्मस्य महत्वमुद्धोषययदतीवार्थगंभीरमिदं मङ्गलाचरमस्ति।

## सन्दर्भग्रन्थसूची

is Dharma, Briefly Dharma is characteristic erty, scientifically, duty, morally, and legally, religion with all its proper cations, psychophysically and spiritually, and righteousness and law generally but Duty above all."
(The Science of Social Organisation. Il Edition. Ved I Page-49-50)

[26] नमो धर्माय महते नमः कृष्णाय वेधस् ब्रह्मणेभ्यो
नमस्कृत्वा धर्मानवक्ष्यामि शाश्वतान्
(शांतिपर्व ५६-0)

1. *महाभारत.* व्यास. *महाभारत.* गीताप्रेस गोरखपुर, 2004 .
2. रामायण, वाल्मीकि. *रामायण.* अनुवादक: हरि प्रसाद शास्त्री, लंदन: श्री सत्य साईं प्रकाशन, 1952,
3. उपनिषद, *बृहदारण्यक उपनिषद.* अनुवादक: स्वामी माधवानंद, अद्वैत आश्रम, 1950,
4. *उपनिषद, महानारायण उपनिषद.* अनुवादक: स्वामी विमलानंद, चिन्मय मिशन ट्रस्ट, 1984,
5. मनुस्मृति, *मनुस्मृति.* अनुवादक: गंगानाथ झा, मोतीलाल बनारसीदास, 1920,
6. भागवत पुराण, *भागवत पुराण.* अनुवादक: स्वामी प्रभुपाद, भक्तिवेदांत बुक ट्रस्ट, 1972,
7. *धर्म एवं संस्कृति.* रंगा हरि, लोकहित प्रकाशन, 2012 .
8. पुराण, *ब्रह्मवैवर्त पुराण.* अनुवादक: राजेंद्र नाथ सेन, 1904.
9. *पुराण, पद्म पुराण.* संपादक: एन. ए. देशपांडे, मोतीलाल बनारसीदास, 1950

*********

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५
ISSN: 0975-1769 UGC CARE ID:101000019

# कालिदासस्य नाटकीयगुणोत्कर्षसाधनानि

डा. दीपिका दीक्षितः
सहायकाचार्या हिन्दू-अध्ययनम्
के.सं.वि., मुख्यालयः
(Sub ID: CSU/SV-141)

**शोधसारः**- *संस्कृतसाहित्यस्य प्राङ्गणे उदितभास्करस्य कविताकामनीकमनीयकलाकारस्य कविकुलगुरुकालिदासस्य नाटके प्रायेण दृश्यकाव्यस्यातिशयित्वं दृश्यते। तस्य कीर्तिकौमुदी समस्ते संसारे देदीप्यमाना वर्तते। कालिदासस्य नाटकानि रङ्गमञ्चनिमित्तं सर्वथा उपयुक्तानि वर्तन्ते। तस्य नाटकेषु घटनासंयोजनं, सौष्ठवं, घटना चित्रणम्, सङ्केतात्मकता, चरित्र-चित्रणम्, सार्थकता, कवित्वं रसपरिपाकः अद्भुतविलक्षणसमन्वयश्च वर्तन्ते। स्वनाट्यप्रतिभायां मनोज्ञसम्वादे, रमणीय-उपमासु, असाधारणरचनाचातुर्यं, असाधारणरसपरिपाकः सहृदयकाव्यरसिकेभ्यः अद्भुत नाट्यकलायाः निदर्शनं करोतीति।*

**प्रमुखशब्दाः**- कालिदासः, मनोवैज्ञानिकत्वम्, चारीविधानम्, रङ्गपरम्परा, नाट्यधर्मी, अर्थोपक्षेपकाः

संस्कृतसाहित्यशास्त्रे काव्यस्य भेदद्वयं परिगण्यते-

**श्रव्यकाव्यं दृश्यकाव्यं** च।

दृश्यकाव्यस्य उदाहरणं नाटकं वर्तते। काव्येषु नाटकं रम्यम् इति प्रथिता सूक्तिः जनजनमुखेषु श्रूयते। संस्कृतसाहित्ये नाटकं रम्यं भवति, अतः ‘‘नाटयं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्’’[1] इति भणितिः नूनमेव समीचीना। नाट्ये कलायाः विद्यायाः शिल्पस्य ज्ञानम् अनायासेन भवति। बहुधा प्रोक्तम् अपि अस्ति। नाट्यशास्त्रे आचार्यो भरतः ब्रवीति-

[1] मालविकाग्निमित्रम् - 1/4

न तज्ज्ञान न तच्छिल्पं न सा विद्या न सा कला।
नाऽसौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।[2]

## कालिदासस्य नाट्यकौशलम्

जन्मना एव मूलवासनाः स्थायीभावरूपे मानवानां हृदि भवन्ति। तेषामेवाभिव्यक्तिः सर्वत्र रस रूपे सञ्जायते। साहित्यदर्पणकारः अपि लिखति-

सुखदुःख समुद्भूतिः नानारसनिरन्तरम्।
पञ्चाधिका दशपरास्तत्रङ्का परिकीर्तिताः।।[3]
भरतमुनिना अपि तथैव स्पष्टीकृतम्-
योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः।
सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते॥[4]

अश्वघोषः, भासः, कालिदासश्च नाटककाररूपेण अभवन्। कालिदासस्य पूर्वमपि भासकृतं नाटकसाहित्यं लभ्यते। कालिदासस्य नाटकेषु पूर्वाचार्याणां नाटककाराणां चर्चा दरीदृश्यते यथा-"प्रथितयशसां भाससौमिल्लकादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं परिषदो बहुमानः"।[5] कालिदासः नाट्यपरम्परायाः पद्धतिं सन्त्यज्य नाट्यनिर्माणे नूतनसरणिम् आविष्कृतवान्। कथावस्तुसाहाय्येन कलात्मकरीत्या नाटकं रचितवान्। एवमेव मालविकाग्निमित्राख्यं नाटकं नूतनमार्गेण निर्मितवान्। असौ लिखति-

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः।।[6]

---

[2] नाट्यशास्त्र- 1/117
[3] साहित्यदर्पण- षष्ठपरिच्छेदः - 8
[4] नाट्यशास्त्र- 1/121
[5] मालविकाग्निमित्रम्- 1/पृ- 5
[6] मालविकाग्निमित्रम्-1/2

मालविकाग्निमित्रे विक्रमोर्वशीये च कालिदासस्य नाट्यकला क्रमशः विकसितरूपे परिलक्ष्यते। अभिज्ञानशाकुन्तलं तु मधुरतमं श्रेष्ठतमं नाटकं वर्तते। नाट्यविषये कालिदासः स्वकीयं प्रौढ़ज्ञानं प्रकटयति-

**देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम्,**
**रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।**
**त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते,**
**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्।।** [7]

कालिदासः नाटकस्य अभिधानं 'सौम्यचाक्षुषयज्ञ' इति ददाति। भगवान् शङ्करः नाट्यं द्विधा विभक्तवान् ताण्डवं लास्यम् इति। 'स्त्री नृत्यं लास्यमित्युक्तम् पुन्नृत्यं ताण्डवम् स्मृतम्'। नाटके सत्त्वरजतमोगुणानाम् समन्वयः भवति। अत्र अष्टरसानां परिपाकः भवति। इन्द्रः सभायां 'लक्ष्मीस्वयंवर' नामकनाटकं अभिनीतवान्। नटस्य प्रभावात् नाटकं सफलं भवति। कालिदासः चित्रकला-नृत्यकलासन्दर्भे नाट्यविषयकस्वसिद्धान्तानां स्पष्टीकरणं कृतवान्। लक्ष्मीस्वयंवरनाटके उर्वशी 'लक्ष्म्याः' अभिनयं कृतवान्। इत्थं प्रतिभा यदि नटे भवति तदा नाटकं सफलं भवति। नटस्य तत् कार्यमेव अनुकार्यं भवति। अतः नाट्यशास्त्रे भरतः लिखति-

**यथा जन्तुः स्वभावं हि परित्यज्यान्यदैहिकम्,**
**पराभवं प्रकुरुते परदेहं समाश्रितः।।**[8]

### द्विधा नाट्यमार्गः उपचारश्च

भरतमुनिना नाट्यरचनासामान्यभेदविषये उक्तम् यत् आबिद्धमार्गः सुकुमारमार्गश्च द्विविधः मार्गः भवति। आबिद्धमार्गे नाट्ये युद्धादीनाम् 'वर्णनं भवति। सुकमारमार्गेः कोमलतायाः लालित्यस्य प्रदर्शनं भवति। कालिदासः सुकुमारमार्गस्य नाटककारः आसीत्। भरतमुनिः कथयति यत् राज्ञां प्रीत्यर्थं सुकुमारप्रयोगः भवति। स्त्रीपात्राणाम् अभिनयद्वारा शृङ्गार-रसस्य योजना क्रियते अत्र। भरतमुनिः निगदति यत् स्त्रीणां कृते यः व्यवहारः

---

[7] मालविकाग्निमित्रम्-1/4

[8] नाट्यशास्त्र - 35/26

क्रियते तस्य नाम 'उपचारः'[9] भवति। कालिदासः स्वनाटकेषु भरतोक्त उपचाराणाम् चित्रणं कृतवान् अस्ति। उपचारः त्रिविधः भवति- बाह्यः, आभ्यन्तरः, बाह्यभ्यान्तरश्च।[10] मालविकाग्निमित्रनाटकम् 'आभ्यन्तर' उपचारस्योदाहरमस्ति। विक्रमोर्वशीये 'वाह्याभ्यन्तर' उपचारः वर्तते। मालविकाग्निमित्रस्य राज्ञी इरावत्याः अग्निमित्रं प्रति प्रदर्शितः क्रोधः 'आभ्यन्तर उपचारविधिः' वर्तते। विक्रमोर्वशीये नाटके उर्वश्याः आचरणं बाह्याभ्यन्तरस्य उदाहरणं वर्तते। नाटयक्रिया एका कला वर्तते। नाटके शास्त्रप्रयोगः प्रधानं भवति। नाट्यशास्त्रे उक्तं यत् नाट्यमस्ति तत्र केवलं तत्त्वस्य विवेचनं न भवति अपितु नाट्यसफलं कथं स्यात् इति तत्र सुष्ठुप्रयोगः प्रतिपादितः भवति। एतत् सङ्केतं विधाय कालिदासः मालविकाग्निमित्रे परिव्राजिकायाः मुखात् नाट्यशास्त्रस्य प्रयोगस्य प्रधानतायाः सूचनां ददाति-'देव! प्रयोगप्रधानं हि नाट्यशास्त्रम्'[11]।

## पूर्वरङ्गविधानम्-

आचार्य भरतद्वारा प्रोक्तं पूर्वङ्गः सम्पूर्णनाटयस्य प्राणतत्त्वरूपे वर्तते। वस्तुतः पूर्वरङ्गस्य सुष्ठुप्रयोगात् नाटयस्य साफल्यं निश्चीयते। नाट्यशास्त्रीयपरम्परायां भरतः कथयति यत् गीते, वाद्ये, छन्दसि, नृत्ये च एकस्यैव तत्त्वं प्रस्तुतीकृतं स्यात् तदपि वरम्-

**क्षेपप्रतिक्षेपकृतं भाण्डोपोहनसंस्कृतम्।**
**प्रथमं त्वभिनेयं स्याद्गीतके सर्ववस्तुकम् ॥**
**तदेव च पुनर्वस्तु नृत्तानापि प्रदर्शयत्।**
**यो विधिः पूर्वमुक्तस्तु नृत्ताभिनयवादिते ॥**[12]

## मनोवैज्ञानिकं निदर्शनम्

आचार्य भरतमुनिः नृत्तप्रयोगस्य अवसरे मनोवैज्ञानिक व्याख्यानं करोति। अभ्युदयस्थाने दम्पत्योः रतिसंग्रहे कान्तस्य उपस्थितौ च ऋतु-

---

[9] नाट्यशास्त्र -22/151

[10] नाट्यशास्त्र -22/152

[11] मालविकाग्निमित्रम्- 1/पृ- 39

[12] नाट्यशास्त्र- 4/296

कालादि दर्शने नृत्तप्रयोगः कार्यः। किन्तु चिन्तायाः वातावरणे नायिकायाः खण्डितावस्थायां कलहान्तरितायाः च नृत्तप्रयोगः न कार्यः इति। कालिदासेन भरतोक्तनृत्त-गीत-वाद्यानां मन्तव्यस्य सम्यक् परिपालनं क्रियते।

### चारीविधानम्

रघुपरम्परायां एकाविशिष्टप्रक्रिया भवति-'चारीविधानम्[13]'। भरतः अस्य भेदद्वयं करोति- भौमी आकाशिका च। कालिदासस्य त्रिषु नाटकेषु तेषां भेदः परिलक्ष्यते। अभिज्ञानशाकुन्तले शरपतनभयात् शरीरस्य अर्द्धभागस्य पूर्वकायस्य कृष्णसारमृगस्य उदग्रप्लुतता दृश्यते। अत्र भरत-सम्मत 'हरिणीप्लुताचारी'[14] प्रवृत्तिर्दृश्यते। एवमेव आविद्धः, प्रक्षिप्तः, भुजङ्ग-त्रसितनभचारीणां अनुसरणं दृश्यते। 'यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव'[15] इति उक्त्वा कालिदासः शकुन्तलायाः यां गमनविधिं सङ्केति-तवान् तत् सर्वं भरतवर्णित-समपादाभौमीचार्याः[16] अनुकूलमेव वर्तते।

### कथावस्तुमञ्चननिषेधनिर्देशः

भरतमुनेः निर्देशनं वर्तते यत् वधादिदृश्यानाम् अभिनयं नैव भवेत्। अभिनयमात्रेण एव अस्त्रप्रहारस्य प्रदर्शनं कार्यम्[17]। नाट्यशास्त्रस्य रंग-परम्परायाः परिपालनं कालिदासेन पूर्णतया कृतं वर्तते। केशीनामकदानवं पराजित्य उर्वशीं मुक्तीकरणं, दुष्यन्तद्वारा आश्रममृगस्य अनुधावनं, मातलि-द्वारा पीडितमाधवस्य मुक्तीकरणम्। एवमेव अन्ये अपि सन्दर्भाः कालिदासेन युक्तिपूर्वकं समुपस्थापितम्।

### रङ्गपरम्परायाः त्रिस्रः प्रवृत्तयः

भरतोपदिष्टरंगपरम्परायाः त्रिस्र प्रवृत्तयः उल्लिखिता सन्ति- दिव्या, दिव्यमानुषी, मानुषी च। दिव्यप्रकृति देवानां भवति। एवमेव दिव्यमानुषी राज्ञां भवति। मानुषी प्रवृत्तिः सामान्यमनुष्याणां भवति। रंगमञ्चे देवतानाम्

---

[13] नाट्यशास्त्र- 10/1

[14] नाट्यशास्त्र- 10/43

[15] अभिज्ञानशाकुन्तलम्-2/2

[16] नाट्यशास्त्र-10/14

[17] नाट्यशास्त्र-10/84, 86

अभिनयं कोऽपि मनुष्यः एव करोति। आचार्यभरतः यदि भारतीय रंगपरम्परायाः आविष्कर्त्ता वर्तते। तदा कालिदासः तत्परम्परायाः प्रथम-नैष्ठिकप्रयोक्ता वर्तते। कालिदासः 'विक्रमोर्वशीये' त्रोटके प्रत्यक्षरूपेण भरतस्य मतं सुविचिन्त्य प्रकटीकरोति। रङ्गमञ्चदृष्ट्या कथावस्तुनः एकम् अन्यतपि विभाजनं परिदृश्यते- दृश्यं सूच्यं च। सूच्ये दीर्घयात्रा, वधः, मृत्युः, युद्धम्, भोजनं, स्नानं प्रभृतयः भवन्ति। अस्य सूचनार्थं पञ्चविध-अर्थोपक्षेपकाः भवन्ति- (1) विष्कम्भकः (2) प्रवेशकः (3) चूलिका (4) अङ्कास्य (5) अङ्कावतारः। सूच्य कथावस्तुनि कालिदासः नाटकत्रयेषु चतु-र्दशप्रवेशकः, विष्कम्भकः, मिश्रविष्कम्भकः इति सूचयति। दृश्यकथावस्तुनः कृते अङ्कानां प्रयोगः वर्तते।

## नाट्यधर्मी

विक्रमोर्वशीये शाकुन्तले च उभये नाटके नाट्यधर्मीणां प्रयोगनाम् प्रभृतिनाम् प्रदर्शनम् दृश्यते। विक्रमोर्वशीये नाट्यविधानस्य प्रारम्भः अनया प्रवृत्या भवति। विक्रमोर्वशीये नाटके अभिज्ञानशाकुन्तले च नाट्यधर्मी प्रवृत्तिनाम् प्रदर्शनम् भवति। केशीनाम राक्षसेन उर्वश्याः अपहरणं भवति। आकाशमार्गेण पुरुरवसः तीव्रग्रत्याः गमनं भवति। उर्वश्याः पुरुरवसं प्रति आसक्तिः लोकधर्मी प्रवृत्तिः अस्ति।। चतुर्थाङ्के राज्ञः प्रमत्तरूपं मयूर, चक्रवाक, वृक्ष, सागर, सर्वेषां पुरतः प्रश्नः नाट्यधर्मी वर्तते। शाकुन्तले हेमकूटपर्वते इन्द्रस्यरथे आरूढः नाट्यधर्मी वर्तते। कालिदासः एतासां प्रवृत्तिनां परिचितो वर्तते। कविः कालिदासः नाटकस्य कथावस्तुसंयोजने, सहज, स्वाभाविक घटना-संयोजने, स्वाभाविकतायां, मार्मिकतायां, सार्थ-कतायां, गतिशीलतायाम्, भारतीयतानाम्, अलौकिकतानां, कोमलतायां संयोजने कालिदासस्य असाधारणकौशलं दर्शयति।

## उपसंहृतिः

इत्थं कालिदासस्य नाटकानां गभीराध्ययनेन विश्लेषणेन च ज्ञायते यत् - कालिदासनाटकेषु कथावस्तुनः अन्तर्वस्तुकथासंरचना च रङ्गमञ्चदृशा सुष्ठतया प्रयुक्ता वर्तते। नाट्यशास्त्रस्य प्राचीनाचार्यः सुबन्धुः नाटकस्य प्रकारान् लिखति- पूर्णः, प्रशान्तः, भास्वरः, समग्रश्च। कालिदासस्य नाटकं समग्रप्रकाराणां वैशिष्ट्यं धारयति। कालिदासस्य नाटकानि रङ्गमञ्चनिमित्तं

सर्वथा उपयुक्तानि वर्तन्ते। तस्य नाटकेषु घटनासंयोजनं, सौष्ठवं, घटना चित्रणम्, सङ्केतात्मकता, चरित्रचित्रणम्, सार्थकता, कवित्वं रसपरिपाकः अद्भुतविलक्षणसमन्वयश्च वर्तन्ते। स्वनाट्यप्रतिभायां मनोज्ञसम्वादे, रमणीय -उपमासु, असाधारणरचनाचातुर्यं, असाधारण-रसपरिपाकः सहृदयका-व्यरसिकेभ्यः अद्भुत नाट्यकलायाः निदर्शनं करोतीति।

## सन्दर्भग्रन्थसूची


1. अभिज्ञानशकुन्तलम्, महाकविकालिदासः, व्याख्याकारः –राम-तेजपाण्डेयः, – चौखम्बा संस्कृत सीरीज अफिस, वाराणसी, १९७८
2. आचार्यविश्वनाथ, साहित्यदर्पणः (1982), दिल्ली : मोतीलाल बनारसीदास
3. काव्यप्रकाशः, महेश्वराचार्यकृत आदर्श संस्कृतटीकोपेतः,उप्रैति, पं. थानेशचन्द्र, परिमल पब्लिकेशन्स, २००३।
4. कुमारसम्भवम्, (2013) महाकविकालिदासः, व्याख्याकारः-डॉ. कृष्णा विश्वासः,मान्यता प्रकाशनं, नवदेहली
5. डॉ कपिल देव द्विवेदी. (2003). संस्कृत साहित्य का परिचयात्मक समीक्षात्मक इतिहास . फैजाबाद : घनश्यामदास एंड सन्स प्रकाशन
6. भरतमुनि, नाट्यशास्त्रम् (1972), वाराणसी : चौखम्बा संस्कृत सिरीज
7. महाकवि-श्रीकालिदास. (n.d.). *अभिज्ञानशाकुन्तलम्.* आगरा: महालक्ष्मी प्रकाशन.
8. मार्गन सीटी, मनोविज्ञान (1971), पटना: बिहार हिन्दी ग्रन्थ अकादमी
9. मिश्र डा देवनारायण (1990), मालविकाग्निमित्रम्, मेरठ : साहित्यभण्डार
10. मिश्रः श्रीजगदीशचन्द्रः(1997), प्रतिमानाटकम्, वाराणसीः चौखम्बा सुरभारती.
11. रत्नावली, श्रीहर्षः(1964), सम्पादकः – देवेन्द्रमिश्रः, प्रकाशकः – रामनारायणलाल वेनीप्रसादः, इलाहाबाद


*********

संस्कृतविमर्शः

(July-December 2023) अङ्क-२५

ISSN: 0975-1769 UGC CARE ID:101000019

# उदात्तानुदात्तस्वरितालोके पाणिनेः दृष्टिः

**डॉ उमाकान्त शुक्लः**

सहायकप्राचार्यः, व्याकरणम्

शिवप्रसाद संस्कृत डिग्रीकालेज, रामपुरः

**शोधसारः** - *व्याकरणम्- 1- येन प्रकृतिप्रत्ययविभागः।*

*2- येन प्रकृतिप्रत्ययार्थविभागः।*

*3- येन प्रकृतिप्रत्ययान्वयविषयकपदार्थज्ञानम्।*

*उक्तञ्च-*

***"विविक्ताः साधवः शब्दाः प्रकृत्यादिविभागतः।***

***ज्ञाप्यन्ते येन तच्छास्त्रमत्र शब्दानुशासनम्"।।***

*शास्त्रेस्मिन् लौकिकानां वैदिकानां शब्दानामनुशासनमाचार्येण विहितम्।*

*तत्र त्रयः स्वराः इति पाणिनिशिक्षायां लिखति-*

***"उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः।"** का.19*

*तथा च उदात्तसंज्ञासूत्रम्-*

**उच्चैरुदात्तः**- *ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोजुदात्तः। उदाहरणम्- आ ये (निपाताः आद्युदात्ताः, एकादेश उदात्तेनोदात्तः) इति सूत्राभ्यामुदात्तत्वम्।*

***"आ ये"** (उदात्तः)*

*शरीरावयवानां विस्तारः(शैथिल्यराहित्यम्) स्वरस्य रूक्षता(अमृदुता) कण्ठविवरस्य संवृत्तता (संकोचः) दृश्यते।*

*अत्र प्रातिशाख्यम्- तत्र सवनक्रमेण उरसं, कण्ठं, भ्रूमध्यं सम्प्राप्य वायुना त्रयो विकारा उत्पाद्यन्ते आयाममार्दवाभिघाताः इति (यजु.प्रा.अ.1सू.31)*

**नीचैरनुदात्तः**- *ताल्वादिस्थानस्याधो भागे निष्पन्नोजनुदात्तः। उदाहरणम्- अर्वाङ् इदमभिमुखवाचि अव्युत्पन्नं प्रातिपदिकम्। अत्र फिषोन्त उदात्तः अनेन वा शब्दाकार उदात्तः। आदि अकारः अनुदात्तं पदमेकवर्जम् इत्यनेन अनुदात्तः।*

***"अर्वाङ्"** (अनुदात्तः)*

*गात्राणां शैथिल्यम्, स्वरस्य मार्दवम्, कण्ठविवरस्य विकाशः*

*अनेन आयाति यन्नीचैर्मार्दवेन- अधोगमनेन गात्राणां यः स्वरः सम्पद्यते सोऽनुदात्तः।* ***समाहारः स्वरितः****- सूत्रेऽस्मिन् समाहारशब्दः समाह्रियतेऽस्मिन् इति विग्रहेधिकरणे समोपसृष्टाद्धातोः अकर्तरि च कारके संज्ञायाम् इति सूत्रेण घञि सति सिद्ध्यति अथवा समाहरणं समाहारः- सम्मेलनम्।*

*अर्थात्- उदात्तत्वानुदात्तत्वे वर्णधर्मौ समाह्रियेतेस्मिन् सः स्वरितः।*
*अधुना जिज्ञासा भवति स्वरिते उदात्तत्वानुदात्तत्वयोः कियान् अंशः अत्रोच्यते सूत्रम्- तस्यादित उदात्तमर्धह्रस्वम्-ह्रस्वग्रहणमतन्त्रम। स्वरितस्यादावर्धमुदात्तं बोध्यम्। उत्तरार्धन्तु परिशेषादनुदात्तम्। तस्य चोदात्तस्वरितपरत्वे श्रवणं स्पष्टम्। अन्यत्र तूदात्तश्रुतिः प्रातिशाख्ये प्रसिद्धा।*

*अत्र मतद्वयम्-*
*1-भट्टोजिदीक्षितस्य मतम्- स्वरितस्यार्द्धांशः उदात्तः उत्तरार्द्धांशस्त्वनुदात्तः।*
*2-नागेशमतम्- सर्वत्रैकमात्रार्द्धांशः उदात्तः शेषांशोनुदात्तः।*

*यथा- ह्रस्वस्वरितेऽर्द्धांश उदात्तः शेषोऽनुदात्त उभयमते। दीर्घेऽर्द्धमात्रांश प्रागुदात्तः, अवशिष्टः सार्द्धैकमात्रांशोऽनुदात्तः। प्लुते प्रागर्द्धमात्रांश उदात्तः शेषं सार्द्धैकमात्राद्वयमनुदात्तः। स्वरिते उत्तरार्द्धांशानुदात्तस्य उदात्तस्वरितपरत्वे श्रवणं भवति। यत्र स्वरितात्परः स्वरः स्वरितोऽथवा उदात्तः नास्ति तत्र अनुदात्तः शेषनिघातत्वेन न श्रूयते।*

*उदात्तपरत्वे ह्रस्वस्वरितस्योदाहरणम्- क्व वोऽश्वाः इति।*
*उदात्तपरदीर्घस्वरितस्योदाहरणम्- येऽराः इति।*
*स्वरितपरस्य प्लुतस्वरितस्योदाहरणम्- योऽह्यः।*
*यत्र उदात्तस्वरितपरत्वन्नास्ति तत्रोदात्तश्रुतिरेव यथा- अग्निमीले इति।*

**कूटशब्दाः** – 1. अथः- मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्याधिकारप्रतिज्ञासमुच्चयेषु।
2- प्रातिशाख्यम्- शाखां शाखां प्रतीति प्रतिशाखम्, तत्र भवम् प्राति-शाख्यम्-वेदव्याकरणम्।
3- सर्वज्ञानमयाः- चत्वारो वेदाः।
4- ह्रस्वः- एकमात्रिकः।
5- दीर्घः- द्विमात्रिकः ।
6- प्लुतः- त्रिमात्रिकः ।
7- दुःस्पृष्टः- डकारस्थानिको ळकारः।
8- स्पर्शः- कादयो मावसानाः।
9. यमः- वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये पूर्वसदृशो वर्णः।

10- फिट् -प्रातिपदिकम्।
11- ओजसा- आकर्षणशक्त्या।

शब्दशास्त्रम्- व्युत्पत्तिशास्त्रम् इति। व्युत्पत्तिश्च-प्रकृति प्रत्ययविभाग-तत्तदर्थविभाग-तत्तदन्वयबोधविषयकपदार्थज्ञानरूपा,तत्साधनं शास्त्रम् इति। उक्तञ्च-

**विविक्ताः साधवः शब्दाः प्रकृत्यादिविभागतः।**
**ज्ञाप्यन्ते येन तच्छस्त्रमत्र शब्दानुशासनम्।।**[1] इति

महाभाष्यकारेणापि **'अथशब्दानुशासनम्'** इति सूत्रे 'अथ' शब्देन शब्दाधिकार आरभ्यते उक्तञ्च- **'अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते'**[2] इति। महाभाष्यकारो विवरणकारत्वाच्छब्दशास्त्रस्य साक्षात् प्रयोजनं शब्द-व्युत्पत्तिलक्षणमवादीत्।

**'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'**[3] इति वचनेन सन्ध्योपासनादाविव प्रत्यवायपरिहारार्थितयैवोत्तमाधिकारिप्रवृत्तिः भविष्य-त्येव अतः पाणिनिः प्रयोजनन्न उदलिखत्। **'शास्त्रपूर्वके प्रयोगे धर्मः'**[4] इति वार्तिकेन वार्तिककृता परमप्रयोजनं विहितम् इति।

शास्त्रेऽस्मिन् लौकिकानां वैदिकानां शब्दानामनुशासनम् अस्ति। यतोहि पुराकाले वेदव्याकरणं प्रातिशाख्यरूपं वेदविषयकमेव आसीत् शाकटायनविहितं शब्दशास्त्रं लौकिकविषयकमेव आसीत् परन्तु आचार्य-पाणिनेः उभयदृष्ट्या शब्दाधिकारः बभूव। उक्तञ्च- **'केषां शब्दानां? लौकिकानां वैदिकानां च'**[5] इति।

पाणिनीयव्याकरणे उभयविधशब्दानामनुशासनमस्ति। तद्विषये अष्टौ व्याकरणानि सन्ति इति प्राप्यते। उक्तञ्च-

**ब्राह्ममैशानमैन्द्रं च, प्राजापत्यं वृहस्पतिम्।**

---

[1]. वै.सि.कौ.ल.टी. पृ0-5
[2]. महाभाष्यम्, प0 पृ0-2
[3]. महाभाष्यम्, आ0 1
[4]. महाभाष्यम्, आ0 1
[5]. महाभाष्यम्, आ0 1 पृ0-2

**त्वाष्ट्रमापिशलं चेति, पाणिनीयमथाष्टकम्।।**[6] इति।

पाणिनीयव्याकरणात् पूर्वं वैयाकरणानाम् पञ्चाशीतिः प्राप्यते स्वयं पाणिनिरपि गार्ग्य-शाकटायन-स्फोटायन-गालवादीनां दशाचार्याणामुल्लेखं करोति। व्याकरणमात्रमेव वेदाङ्गत्वेन संगृहीतं भवति।

विद्यन्ते ज्ञायन्ते लभ्यन्ते वा धर्मादिपुरूषार्था एभिरिति वेदाः। वेदाः चत्वारः ऋग्यजुःसामाथर्वाणः विद् ज्ञाने[7], विद् विचारणे[8], विदलृ लाभे[9], विद् सत्तायाम्[10] विद् चेतनाख्याननिवासेषु[11] इति धातुभ्यः घञि प्रत्यये सति 'वेदः' इति सुबन्तरूपं भवति। वेदो ज्ञान-राशिः इति वेदेषु पारम्परिक-भारतीयज्ञानपरम्पराभिः सह आधुनिकज्ञानविज्ञानस्यापि सुतरामुपजीव्यत्वं सिद्ध्यति। उक्तञ्च मनुना-

**यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।**[12] इति

वेदाः सर्वज्ञानमयाः मनुनात्र प्रतिबोधितम्। धर्ममूलकताऽपि मनुना विहितम्। उक्तञ्च-

**वेदोऽखिलो धर्ममूलम्।।**[13] इति

इत्थञ्च **'मन्त्रब्राह्मणयोर्वेदनामधेयम्'**[14] **'अपौरूषेयं वाक्यं वेदः'** इति उक्तं धात्वर्थमाश्रित्य अनेके अर्थाः सम्भवन्ति तथा वेदशब्दः प्राधान्येन ज्ञानार्थकः एव गृह्यते योगाद्रूढिर्बलीयसी इति वचनात्। आचार्यपाणिनिना वेदशब्दः उञ्छादिगणेन सह ऋष्यादिगणे पठितः तेन द्विविधोऽर्थको भवति-

---

6. हैम-बृहद्वृत्यवचूर्णि
7. वै.सि.कौ0 धा.सं0-1064
8. वै.सि.कौ0 धा.सं0-1450
9. वै.सि.कौ0 धा.सं0-1432
10. वै.सि.कौ0 धा.सं0-1171
11. वै.सि.कौ0 धा.सं0-1709
12. मनुस्मृति अ. श्लो. 2.7
13. मनु0 2/7
14. मनु0 2/7

आद्युदात्तत्वेन शब्दराशि-अर्थकः, 'अन्तोदात्तत्वेन कुशमुष्ट्यादे-र्बोधकः यथा- **'वेदं कृत्वा वेदिं करोति'** इति। अयमेव अर्थः सर्वशास्त्रादरास्पदोऽस्ति।

तदर्थसाधकानि वेदाङ्गानि षट् सन्ति। अर्थतः, स्वरतः, विनियोगतः एषाम्महती आवश्यकता अस्ति। तानि च- शिक्षा, व्याकरणम्, छन्दः, निरूक्तम्, ज्योतिषम्, कल्पः इति। श्लोकश्च

**'शिक्षा कल्पो व्याकरणं, निरूक्तं छन्दसां चयः।**
**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु।।'** इति
**पुराणमित्येव न साधु सर्वं, नचापि किंचिन्नवमित्यवद्यम्।**
**सन्तः परीक्ष्यान्यतरद् भजन्ते, मूढः परप्रत्ययनेयबुद्धिः।।**

शिक्षा- वर्णोचारणविधिरूपदेष्ट्री शिक्षा। प्रयोजनञ्च-वर्णस्वरमात्राबलसाम-सन्तानानामबोधनम् इति उक्तञ्च-

**"वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तानः। इत्युक्तः शिक्षाध्यायः"**[15]।

वर्णाः आचार्य-पाणिनिना त्रिषष्टिश्चतुःषष्टिर्वा संख्या उल्लिखिता। उक्तञ्च-

**"त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भु मते मताः।**
**प्राकृते संस्कृते चापि स्वयं प्रोक्ता स्वम्भुवा।।"**[16] इति

तत्र **'ऊकालोऽज्झ्रस्वदीर्घप्लुतः'** इति सूत्रार्थबोधेन कालतः अचां त्रयो भेदाः ह्रस्वदीर्घप्लुतरूपाः अ, इ, उ, ऋ वर्णाः भेदत्रयेण द्वादश, लृकारः एक एव ह्रस्वं विहाय दीर्घत्वप्लुतत्वसामानाधिकरण्येन एचोष्टौ इत्येवमेक-विंशतिः स्वराणां सिद्ध्यति। कादयो मावसानाः एकविंशतिः स्पर्शाः, यरलवाः शषसहाश्चाष्टौ चत्वारश्च यमाः स्मृताः, अनुस्वार-विसर्ग-जिह्वामूलीयोध्मानीयाश्चत्वारः इत्येवं द्विषष्टिर्वर्णाः।

दुःस्पृष्टो डकारस्थानिको लकारः। ईडे इत्यस्य ईले इति प्लुत लृकारश्चेति द्वयोः सम्मेलने चतुः षष्टिर्वर्णाः। उक्तञ्च-

**"स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।**

---

15. आप. श्रौत. 31

16. तै. 2.1

**यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः।।"** [17]
**"अनुस्वारो विसर्गश्च ᳲक ᳲपौ चापि पराश्रितौ।**
**दुःस्पृष्टश्चेति विज्ञेय ऌकारः प्लुत एव च।।"**[18] इति।

वर्णेषु स्वरवर्णानां त्रयः भेदाः पाणिनि-शिक्षायामाचार्यो लिखति-

**"उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः।"**[19] इति।

उदात्तशक्तिग्राहकं शास्त्रम् **"उच्चैरूदात्तः"**[20] तथा च वृत्तिः-

**"ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे**
**निष्पन्नोऽजुदात्तः संज्ञः स्यात्।"**[21] इति।

शक्तिग्राहकेऽस्मिन् शास्त्रे उच्चैः पदम् ऊर्द्धावयवपरम् अधिकरण-शक्तिप्रधानञ्च तेन अर्थो भवति 'ऊर्ध्व-भागे' इति। अवयवः अवयवि-नामाकाङ्क्षते इति धिया कस्योर्द्धावयव इत्याकाङ्क्षायाम् प्रकृतशास्त्रोपयो-गित्वात् ताल्वादिस्थानरूपावयविनामूर्ध्वभागः गृह्यते। अधिकरणकारकस्य क्रियासा-काङ्क्षतया 'निष्पन्नः' इत्यस्याध्याहारः। एवञ्च ऊर्द्धाधरभागयुक्तेषु ताल्वादि-स्थानेषु ऊर्द्धभागेनोच्चार्यमाणोऽजुदात्तो भवति।[22] उक्तञ्च- **सुदेवो असि वरूण। यस्य ते सप्त सिन्धवः अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव** इति भाष्यप्रदर्शितश्रुतौ वर्णाभिव्यक्तस्थानस्य तालुत्वेन वर्णनात्।[23]

तथा च उदाहरणम्- **"आ ये"**[24] **अत्र आकारः "निपाता आद्यु-दात्ताः"**[25] इत्यनेन अस्य निपातत्वादुदात्तः। एकारश्चोदात्तः-यच्छब्दः **'फिषोन्त उदान्तः'** फिट् प्रातिपदिकम्, तस्यान्त उदात्त इत्यर्थकेनानेन उदात्तः। ततो

---

17. पा.शि.का. 3
18. पा.शि.का. 4
19. पा.शि.का. 11
20. पा.सू.-1/2/29
21. वै.सि.कौ0 पृ0-23
22. वै.सि.कौ. पृ. 23
23. वेदमन्त्र (म0आ0)
24. फिट्य वा0 80 सू0
25. फिट् 1 पा0 1 सू0

जसि **'त्यदादीनामः'**[26] दस्यानुदात्ताकारे **'अतो गुणे'**[27] अनेन पररुपे **'एकादेश उदात्तेनोदात्तः'**[28] इति य शब्दाकारस्योदात्तत्वे, जसः **"अनुदात्तौ सुप्पितौ"**[29] इत्यनेन अनुदात्तत्वे **'आद्गुणः'**[30] इति गुणे पुनः **'एकादेश उदात्तेनोदात्तः'** इति एकारस्य उदात्तत्वम्।

**विज्ञानदृष्टिः**- अत्रेदं विचारणीयं यदूर्द्धभागनिष्पत्तिः अप्रत्यक्षा तर्हि संज्ञा-करणस्य किं प्रयोजनम्? इति जिज्ञासायाम् अनुसन्धेया विन्दवः भवन्ति-उदात्तत्वविशिष्ट स्वरवर्णस्य उच्चारणे शरीरावयवानामायामः- अशैथिल्यम्, स्वरस्य रूक्षता (अमृदुता), कण्ठविवरस्य संवृतता (संकोचः)।

**आ (उदात्तः)**

↓

शरीरावयवानां विस्तारः, शैथिल्यराहित्यम्, अमृदुता, कण्ठविवरस्य संवृत्तत्वम्

तत्र सवन क्रमेण उरसं, कण्ठं, भ्रूमध्यम् सम्प्राप्य वायुना त्रयो विकारा उत्पाद्यन्ते **'आयाममार्दवाभिघाताः'**[31] इति। एभिः गात्राणां यः स्वरः सम्पद्यते, स उदात्तः।

तथा च मन्त्रः- **"आ ये तन्वन्ति रश्मिभिस्तिरः समुद्रमोजसा। मरूद्भिरग्न आगाहि।"**[32] इति। अर्थात् ये मरुतो देवा रश्मिभिः- सूर्यकिरणैः सहातन्वन्ति-आप्नुवन्ति आकाशमिति। किञ्च ओजसा-स्वकीयबलेन समुद्रं तिरस्कुर्वन्ति। निश्चलस्य जलस्य तरङ्गाद्युत्पत्तये चालनं तिरस्कारः"।[33]

अत्र वैज्ञानिकसम्बन्धस्य चेत्परामर्शः क्रियते निश्चयेन साम्प्रतिकीं **'ज्वारभाटा'** इति घटनां वा 'मिल्कीवेब' इत्यस्य काञ्चिद्घटनाम् उद्घाटयति।

---

[26]. पा0सू0- 7/2/102

[27]. पा0सू0- 6/1/97

[28]. पा0सू0- 8/2/5

[29]. पा0सू0 3/1/4

[30]. पा0सू0-6/1/87

[31]. यजु.प्रा. अ. 1 सू. 31

[32]. ऋग्वेदमन्त्र- 19 सू. 8 मं.

[33]. ऋग्वेदभाष्य-1 म., 19 सू. 8 मं.

**नीचैरनुदात्तः**[34]- अत्रापि **'नीचैः'** शब्दस्य निम्नमार्गोऽर्थः तेन ताल्वादिस्थानस्याधो भागे निष्पन्नोऽजनुदात्तो भवति। तथा चोदाहरणम्- 'अर्वाङ्' इदमभिमुखवाचि अव्युत्पन्नं प्रातिपदिकम् **'फिषोन्त उदात्तः'**[35] अनेन वा शब्दाकार उदात्तः। अत्रत्यः **'अनुदात्तं पदमेकवर्जम्'** इत्यनेन प्रथमोऽकारोऽनुदात्तः।

अनुदात्तत्वविशिष्टवर्णस्योच्चार्यमाणे गात्राणां शैथिल्यम्, स्वरस्य मार्दवम्, कण्ठविवरस्य महत्ता (विकाशः) सोनुदात्तो ज्ञेयः।

**'अर्वाङ्'**[36] **(अनुदात्तत्वविशिष्टः)**

↓

↓ गात्रशैथिल्यम् | ↓ स्वरस्य मार्दवम् | ↓ कण्ठविवरस्य विकाशः

एतच्चित्रेण आयाति यन्नीचैर्मार्दवेन-अधोगमनेन गात्राणां यः स्वरः सम्पद्यते सोऽनुदात्तः।

**समाहारः स्वरितः**[37]- सूत्रेऽस्मिन् **"समाहारशब्दः"** समाह्रियेतेऽस्मिन्' इति विग्रहेऽधिकरणे समुपसृष्टाद्धृधातोः **'अकर्तरि च कारके संज्ञायाम्'**[38] इति सूत्रेण घञि सति सिद्ध्यति अथवा समाहरणं समाहारः= सम्मेलनम्। तत **'अर्श आदिभ्योऽच्'**[39] इत्यचि सम्मेलनाधिकरणरूपोऽर्थः। कस्य समाहारः इत्याकाङ्क्षायां प्रत्यासत्त्या पूर्वोक्तयोः उदात्तानुदात्तयोः लाभो भवति। सूत्रयोः उदात्तानुदात्तपदे शब्दपरे विधेयपरे चैव तथापि एकस्मिन्नपि शब्दयोस्तदर्थधर्मिणोश्च समाहारो न सम्भवति परन्तु लक्ष्यानुरोधात् उदात्तत्वानुदात्तत्वधर्मयोः समाहारोऽवगन्तव्यः। तथा च स्वरितेऽपि उदात्तत्वानुदात्तत्वयोः सत्ताङ्गीकारे विभाजकधर्मत्वोपपत्तिः भवति यतोहि-एकस्मिन्नपि अंशभेदेनोदात्त्वानुदात्तत्वयोः सत्त्वेऽपि अच्त्वावच्छेदेन तयो-

---

[34]. फि0सू0- 1/2/30

[35]. फि0 1 सू0 1/1

[36]. ऋग्वेद मं. 104 सू0 मं.

[37]. पा0सू0-1/2/32

[38]. पा0सू0-3/3/19

[39]. पा0सू0-5/2/127

र्व्यधिकरणत्वम् इति। यद् धर्मावच्छिन्नस्य विभागः चिकीर्षितस्तद्धर्माव-च्छेदेनैव व्यधिकरणत्वमपेक्षितं भवति। यथा पदार्थत्वावच्छेदेन द्रव्यत्व-गुणत्वादीनां वैयधिकरण्यम् इति।

अधुना जिज्ञासा भवति स्वरिते उदात्तत्वानुदात्तत्वयोः कियान् अंशः उदात्तस्य- अनुदात्तस्य वा इति चेदुच्यते आचार्येण-

**तस्यादित उदात्तमर्द्धह्रस्वम्**[40]- आदौ इत्यादितः अत्र एतत् सूत्रज्ञापकसिद्धवार्तिकात् (आद्यादिभ्य उपसंख्यानम्)[41] तसिः। अर्द्ध ह्रस्वमिति पदेनैव तयोर्विभागो भवति ह्रस्वस्यार्द्धमर्द्धह्रस्वमित्येकदेशि-समासः क्रियते। अनेन दीर्घप्लुतयोः न सम्भविष्यति। ह्रस्वपदं यदि मात्रिकांशपरं तदा दीर्घादिष्वपि सत्वे ह्रस्वसंज्ञात्वाभावः अत एव दीर्घादिष्वपि सत्वे ह्रस्व-संज्ञात्वाभावः अत एव दीर्घादिषु ह्रस्वादिप्रयुक्तं तुगादिकं न भवति। यथार्थतः सूत्रेऽस्मिन् ह्रस्वग्रहणमतन्त्रम् इति।

आचार्यभट्टोजिदीक्षितः कौमुद्यां लिखति परन्तु ह्रस्वपदस्य वक्तुरिच्छाविषयत्वाभावेऽपि कथने पाणिनेरून्मत्तत्वापत्तिः स्यादतः ह्रस्वपदं ह्रस्वसंज्ञकत्वेन नोल्लिखितमपितु मात्रापरकत्वेन विवक्षितमिति तात्पर्यम्। एवञ्च **'अर्द्धह्रस्वम्'** इत्यस्य अर्द्धमात्रापरिमिताजंशोऽर्थः गृह्यते।

इत्थञ्च ह्रस्वदीर्घप्लुतेषु सर्वेषु स्वरितेषु प्रागर्द्धमात्रांश उदात्तः शेषांशः प्रायोऽनुदात्तः। अत्र पक्षद्वयम्- कौमुदीकारमते- स्वरितस्यार्द्धांश उदात्तः उत्तरार्द्धांशस्त्वनुदात्तः। नागेशमते- सर्वत्रैकमात्रार्द्धांश उदात्तः शेषांशो-ऽनुदात्तः। यथा- ह्रस्वस्वरितेऽर्द्धांश उदात्तः शेषोऽनुदात्त उभयमते। दीर्घेऽर्द्ध-मात्रांशः प्रागुदात्तः, अवशिष्टः सार्द्धैकमात्रांशोऽनुदात्तः। प्लुते प्रागर्द्धमात्रांश उदात्तः शेषं सार्द्धैकमात्राद्वयमनुदात्तम्। आचार्य-दीक्षितस्य तु सर्वत्र पूर्वार्द्धभाग उदात्त **उत्तरार्द्धांशोऽनुदात्तः** इति।

स्वरिते उत्तरार्द्धांशोनुदात्तस्य उदात्तस्वरितपरत्वे श्रवणं भवति। यत्र स्वरितात्परः स्वरः स्वरितोऽथवा उदात्तः नास्ति तत्र अनुदात्तः शेषनिघातेन

---

40. पा0सू0-1/2/32

41. का0वा0

न श्रूयते। उक्तञ्च- **"तस्य चोदात्तस्वरितपरत्वे श्रवणं स्पष्टम्"**[42] इति। तथा चोदाहरणम्- **"क्व वोऽश्वाः"**[43]। **रथानां न येऽराः**[44]। **"शत चक्रं योऽह्यः"**[45] इति। उदात्तपरत्वे ह्रस्वस्वरितस्योदाहरणम्- **'क्व वोश्वाः'** इति।

अत्र वकारोत्तराकारः **'तित् स्वरितम्'** इत्यनेन स्वरितः। **'वोऽश्वाः'** अत्र वो इत्योकारस्योदात्तत्वेन उदात्तपरत्वात्। उदात्तपरदीर्घस्वरितस्योदाहरणम्- **'येऽराः'** अत्र एकारः स्वरितः। तस्याद्यंशः उदात्तः, परभागोऽनुदात्तः, 'रा' शब्दाकारस्योदात्तत्वेन उदात्तपरत्वात्।

स्वरितपरस्य प्लुतस्वरितस्योदाहरणम्- **'योऽह्यः'** अत्र **'यो'** इत्यत्र ओकारः प्लुतस्वरितः यस्य आद्यंश उदात्तः अन्त्यांशोऽनुदात्तः 'ह्यः' इत्यकारस्य स्वरितत्वात्। यत्र उदात्तस्वरितपरत्वन्नास्ति यथा- 'अग्निमीले' इत्यत्र मकारोत्तरवर्तीकारः 'उदात्तादनुदात्तस्य स्वरितः' अनेन स्वरितः। 'लकारोत्तरवर्त्येकारस्य 'स्वरितात्संहितायाम्' इत्यनेन एकश्रुतित्वं कृतम्। तेन ईकारस्य स्वरितस्य स्वरितपरत्वाभावादुत्तरभागोऽप्युदात्त एव श्रूयते।

अत्र इदमपि चिन्त्यं यन्महाभाष्यकारः वेदविद्यां पूर्वविद्यां प्रतिपादयति तेन सूत्रत्रयस्यापि किं प्रयोजनम्? किं च उदात्तादीनां लोकवेदप्रसिद्धतया तेषामनावश्यकत्वात् इति चेदुच्यते महाभाष्यकारेण- **'व्याकरणं नामेयमुत्तरा विद्या। सोऽसौ छन्दः शास्त्रेष्वभिविनीत उपलब्ध्याधिगन्तुमुत्सहते'**[46] इति। 'उत्तरा' इत्यस्य वेदविद्याया अध्ययनान्तरं व्याकरणाध्ययनम् पुराकाले आसीत् परन्तु अद्यत्वे वेदाध्ययनात्प्रागेव व्याकरणमधीयते अत शास्त्रत्रयस्य सार्थक्यमिति।

सूत्रत्रयेण त्रयः स्वरा प्रतीयन्ते परन्तु चतुर्थ एकश्रुतिस्वरोऽपि विज्ञेयः। तथा च सूत्रम्- **"एकश्रुति दूरात्सम्बुद्धौ"**[47] इति। एका उदात्तादि-

---

42. सि0कौ0सू0- 1/2/32
43. ऋग्वेद- 5म. 61 सू. 2म.
44. ऋग्वेद- 10म. 78 सू. 4म.
45. ऋग्वेद- 10म. 78 सू. 4म.
46. म0भा0
47. पा0सू0-1/2/33

भेदरहिता श्रुतिः श्रवणं यस्य वाक्यस्य तदेकश्रुति-वाक्यविशेणमेतत्। उक्तञ्च एतत् सर्वम् ऋक्प्रतिशाख्ये-

**"अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत्।**
**उदात्तं वोच्यते किञ्चित् स्वरितं वाक्षरं परम्।।"**[48]

तथा चार्थः- स्वरितस्य परः शेष उत्तरभाग उदात्तः प्रयोक्तव्यः। यदा परमक्षरम् (अच्) उदात्तं स्वरितं वा, नोच्यते चेत् तदा स शेष उदात्त-श्रुतिर्भवति।

**स्वरिरतोऽष्टविधः**[49]- जात्यः, अनुदात्तपूर्वः, उदात्तपूर्वः। तत्र उदात्तपूर्वः सप्तविधः- अनभिहितः, क्षैप्रः, प्रक्लिष्टः, तैरोव्यञ्जनः, तैरोविरामः, पादवृत्तः, ताथाभावः।

तत्रैकपदेऽनुदात्तपूर्वे यकारवकाराभ्यां सहितो जात्यः। एकाराद् ओकारश्च परोऽकारो यत्रानुदात्तो लुप्यते तत्रानभिहितः स्वरो भवति।

यत्र इकार उदात्तोऽनुदात्तपरो यकारेण युक्तो भवति, यद्वा उकार उदात्तोऽनुदात्तपरो वकारेण युक्तो भवति, तत्र क्षैप्रः स्वरितो भवति। समस्तपदे यदावग्रहो भवति तदोदात्तादवग्रहात् परस्तैरो विरामः यथा गोपतौ। गो पतौ स्वरयोरनन्तरयोरन्तरं विवृतिरूच्यते। तथा लक्ष्यते इति विवृत्ति लक्षणः पदवृत्तः, उदात्तादिरूदात्तान्तो नीचावग्रहस्तथाभावसंज्ञकः स्वरो भवति। अयं माध्यन्दिनीनां न भवति। सामवेदीय स्वराः त्रिष्वेव अन्तर्भवन्ति-उदात्ते-निषाद-गान्धारौ, अनुदात्ते-ऋषभधैवतौ, स्वरिते-षड्ज-मध्यमपञ्चमा स्वरा अन्तर्भवन्ति। उक्तञ्च पाणिनि-शिक्षायाम्-

**"उदात्ते निषाद-गान्धारावनुदात्त ऋषभधैवतौ।**
**स्वरितप्रभवा ह्यते षड्जमध्यम पञ्चमाः।।"**[50] इति

नारदेनापि स्वराणां त्रयमुक्तम्-

**"उच्चादुच्चरं नास्ति नीचान्नीचतरं तथा।**

---

48. ऋक्प्रतिशाख्यम्- (3-5)
49. मुण्डकोपनिषद्
50. मुण्डकोपनिषद्

**त्रैस्वर्ये स्वरसंज्ञायां किं स्थानं स्वर उच्यते।।"[51]**
**"उच्चनीचस्थयोर्मध्ये साधारण इति श्रुतिः।**
**तं स्वरं स्वरसंज्ञायां प्रतिजानन्ति शैक्षिकाः।।"[52]** इति

**उपसंहारः**— इत्येवं प्रकारेण पाणिनेः अभिमतं स्वराणां स्वरूपं विहितम्। पाणिनीयशिक्षायामाचार्यः स्वकण्ठरवेण एकादशकारिकायामुल्लिखति- "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः"।(पा.शि.का.११)इति। इने कालतो नियमिता दृश्यन्ते यथा- ह्रस्वः मात्रया, दीर्घः द्विमात्रया, प्लुतः त्रिमात्रया नियमिताः भवन्ति। उक्तञ्च- "ह्रस्वो दीर्घः प्लुतः इति कालतो नियमा अचि" (पा.शि.का.११)इति।

उदात्त्वसमानाधिकरणेऽपि प्रयत्नतीव्रत्वं, गात्रनिग्रहत्वं, कण्ठविलस्य चाणुत्वं स्वरस्य च प्रतीयते। उक्तञ्चापिशलशिक्षायाम्- "यदा सर्वाङ्गानुसारी प्रयत्न-स्तीव्रो भवति तदा गात्रस्य निग्रहः, कण्ठविलस्य चाणुत्वं स्वरस्य च वायोस्तीव्रगतित्वाद्, रौक्ष्यं भवति"। (आ.शि.८.२०)

अनुदात्तत्वसमानाधिकरणेऽचि मन्दप्रयत्नत्वं, गात्रस्रंसत्वं कण्ठविलस्य महत्वं स्निग्धत्वं च सामान्यतयानुभूयमानं भवति। उक्तञ्चापिशलिक्षायाम्- "यदा मन्दः प्रयत्नों भवति तदा गात्रस्य स्रंसनं, कण्ठविलस्य महत्वं, स्वरस्य च वायोर्मन्दगतित्वात् स्निग्धता भवति"। (आ.शि.८.२१)

उदात्तत्वानुदात्तत्वसमानाधिकरणेऽचि स्वरितव्यवहारो भवति। उक्तञ्चापि-शलकारिकायाम्- "उदात्तानुदात्तस्वरसन्निपातात् स्वरितः इति [53]

इत्थञ्च- प्रायशः त्रयः स्वराः सर्वशिक्षासु भेदाः प्राप्यन्ते। ऋग्वेदप्रातिख्येऽपि "स्वरास्त्रयः" इत्यभिहितम्। नाट्यशास्त्रे कम्पितेन सह चत्वारः स्वराः कथिताः। उक्तञ्च-"उदात्तानुदात्तश्च स्वरितः कम्पितस्तथा"। (ना.शा.१७.१०८)

स्वरविषयशब्दशास्त्रे अतीव महत्त्वमासादितमस्ति। अत एव महा-भाष्यकाराः व्याकरणाध्ययनस्यानुषङ्गिकप्रयोजनं प्रतिपादयन्तः स्वरतो-

---

51. मुण्डकोपनिषद्

52. मुण्डकोपनिषद्

53 आ.शि. ८.२२

ऽपराधं वाग्वज्रत्वेन निरूपयति। पत्रेऽस्मिन् महता यत्नेन न केवलं स्वरसंख्या स्थापिता अपितु स्वरितवर्णे उदात्तत्वानुदात्तत्वस्य भागोऽपि निर्णीतः इति।

**सन्दर्भग्रन्थसूची-**

1. वैयाकरणसिद्धान्तकौमुदी (ल. सहिता)- मोतीलालबनारसीदास
2- महाभाष्यम्. -चौखम्भासंस्कृतभवन
3- हैम-बृहदनृत्यवचूर्णि
4 वैयाकरणसिद्धान्तकौमुदी-. मोतीलालबनारसीदास
5- मनुस्मृतिः-चौखम्भा संस्कृतभवन
6- आपस्तम्ब-श्रौतसूत्रम्- चौखम्भासंस्कृतविद्याभवन
7- तैतिरीयसंहिता
8- पाणिनीयशिक्षा चौखम्भासंस्कृतभवन
9- पाणिनीय-अष्टाध्यायी- चौखम्भासंस्कृतभवन
10- यजुर्वेदप्रातिशाख्यम्
11- ऋग्वेदभाष्यभूमिका
12- ऋग्वेदसंहिता
13- मुण्डकोपनिषद-गीताप्रेस

*********

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५

ISSN: 0975-1769 UGC CARE ID:101000019

# भास्कराचार्योक्तरीत्या प्रकारचतुष्टयेन कर्णानयनम्

**गिरीशभट्टः बि**
सिद्धान्तज्यौतिषशास्त्रे विद्यावारिधि(Ph.D)-शोधच्छात्रः
ज्यौतिष-वास्तुविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**शोधसारः** – *जात्यत्रिभुजे समकोणसंश्लिष्टभुजयोर्मध्ये एकः भुजः, अपरः कोटिः, तथा शिष्टश्च समकोणसम्मुखः बाहुः कर्णः इति व्यपदिश्यते। जात्यत्रिभुजे भुजकोट्योः ज्ञानं भवति चेत् तयोर्वर्गयोगमूले कृते सति कर्णः उपलभ्यते। ग्रहस्फुटीकरणगणिते मन्दकर्णः शीघ्रकर्णश्च एव कर्णशब्देन व्यपदिश्येते। भूकेन्द्रात् प्रतिमण्डलस्थग्रहपर्यन्तं या तिर्यग्रेखा कल्प्यते सा कर्णरूपेण भवति। अस्य कर्णसूत्रस्य कक्षावृत्तस्य च यत्र सम्पातः भवति तत्र भूस्थः द्रष्टा प्रतिमण्डलस्थं खचरं पश्यति। तस्मात् कारणात् कक्षावृत्ते स्पष्टग्रहस्य स्थानं ज्ञातुं कर्णज्ञानमावश्यकम्। प्रकारचतुष्टयेन तदानयनक्रमः भास्कराचार्येण सिद्धान्तशिरोमणौ प्रतिपादितः। तत्र प्रकारद्वयं प्रतिवृत्तभङ्गीमाश्रितं भवति। तथा शिष्टं प्रकारद्वयं नीचोच्चवृत्तभङ्गीम् आश्रितं भवति। भास्कराचार्येण कर्णानयनार्थः निर्दिष्टाः एते चत्वारः प्रकाराः अस्मिन् पत्रे प्रतिपादिताः सन्ति।*

**कूटशब्दाः** – कर्णः, प्रतिवृत्तम्, नीचोच्चवृत्तम्, अन्त्यफलज्या, त्रिज्या

**प्रस्तावना** - अहर्गणानीतमध्यमग्रहस्य स्फुटीकरणार्थं असकृद्वारं मन्दशीघ्रफलयोः संस्कारः करणीयः भवति। मन्दफलस्य आनयनार्थं यः कर्णः साध्यते स एव मन्दकर्णः इत्युच्यते। एवञ्च शीघ्रफलस्य आनयनार्थं यः कर्णः साध्यते स एव शीघ्रकर्णः इत्युच्यते। रवीन्दू मन्दफलेनैकेनैव संस्कारेण स्फुटौ भवतः इति हेतोः रवीन्द्वोः स्फुटीकरणसन्दर्भे केवलं मन्दकर्णस्यैव साधनं पर्याप्तं भवति। परन्तु कुजादयो पञ्च ताराग्रहाः असकृद्वारं मन्द-शीघ्रफलयोः संस्कारेण स्फुटाः भवन्ति। अतः तेषां स्फुटीकरणसन्दर्भे मन्दकर्णः,

शीघ्रकर्णश्च उभयमपि आनेतव्यं भवति। भूकेन्द्रात् मन्दप्रतिवृत्तस्थं मन्दनीचोच्चवृत्तस्थं वा ग्रहं यावत् कल्पिता तिर्यग्रेखा एव मन्दकर्णः इत्युच्यते। एवञ्च भूकेन्द्रात् शीघ्रप्रतिवृत्तस्थं शीघ्रनीचोच्चवृत्तस्थं वा ग्रहं यावत् कल्पिता तिर्यग्रेखा एव शीघ्रकर्णः इत्युच्यते। ग्रहस्फुटीकरणगणिते एतौ मन्द-शीघ्रकर्णाविव कर्णशब्देन कथ्येते। मन्दकर्णस्य शीघ्रकर्णस्य वा साधनार्थं श्रीमता भास्कराचार्येण सिद्धान्तशिरोमणौ ग्रहगणिताध्याये स्पष्टाधिकारे चत्वारः प्रकाराः कथिताः। तत्र प्रकारद्वयं प्रतिवृत्त-भङ्गिमाश्रित्य। पुनः प्रकारद्वयं नीचोच्चवृत्तभङ्गिमाश्रित्य। तत्रापि एकैकः प्रकारः स्वाभाविकप्रकारः, पुनः एकैकः प्रकारः आदिमप्रकारस्यैव बीजगणितद्वारा विश्लेषणं कृत्वा गणितचमत्कृत्या कथितः प्रकारः। इत्थं भास्कराचार्येण मन्द-शीघ्रकर्णयोः साधनार्थं कथिताः चत्वारः प्रकाराः अधोनिर्दिष्टरीत्या भवन्ति –

१. प्रतिवृत्तभङ्ग्या कर्णानयने स्वाभाविकः प्रकारः।
२. प्रतिवृत्तभङ्ग्या कर्णानयने बीजगणितीयनियमानुसारेण गणितचमत्कृत्या कथितः प्रकारः।
३. नीचोच्चवृत्तभङ्ग्या कर्णानयने स्वाभाविकः प्रकारः।
४. नीचोच्चवृत्तभङ्ग्या कर्णानयने बीजगणितीयनियमानुसारेण गणितचमत्कृत्या कथितः प्रकारः।

**प्रतिवृत्तभङ्ग्या प्रकारद्वयेन कर्णानयनम्**

**प्रथमः प्रकारः –**

> **स्वकोटिजीवान्त्यफलज्ययोर्यो योगो मृगादावथ कर्कटादौ।**
> **केन्द्रेऽन्तरं तद्भुजजीवयोर्यद्वर्गैक्यमूलं कथितः स कर्णः ॥**[1]

पूर्वापरायतायां भित्तौ उत्तरपार्श्वके बिन्दुमेकं कृत्वा तस्माद्बिन्दोः त्रिज्यामितेन कर्कटेन कक्षावृत्तं विलिख्य ग्रहमध्यमदिनगतेः तिथ्यंशमित-व्यासार्धेन अर्थात् ग्रहमध्यमदिनगतेः पञ्चदशांशमितया त्रिज्यया भूमिं विलिखेत्। कक्षावृत्तपरिधौ कुत्रापि मेषादिं प्रकल्प्य तस्मात् गणितागतस्थाने मध्यमग्रहम् उच्चं च दत्त्वा भूकेन्द्रात् उच्चबिन्दुपर्यन्तम् उच्चरेखा कार्या। अस्याम्

[1] सिद्धान्तशिरोमणिः – ग्रहगणिताध्यायः – स्पष्टाधिकारः – श्लोकः २७

उच्चरेखायां मत्स्यकरणेन कक्षावृत्तकेन्द्रगामिनी(भूकेन्द्रगामिनी) तिर्यग्रेखा कार्या। ततो अन्त्यफलज्यामितां सूत्रं भूमध्यात् उच्चरेखायां दत्त्वा तस्याः अन्त्यफलज्यायाः अग्रमेव केन्द्रं मत्वा त्रिज्यामितेनैव कर्कटेन प्रतिवलयं (प्रतिवृत्तं) विलिखेत्। उच्चरेखां प्रतिमण्डलस्य परिधिपर्यन्तं वर्धयित्वा तत्रापि उच्चस्थानं चिह्नयेत्। तत्र मत्स्यकरणेन प्रतिमण्डलमध्यगामिनी तिर्यग्रेखा कार्या। प्रतिमण्डलस्य उच्चबिन्दुतः उच्चराशिभागान् विलोमतः गणयित्वा मेषादिः कल्प्यः। ततः ग्रहः अनुलोमतः देयः। प्रतिमण्डलस्थग्रहात् उच्चपर्यन्तं कल्पिता रेखा दोर्ज्या। ग्रहात् प्रतिमण्डलकेन्द्रगामितिर्यग्रेखापर्यन्तं कल्पिता रेखा कोटिज्या। भुजज्या एव भुजः, कोटिज्या एव कोटिः भवति। अतः तयोर्वर्गयोगमूलेन कर्णः लभ्यते। किन्तु सः कर्णः प्रतिमण्डलकेन्द्रात् ग्रहावधि विद्यमानमन्तरं भवति। किन्तु अस्माभिस्तु भूकेन्द्रात् ग्रहावधि विद्यमानमन्तरं ज्ञातव्यम्। तदर्थं मकरादिकेन्द्रे कोटिज्या-अन्त्यफलज्ययोर्योगेन[2] स्फुटकोटिं संसाध्य स्फुटकोटि-भुजज्ययोर्वर्गैक्यपदेन भूकेन्द्रात् ग्रहावधि तिर्यगन्तररूपं कर्णप्रमाणं साधयेत्। तथा कर्क्यादिकेन्द्रे कोटिज्यातः अन्त्यफलज्यां विशोध्य स्फुटकोटिं संसाध्य कर्णप्रमाणं साधयेत्।

एतस्याः कर्णानयनप्रक्रियायाः समीकरणानि अधोनिर्दिष्टरीत्या भवन्ति –

मकरादिकेन्द्रे –

कोटिज्या + अन्त्यफलज्या = स्फुटकोटिः

कर्क्यादिकेन्द्रे –

कोटिज्या – अन्त्यफलज्या = स्फुटकोटिः

$$\sqrt{(\text{भुजज्या}^{२} + \text{स्फुटकोटि}^{२})} = \text{कर्णः}$$

अनेन कर्णसूत्रेण कक्षावृत्तं यत्र छिद्यते तत्र प्रतिमण्डलस्थः स्फुटग्रहः दृश्यते। एवं कर्णानयने प्रथमः प्रकारः।

---

[2] मकरादिराशिषट्के प्रतिवृत्तमध्यस्थतिर्यग्रेखायाः कक्षावृत्तमध्यगतिर्यग्रेखा अन्त्यफलज्यामितान्तरे उपरि वर्तते, कर्क्यादिराशिषट्के च अधः वर्तते। अतः मकरादिराशिहट्के कोटिज्या-अन्त्यफलज्ययोर्योगेन स्फुटकोटिः लभ्यते। कर्क्यादिराशिषट्के कोटिज्या-अन्त्यफलज्ययोरन्तरेण स्फुटकोटिः लभ्यते इत्युपपन्नम्।




**चित्रम् – १ : प्रतिवृत्तभङ्ग्या कर्णानयनम्**

**द्वितीयः प्रकारः –**

> **त्रिज्या तथा कोटिफलेन युक्ता हीना च तद्दोःफलवर्गयोगात्।**
> **मूलं श्रुतिर्वा..................................................॥**[3]

इति प्रतिवृत्तभङ्ग्या कर्णानयने द्वितीयः प्रकारः।

**"खण्डद्वयस्याभिहतिर्द्विनिघ्नी तत्खण्डवर्गैक्ययुता कृतिर्वा"**[4] इति लीलावत्युक्तरीत्या प्रथमप्रकारोक्तसूत्रस्यैव विश्लेषणं कृत्वा मकरादिकेन्द्रे त्रिज्यावर्गे द्विगुणितं कोटिज्या-अन्त्यफलज्ययोर्घातं संयोज्य पुनः अन्त्यफलज्यावर्गं च संयोज्य मूले गृहीते सति कर्णः लभ्यते। तथा कर्क्यादि-केन्द्रे त्रिज्यावर्गात् द्विगुणितं कोटिज्या-अन्त्यफलज्ययोर्घातं विशोध्य पुनः अन्त्यफलज्यावर्गं च संयोज्य मूले गृहीते सति कर्णः लभ्यते। एवं कर्णानयने द्वितीयो प्रकारः।

वयं समीकरणमाध्यमेन एनं प्रकारं अधोनिर्दिष्टरीत्या व्यक्तीकर्तुं शक्नुमः –

$$\sqrt{\text{त्रिज्या}^{\text{२}} \pm (\text{२कोटिज्या} \times \text{अन्त्यफलज्या}) + \text{अन्त्यफलज्या}^{\text{२}}} = \text{कर्णः}$$

---

[3] सिद्धान्तशिरोमणिः – ग्रहगणिताध्यायः – स्पष्टाधिकारः – श्लोकः २८

[4] लीलावती – अभिन्नपरिकर्माष्टकम् – श्लोकः ९

**अत्रोपपत्तिः –**

वयम् अस्य समीकरणस्य उपपत्तिं बीजगणितद्वारा इत्थं प्रदर्शयितुं शक्नुमः–

$$(\text{कोटिज्या} \pm \text{अन्त्यफलज्या} = \text{स्फुटकोटिः}$$

$$\sqrt{(\text{भुजज्या}^{२} + \text{स्फुटकोटिः}^{२})} = \text{कर्णः}$$

$$\sqrt{(\text{भुजज्या}^{२} + (\text{कोटिज्या} \pm \text{अन्त्यफलज्या}^{२})} = \text{कर्णः}$$

$$(\text{या} \pm \text{का})^{२} = \text{या}^{२} \pm \text{२याका} + \text{का}^{२}$$

इति सूत्रानुसारेण,

$$\sqrt{(\text{भुजज्या}^{२} + \text{कोटिज्या}^{२} \pm (\text{२कोटिज्या} \times \text{अन्त्यफलज्या}) + \text{अन्त्यफलज्या}^{२}} = \text{कर्णः}$$

$$\text{भुजज्या}^{२} + \text{कोटिज्या}^{२} = \text{त्रिज्या}^{२}$$

अतः,

$$\sqrt{\text{त्रिज्या}^{२} \pm (\text{२कोटिज्या} \times \text{अन्त्यफलज्या}) + \text{अन्त्यफलज्या}^{२}} = \text{कर्णः}$$

इत्युपपन्नम्।

एवं प्रतिवृत्तभङ्ग्या कर्णानयनस्य प्रकारद्वयं भवति। तत्र प्रथमः प्रकारः छेद्यकमुपयुज्य कर्णानयनं भवति। द्वितीयः प्रकारस्तु बीजगणितद्वारा भवति।

## नीचोच्चवृत्तभङ्ग्या प्रकारद्वयेन कर्णानयनम्

**तृतीयः प्रकारः –**

**........अन्त्यफलत्रिमौर्व्योर्वर्गैक्यराशेश्च तथा युतोनात् ॥**[5]

पूर्ववत् कक्षावृत्तं विलिख्य कक्षावृत्ते यत्र मध्यग्रहस्थानं भवति तस्मात् मन्दनीचोच्चवृत्तम् अथवा यत्र मन्दस्पष्टग्रहस्थानं वर्तते तस्मात् शीघ्रनीचोच्चवृत्तम् अन्त्यफलज्यामितकर्कटेन विलिखेत्। भूकेन्द्रात् मध्यग्रह-

---

[5] सिद्धान्तशिरोमणिः – ग्रहगणिताध्यायः – स्पष्टाधिकारः – श्लोकः २८

स्थानपर्यन्तं (मन्दस्पष्टग्रहपर्यन्तं वा) या रेखा वर्तते सा किञ्चित् दीर्घा कार्या। सा रेखा नीचोच्चवृत्तपरिधिं यत्र स्पृशति तत्र उच्चबिन्दुः कार्यः। तस्मात् षड्राश्यन्तरे नीचबिन्दुः कार्यः। ताभ्यां नीचोच्चबिन्दुभ्यां मत्स्यकरणेन नीचोच्चवृत्तकेन्द्रगामिनी तिर्यग्रेखा कार्या। मन्दनीचोच्चवृत्ते उच्चस्थानात् केन्द्रगत्या विलोमं द्युचरं देयम्। शीघ्रनीचोच्चवृत्ते द्युचरम् अनुलोमं देयम्। नीचोच्चवृत्तस्थमध्यग्रहात् मध्यसूत्रपर्यन्तं या तिर्यग्रेखा भवति सा दोःफलम् (भुजफलम्)। नीचोच्चवृत्तस्थग्रहात् नीचोच्चवृत्तमध्यगतिर्यग्रेखापर्यन्तं या ऊर्ध्वरेखा सा कोटिफलम्। दोर्ज्यामेव भुजं, कोटिज्यामेव कोटिं च मत्वा तयोर्वर्गैक्यपदेन कर्णः कृतश्चेत् सः कर्णः भूकेन्द्रात् ग्रहावधि न भवति। किन्तु नीचोच्चवृत्तकेन्द्रात् ग्रहावधि भवति। अतः मकरादिकेन्द्रे त्रिज्या-कोटिफलयोः योगेन स्फुटकोटिं संसाध्य, कर्क्यादिकेन्द्रे त्रिज्या-कोटि-फलयोरन्तरेण स्फुटकोटिं संसाध्य स्फुटकोटि-भुजफलयोः वर्गैक्यपदेन यः कर्णः साध्यते सः भूकेन्द्रात् ग्रहावधि विद्यमानमन्तरं भवति। एवं कर्णानयने तृतीयः प्रकारः।

एतस्याः कर्णानयनप्रक्रियायाः समीकरणानि अधोनिर्दिष्टरीत्या भवन्ति –

मकरादिकेन्द्रे –

त्रिज्या + कोटफलम् = स्फुटकोटिः

कर्क्यादिकेन्द्रे –

त्रिज्या – कोटिफलम् = स्फुटकोटिः

$$\sqrt{(\text{भुजज्या}^{२} + \text{स्फुटकोटि}^{२})} = \text{कर्णः}$$



**चित्रम् – २ : नीचोच्चवृत्तभङ्ग्या कर्णानयनम्**

**चतुर्थः प्रकारः –**

> **त्रिभज्यया कोटिफलद्विनिघ्न्या कोटिज्यया वान्त्यफलद्विनिघ्न्या।**
> **मूलं श्रुतिर्वा..................................................॥[6]**

त्रिज्यावर्गे द्विगुणितं त्रिज्या-कोटिफलयोर्घातं अन्त्यफलज्यावर्गं च संयोज्य मूले कृते मकरादिकेन्द्रे कर्णः भवति। त्रिज्यावर्गतः द्विगुणितं त्रिज्या-कोटिफलयोर्घातं विशोध्य अन्त्यफलज्यावर्गं योज्य मूले कृते कर्क्यादिकेन्द्रे कर्णो भवति। एवं चतुर्थः प्रकारः।

एनं प्रकारं समीकरणमाध्यमेन वयम् इत्थं प्रदर्शयितुं शक्नुमः –

$$\sqrt{\left(\text{त्रिज्या}\right)^{२} \pm (२\text{त्रिज्या} \times \text{कोटिफलम्}) + \text{अन्त्यफलज्या}^{२}} = \text{कर्णः}$$

**अत्रोपपत्तिः** – अस्य समीकरणस्य उपपत्तिं बीजगणितद्वारा अधोनिर्दिष्ट-रीत्या प्रदर्शयितुं वयं शक्नुमः –

$$\sqrt{\text{भुजफलम्}^{२} + \text{स्फुटकोटिः}^{२}} = \text{कर्णः}$$

$$\text{त्रिज्या} \pm \text{कोटिफलम्} = \text{स्फुटकोटिः}$$

$$\sqrt{\text{भुजफलम्}^{२} + (\text{त्रिज्या} \pm \text{कोटिफलम्})^{२}} = \text{कर्णः}$$

$$(\text{या} \pm \text{का})^{२} = \text{या}^{२} \pm २\text{याका} + \text{का}^{२}$$

$$\sqrt{\text{भुजफलम्}^{२} + \left(\text{त्रिज्या}\right)^{२} \pm २\text{त्रिज्या}.\text{कोटिफलम्} + \text{कोटिफलम्}^{२}} = \text{कर्णः}$$

$$\text{भुजफलम्}^{२} + \text{कोटिफलम्}^{२} = \text{अन्त्यफलज्या}^{२}$$

अतः,

$$\sqrt{\left(\text{त्रिज्या}\right)^{२} \pm (२\text{त्रिज्या} \times \text{कोटिफलम्}) + \text{अन्त्यफलज्या}^{२}} = \text{कर्णः}$$

इत्युपपन्नम्।

---

[6] सिद्धान्तशिरोमणिः – ग्रहगणिताध्यायः – स्पष्टाधिकारः – श्लोकः २९

**निष्कर्षः** – ग्रहस्फुटीकरणप्रसङ्गे कर्णः नाम भूकेन्द्रात् ग्रहावधि विद्यमान-मन्तरं भवति। स च कर्णः मन्दकर्णः, शीघ्रकर्णः चेति द्विविधः। मन्दफलसाधनसन्दर्भे यः कर्णः साध्यते सः मन्दकर्णः। एवञ्च शीघ्रफलसाधनसन्दर्भे यः कर्णः साध्यते सः शीघ्रकर्णः। मन्दप्रतिवृत्तभङ्ग्यां मन्दनीचोच्चवृत्तभङ्ग्यां वा मन्दकर्णः प्रदर्श्यते। एवञ्च शीघ्रप्रतिवृत्तभङ्ग्यां शीघ्रनीचोच्चवृत्तभङ्ग्यां वा शीघ्रकर्णः प्रदर्श्यते। भास्कराचार्येण सिद्धान्तशिरोमणौ ग्रहगणिताध्याये स्पष्टाधिकारे श्लोकेषु एवञ्च वासाभाष्ये कर्णानयनस्य ये चत्वारः प्रकाराः प्रतिपादिताः ते प्रकाराः अस्मिन् शोधपत्रे सूत्र-चित्रादीनां साहाय्येन मया विस्तरेण निरूपितम्। शोधपत्रमिदं शोधच्छात्त्राणां जिज्ञासूनाञ्च ज्ञानवर्धनार्थम् उपयोगिकं स्यादिति भावयन् अस्य शोधपत्त्रस्य कृते पूर्णविरामः दीयते।

## सन्दर्भग्रन्थसूची


1. **सिद्धान्तसम्राट्;** ग्रन्थकर्ता – जगन्नाथसम्राट्, प्रथमसंस्करणम्, संस्करणवर्षम् – सा.यु.१९७६, प्रकाशनसंस्था – संस्कृतपरिषद्, सागरविश्वविद्यालयः, सागरम् (मध्यप्रदेशः)
2. **श्रीमद्भास्कराचार्यप्रणीतः सिद्धान्तशिरोमणिः – स्वोपज्ञवासना-भाष्यसंवलितो नृसिंहदैवज्ञकृतवार्त्तिकोपेतश्च;** सम्पादकः – डॉ. मुरलीधरचतुर्वेदः; तृतीयं संस्करणम्; संस्करणवर्षम् – सा.यु.२०१०; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
3. **"ज्यासिद्धान्ताः"Formulas of Sine;** सम्पादकः–पं.शिवचरण-शास्त्री; प्रकाशनवर्षम् – सा.यु.२०१४; प्रकाशनसंस्था – राष्ट्रियसंस्कृत-साहित्यकेन्द्रम्, जयपुरम्
4. **सिद्धान्तसार्वभौमः – द्वितीयो भागः, ग्रन्थकर्ता –** मुनीश्वरः, प्रकाशनवर्षम् – सा.यु.१९३५, प्रकाशनसंस्था – राजकीयसंस्कृतमहाविद्यालयः, वाराणसी
5. **सिद्धान्ततत्त्वविवेकः – प्रथमो भागः,** ग्रन्थकर्ता – कमलाकरभट्टः, व्याख्याकारः – श्रीगङ्गाधरशर्मा, द्वितीयसंस्करणम्, संस्करणवर्षम् – सा.यु.२०१७, प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

6. **सिद्धान्तशेखरः ;** ग्रन्थकर्ता – श्रीपतिः, व्याख्याकारः – सत्यदेवशर्मा, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी
7. **सिद्धान्तशिरोमणेर्गोलाध्यायस्योपपत्तिः**– लेखकः– डॉ.प्रेमकुमारशर्मा, संस्करणम् : सा.यु.२००५, प्रकाशनसंस्था – नागप्रकाशनम्, नवदेहली
8. **अर्वाचीनं ज्योतिर्विज्ञानम्;** ग्रन्थकर्ता – श्रीरमानाथसहायः; प्रकाशन-वर्षम्– सा.यु.१९९६; प्रकाशनसंस्था–सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
9. **ज्योतिर्विज्ञानम्;** ग्रन्थकर्ता – धूलिपाल अर्कसोमयाजी; प्रकाशनवर्षम् – सा.यु.१९६४; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
10. **म०म०बापूदेवशास्त्रिकृता सरलत्रिकोणमितिः;** सम्पादकः – पण्डितश्रीगोविन्दपाठकः; प्रकाशनवर्षम् – सा.यु.२००२; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
11. **म०म० बापूदेवशास्त्रिकृता सरलत्रिकोणमितिः (संस्कृत-हिन्दीव्याख्योपेतम्);** व्याख्याकारः – पं.सत्यदेवशर्मा; संस्करणवर्षम् – सा.यु.२०१२; प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी
12. **पं. बलदेवमिश्रकृता सरलत्रिकोणमितिः;** व्याख्याकारः सम्पादकश्च – डॉ. कमलाकान्तपाण्डेयः; प्रकाशनवर्षम् – सा.यु.२००७; प्रकाशनसंस्था – शारदासंस्कृतसंस्थानम्, वाराणसी
13. **ज्योतिष-सिद्धान्त-मञ्जूषा;** ग्रन्थकर्ता – डॉ. विनयकुमारपाण्डेयः; संस्करणवर्षम् – सा.यु.२०२०; प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी
14. **मन्दशीघ्रफलसाधनसमीक्षा;** ग्रन्थकर्ता – विद्यावाचस्पतिः डॉ. रामजीवनमिश्रः; प्रथमसंस्करणम् – क्रि.श.२००५; प्रकाशनसंस्था – ठाकुरप्रकाशनम्
15. **म.म.पं.सुधाकरद्विवेदिविरचितं दीर्घवृत्तलक्षणम्;** सम्पादको व्याख्याकारश्च – डॉ. चन्द्रमा पाण्डेयः; प्रथमसंस्करणम् – सा.यु.२००६; प्रकाशनसंस्था – शारदासंस्कृतसंस्थानम्, वाराणसी

16. **सुराकान्तसङ्कलितः ज्योतिर्विज्ञानशब्दकोषः**; लेखनं सम्पादनञ्च – डॉ. सुराकान्तझा; प्रथमं संस्करणम्; संस्करणवर्षम् – सा.यु.२००९; प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी
17. **सूर्यसिद्धान्तः (आर्षग्रन्थः)**; व्याख्याकारः – श्रीकपिलेश्वरशास्त्री; संस्करणवर्षम् – सा.यु.२०१५; प्रकाशनसंस्था – चौखम्भा संस्कृतभवनम्, वाराणसी
18. **म.म.सुधाकरद्विवेदिप्रणीतया 'सुधावर्षिणी'टीकया संवलितः सूर्यसिद्धान्तः;** सम्पादकः – विद्यावारिधिः श्रीकृष्णचन्द्रद्विवेदी; द्वितीयं संस्करणम्; संस्करणवर्षम् – सा.यु.२०१६; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
19. **भास्करीयगोलमीमांसा;** प्रधानसम्पादकः – प्रो. वाचस्पति उपाध्यायः, लेखकः– प्रो. देवीप्रसादत्रिपठी, सम्पादकः – प्रो. रमेशकुमारपाण्डेयः, संस्करणम् – सा.यु.२०१०, प्रकाशनसंस्था – श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली
20. **उपपत्तीन्दुशेखरः;** महामहोपध्यायश्रीदुर्गाप्रसादद्विवेदेन सङ्कलितः, सम्पादकः – श्रीगिरिजाप्रसादद्विवेदी, संस्करणम् – सा.यु.२००८, प्रकाशनसंस्था – भारतीयबुक् कारपोरेशन् – नवदेहली

*********

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५
ISSN: 0975-1769 UGC CARE ID:101000019

# पुराणेषु यमयोगाङ्गविमर्शः

**डॉ. अरविन्दकुमारपाण्डेयः**
प्रवक्ता (संस्कृत)
राजा हरपालसिंह इण्टरकॉलेज, जौनपुर

**शोधसारः** - *संस्कृतवाङ्मये चतुर्दशविद्यासु पुराणानि स्वकीयं विशिष्टं स्थानं भजन्ते। उक्तञ्च याज्ञवल्क्यस्मृतौ -*

***पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।***
***वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।***

*इमानि पुराणानि वेदानां गूढतत्त्वानि आख्यानानां माध्यमेन सहजतया जनसामान्येभ्यः प्रतिपादयन्ति। तत्र पुराणेषु प्रायः सर्वे ऐहलौकिकाः पार-लौकिकाश्च विषयाः सन्ति। योगस्य ऐहलौकिकपारलौकिकोभयकत्वात् बहुत्र पुराणेषु वर्णनमवाप्यते। गरुडपुराणकूर्मपुराणगायत्रीपुराणादिषु योगस्य योगा-ङ्गानाञ्च साक्षाद् वर्णनं लभ्यते। द्वादशविधेषु भारतीयदर्शनेषु तत्रापि आस्तिकदर्शनेषु योगदर्शनं स्वकीयं विशिष्टं स्थानं भजते। दर्शनमिदं यथा पारलौकिकहितं साधयति तथैव ऐहलौकिकमपि अतः वर्तमानकाले अस्य सर्वातिशयिप्रासङ्गिकता दरीदृश्यते। अस्य प्रासङ्गिकता यथा वर्तमानकाले-ऽवलोक्यते तथैव प्राचीनकालेऽप्यासीदिति पुराणेषु ऐतिहासिकानामाख्या-नामध्ययनेन अवगम्यते। सर्वेषु पुराणेषु प्रायः योगस्य अष्टाङ्गान्येव स्वीकृतानि सन्ति। तत्र प्रतिपादिता योगाङ्गसम्बन्धिनो विचारा अस्मिन् शोधपत्रे विमृश्यन्ते।*

**कूटशब्दाः** - पुराणानि, दर्शनम्, आस्तिकदर्शनं, नास्तिकदर्शनं, योग-दर्शनं, योगाङ्गानि, यमाः, अहिंसा, सत्यम्, अस्तेयः, ब्रह्मचर्यम्, अपरिग्रहः।

**भूमिका** - जगदिदं सुखदुःखात्मकं वर्तते। सुखं सर्वेषामिष्टं दुःखं न केनापीष्यते। वेदानामिष्टप्राप्त्यनिष्टपरिहारकत्वात् तेषु मुनीनां प्रवृत्तिः सञ्जाता। वेदानामतिगूढत्वात् जनसामान्यस्य तदवबोधो न सम्भवः इति विचिन्त्य महर्षिभिः तानेव समाश्रित्य दर्शनानि व्यरचिषत येन जन-

साधारणस्यापि दुःखनिवृत्तिः सुकरं स्यात्। तर्हि किमिदं दर्शनं नाम इति चेत् दृश्यते ज्ञायते वस्तुनः तत्त्वं वास्तविकं स्वरूपमनेनेति दर्शनम्। दृशिर् प्रेक्षणे इति भ्वादिगणीयाद् धातोः करणे अर्थे ल्युटि[1] प्रत्यये सति दर्शनशब्दः सिध्यति। अत्र दृशधातुः ज्ञानसामान्ये विद्यते न तु चक्षुरिन्द्रियजन्यज्ञाने। इमानि द्वादश दर्शनानि द्विविधानि सन्ति आस्तिक-नास्तिकभेदात्। आस्तिकानि दर्शनानि वेदं प्रमाणत्वेन उररीकुर्वन्ति[2] नास्तिकानि तु वेदस्य प्रामाण्यत्वं न मन्यन्ते। अत्र आस्तिकत्वम् ईश्वरसत्ता-स्वीकारेण न स्वीक्रियते अन्यथा साङ्ख्यमीमांसादर्शनयोः ईश्वरसत्ताया अस्वीकारात् आस्तिकत्वं विहन्येत। साङ्ख्ययोगन्यायवैशेषिकमीमांसा-वेदान्तदर्शनानि षड् आस्तिकदर्शनानि सन्ति। बौद्धजैनचार्वाकदर्शनानि त्रीणि मुख्यानि नास्तिकदर्शनानि सन्ति एतेषु बौद्धदर्शनस्य माध्यमिक-योगाचारसौत्रान्तिकवैभाषिकाः चत्वारो भेदाः भवन्ति इत्थं नास्तिक-दर्शनस्यापि षड् भेदा भवन्ति। षड्सु आस्तिकदर्शनेषु योगदर्शनं मुख्यं स्थानं भजते। हिरण्यगर्भो दर्शनस्यास्य आद्यप्रवर्तक इति **हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः** इति महाभारतवचनेन प्रमाणितमस्ति[3]। श्रीमद्भागवते देवीभागवते अपि च अस्य प्रमाणानि लभ्यन्ते[4]। पातञ्जल-योगसूत्रमस्य दर्शनस्य मुख्यो ग्रन्थो विद्यते अस्मिन् चत्वारोऽध्याया-स्सन्ति समाधिपादः, साधनपादः, विभूतिपादः, कैवल्यपादश्च। दर्शनमिदं साङ्ख्यदर्शनेन साम्यं स्थापयति। साङ्ख्यदर्शनम् ईश्वरं न मनुते परञ्च योगदर्शनम् ईश्वरस्य सत्तां स्वीकरोति। इत्थं योगदर्शने साङ्ख्यपदार्थेभ्यो एकोऽतिरिक्तः पदार्थः सम्मिल्य षड्विंशतिः पदार्थास्सन्ति। योगसाङ्ख्ययोः प्रायः प्रतिपाद्यविषयाः समाना एव सन्ति अतः उक्तं गीतायाम् –

**साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः**। इति।

योगशब्दः युज् धातोः करणे घञि प्रत्यये कृते सति सिध्यति। पाणिनीय-धातुपाठे युज्-धातोः त्रयोऽर्थास्सन्ति। युज-समाधौ धातुः

---

[1] करणाधिकरणयोश्च पा.सू. 3.3.117

[2] नास्तिको वेदनिन्दकः मनु.

[3] महाभारतं,शान्तिपर्व,346.65

[4] श्रीमद्भागवतम् 8.11.3

दिवादिगणीयः (आत्मनेपदी)[5] युजिर् –योगे धातुः रुधादिगणीयः (उभयपदी)[6] युज्-संयमने धातुः चुरादिगणीयः (परस्मैपदी)। एषु धातुषु दिवादिगणीयाद् समाध्यर्थकादेव धातोः योगशब्दो निष्पद्यते। अतोऽत्र योगशब्दस्य समाधिरेवार्थः[7]। न्यायवैशेषिकदर्शनेऽपि योगशब्दस्य प्रयोगो दृश्यते। तत्र सन्निकर्षस्य भेदद्वयं लौकिकालौकिकमुररीकृतमस्ति। अलौकिकसन्निकर्षः योगजप्रत्यक्षेण सञ्जायते। अयं योगजप्रत्यक्षः आत्ममनसोः संयोगरूपोऽस्ति अतोऽयं योगशब्दः युजिर्-योगे धातोः निष्पन्नो विद्यते। न्यायवैशेषिकदर्शनयोः योगिनो द्वैविध्यस्वीकारे युक्तयुञ्जानौ द्वौ भेदौ स्तः। अत्र युञ्जानशब्दः योगार्थाद् रुधादिगणीयादेव शानच्प्रत्यये कृते सिध्यति समाध्यर्थाद् दिवादिगणीयाद् शानच्प्रत्यये सति तु युज्यमान इति निष्पद्यते।

योगदर्शने योगस्य अष्टौ अङ्गानि सूत्रकारेण परिगणितानि सन्ति। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि[8] इति। एतेषां बृहत् वर्णनं पुराणेषु अपि लभ्यते। अतः पुराणेषु योगाङ्गानां प्रतिपादनाय पुराणपरिचयोऽनिवार्यः।

**पुराणपरिचयः** -

वेदे प्रतिपादितानां तत्त्वानां जनसामान्येभ्यो बोधनाय महर्षिभिः पुराणानि विरचितानि। पुराणस्य व्युत्पत्तिः पाणिनिव्याकरणे यास्कनिरुक्ते पुराणेषु च लभ्यते। पुरा भवमिति अर्थे **सायञ्चिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युटुलौ तुट् च**[9] इति सूत्रेण ट्युप्रत्ययः तुडागमश्च विधाय पुरातनशब्दो निष्पद्यते। पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन[10] इत्यादिषु सूत्रेषु पुराणशब्दप्रयोगात् तुडागमस्य वैकल्पिकत्वं सिध्यति तेन तुडभावे पुराणशब्दोऽपि भवति। वायु-

---

[5] युज् समाधौ धा.पा. 4.64

[6] युजिर् योगे धा.पा. 7.7

[7] योगः समाधिः – व्या.भा. पृ.1

[8] योगसूत्र 02.26

[9] पा.सू.4.3.23

[10] पा.सू.2.1.46

पुराणानुसारेण पुरा अनतीति पुराणमिति[11] पद्मपुराणानुसारेण च पुरा परम्परां वष्टि कामयते [12] इति व्युत्पत्तिः विद्यते। पुराणानि इतिहास-शब्देनापि व्यवहृतानि सन्ति शास्त्रेषु तत्र कारणं वर्तते वैदिकाख्यानैः सह सामाजिकराजनैतिकानाञ्च आख्यानानां पुराणेषु वर्णनम्। पद्मपुराणे पुराणानामैतिहासिकत्वं प्रतिपादयन् व्यास आह – तथान्य ते प्रवक्ष्यामि इतिहासं पुरातनमिति[13]। पुराणानां कर्ता कः इत्ययं प्रश्नः पुराणेषु समाहितो वर्तते। स्कन्दपुराणे सत्यवतीपुत्रः महर्षिः व्यासः पुराणकर्तृत्वेन प्रतिपादितोऽस्ति। उक्तञ्च यद् विभिन्नकालेषु भगवान् व्यास एव विभिन्न-रूपाणि धारयित्वा अष्टादशपुराणानि रचयामास।

**व्यासरूपं विभुं कृत्वा संहरेत् स युगे युगे।**
**तदाष्टादशधा कृत्वा भूर्लोकेऽस्मिन् प्रकाशते।।**[14]

पुराणानां सङ्ख्या अष्टादश इति प्रसिद्धमेव। इमानि पुराणानि मत्स्यपुराणानुसारेण सात्त्विकराजसतामसभेदेन त्रिधा विभक्तानि सन्ति। सात्त्विकेषु पुराणेषु विष्णोः, राजसपुराणेषु ब्रह्मणः तामसेषु च अग्नेर्माहात्म्यं वर्णितमस्ति। पुराणेषु वर्ण्यविषयाः पुराणस्य लक्षणेषु लभ्यन्ते। पुराणस्य पञ्चलक्षणानि किञ्चित् परिवर्तनं विधाय सर्वेषु पुराणेषु लभ्यन्ते तानि इमानि सन्ति-

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम्।।**

श्रीमद्भागवते पुराणे पुराणस्य दश लक्षणानि प्रतिपादितानि सन्ति। तानि च -

**सर्गश्चाथ विसर्गश्च वृत्ती रक्षान्तराणि च।**
**वंशो वंशानुचरितं संस्था हेतुरपाश्रयः[15]।।**

इत्थञ्च पुराणेषु सर्गादयो विषयाः वर्णितास्सन्ति। एतेषामेव विषयाणां प्रतिपादने योगसम्बन्धिनोऽपि विषयाः योगाङ्गानि अपि प्रति-

---

[11] यस्माद् पुरा ह्यनतीदं पुराणं तेन तत् स्मृतम्। वा.पु.1.203

[12] पुरा परम्परां वष्टि पुराणं तेन तत् स्मृतम्। पद्मपुराण 5.2.53

[13] पद्मपुराण. 1-21.1

[14] स्कन्दपुराणम्,रेवाखण्डे 1.23.30

[15] भागवतं,12.7.6

पादितानि वर्तन्ते। यथा उदाहरणत्वेन पद्मपुराणे इन्द्रियाणां विषयेभ्यो निवर्तनमेव सर्वोत्तमो दमो निगदितोऽस्ति[16]। इत्थमेव पुराणेषु सर्वाणि योगाङ्गानि पुराणेषु प्रस्तुतानि सन्ति तेषु यमस्यापि प्रतिपादनं बहुत्र विद्यते। अस्मिन् शोधपत्रे पुराणेषु प्रतिपादितो पञ्चप्रकारको यमो वर्णितः समालोचितश्च वर्तते।

**शोधोद्देश्यानि -**

- भारतीयदर्शनानां सामान्यज्ञानेन सह योगदर्शनस्य विशिष्टज्ञानप्रतिपादनम्।
- पुराणानां सामान्यज्ञानेन सह पुराणविवेचितविषयाणां प्रतिपादनम्।
- पुराणानां दर्शनानाञ्च सम्बन्धस्य प्रतिपादनम्।
- पुराणेषु वर्णितानां योगसम्बन्धिविषयाणां विशिष्टमध्ययनम्।
- योगदर्शनस्य प्राचीनकाले आधुनिककाले च उभयत्रैव प्रासङ्गिकतानिरूपणम्।

**शोधविधयः -**

कस्मैचिदपि शोधकार्याय नैकाविधयः प्रयुज्यन्ते। अस्मिन् शोधपत्रे पुराणेषु यमनिरूपणाय विवरणात्मकविधिः प्रयोगऽस्ति। यमानां विभिन्नग्रन्थानामालोके तुलनायै तुलनात्मकविधेस्तथा च विश्लेषणाय विषयविश्लेषणविधेः प्रयोगो विद्यते।

**प्रदत्तसङ्कलनं विश्लेषणम् -**

यम उपरमे इत्यस्माद् भौवादिकाद् धातोः यच्छति नियच्छति इन्द्रियग्राममनेनेति करणे घञि प्रत्यये सति यमशब्दो निष्पद्यते। यद्यपि यमशब्दः परेतभर्त्रादिषु नैकेषु अर्थेषु विद्यते तथापि अहिंसाद्यर्थेषु शब्दोऽयं सर्वत्र प्रतिपादितो वर्तत एव। यथा मनुस्मृतौ–

---

[16] दममेव प्रवक्ष्यामि तवाग्रे द्विजसत्तम।
दमनादिन्द्रियाणां वै मनसोऽपि विकारिणः।। पद्मपुराणः 33.27

**अहिंसा सत्यवचनं ब्रह्मचर्यमकल्पता।**
**अस्तेयमिति पञ्चैते यमाख्यानि व्रतानि च।।**

महाभारते योगाङ्गानां वेदप्रतिपाद्यत्वं वर्णयन् महर्षिः व्यास आह- वेदेषु चाष्टगुणिनं योगमाहुर्मनीषिणः[17] इति। गरुडपुराणे अपि यमानां पञ्चानां योगदर्शनानुसारं बहुत्र वर्णनं लभ्यते तत्र यमानां परिगणने स्पष्टमुल्लिखितमस्ति -

**सत्यं भूतहितं वाक्यमस्तेयं स्वग्रहं परम्।**
**अमैथुनं ब्रह्मचर्यं सर्वत्यागोऽ परिग्रहः।।**[18]

इत्थञ्च यमानां पञ्चसङ्ख्यासन्दर्भे पुराणेषु मतभेदः प्रायः न प्राप्यते। अहिंसादीनां यमानां व्याख्यानं पुराणेषु पृथक्तया अवलोक्यते। तेषां क्रमेण विवरणं प्रस्तूयते।

**अहिंसा** - पञ्चसु यमेषु अहिंसायाः प्रथमः क्रमो वर्तते। न हिंसा अहिंसा इति नञ्समासे अहिंसाशब्दः सिध्यति। अत्र नञर्थः कः इति जिज्ञासायां त्रयो नञर्थाः बुद्धौ समायान्ति हिंसाया अभावः, हिंसायाः विरोधः, अप्रशस्तहिंसा च। एष्वर्थेषु कतमोऽर्थः अहिंसां समर्थयतीति पुराणसन्दर्भे परिशील्यते। हिंसाया अभावस्तु सर्वत्र अहिंसात्वेन प्रतिपादितोऽस्त्येव। कर्मणा मनसा वाचा सर्वभूतानां क्लेशानुत्पादनमेव अहिंसा इति योगसारसङ्ग्रहे विज्ञानभिक्षुणा अभाणि[19]। व्यासभाष्ये अहिंसायाः एकाशीतिः भेदाः कृतास्सन्ति। तत्र मुख्यभेदास्तु त्रय एव। कृता कारिता अनुमोदिता च[20]। स्वयं विहिता हिंसा कृता, अन्यद्वारा कारिता हिंसा कारिता तथा च अन्यकृताया हिंसाया अनुमोदने अनुमोदिता हिंसा इति व्यासभाष्ये स्पष्टमस्ति। एतासु तिसृषु हिंसासु कृताकारितयोः अभावः अहिंसापदे अभावार्थे नञ्समासेन तथा च अनुमोदितायाः विरोधः विरोधार्थे नञ्समासेन अवगम्यते। कूर्मपुराणे

---

[17] महा. शान्ति. 2.6.7

[18] गरुडपुराणं प्रथमखण्डः श्लो.30

[19] कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा। अक्लेशजननं प्रोक्तावहिंसा परमर्षिभिः। योगसारसङ्ग्रहः पृ.64

[20] तत्राहिंसा तावत् – कृता कारितानुमोदितेति त्रिधा। व्या. भा. पृ. 251

तु यज्ञादिषु शास्त्रपूर्वकविहिता हिंसा अपि अहिंसात्वेन स्वीकृता। पञ्चसु यमेषु अहिंसाया एव सर्वाधिकं महत्त्वमवलोक्यते। योगवाशिष्ठे मोक्षधर्मे निगदितं यद् यथा हस्तिनः पदे अन्येषां सर्वेषां पदानि पिधीयन्ते तथैव अहिंसासिद्धौ सर्वे यमाः सिध्यन्ति।[21]

**सत्यम्** - सत्यं परिभाषयता भाष्यकारेण प्रतिपादितं योगभाष्ये यद् सत्यं यथार्थे वाङ्मनसे। वस्तुनः यथार्थस्वरूपमेव वाचि मनसि च धारणमन्यस्मै प्रतिपादनञ्च सत्यमुच्यते। इमामेव पङ्क्तिं स्पष्टीकुर्वन् भाष्यकार आह यथा श्रुतं यथानुमितं यथा दृष्टं तथा वाङ्मनश्च। प्रत्य-क्षानुमानागमप्रमाणेन यदवगतं तस्य तथैव अन्यस्मै अवबोधनमेव सत्यस्वरूपम्। यदि काचित् वाणी अन्यस्मै भ्रमं जनयति तदा सा असत्यपदवाच्यैव। यथा महाभारते युधिष्ठिरेणोक्तं नरो वा कुञ्जरो वा अश्वत्थामा हतो हतः इति वचनं द्रोणाचार्याय भ्रमात्मकं ज्ञानमेव जनयामास तस्य वचनस्य असत्यकौटावेव समावेशः। अत उक्तं भाष्यकारेण परत्र स्वबोधसंक्रान्तये वागुक्ता सा यदि न वञ्चिता भ्रान्ता वा प्रतिबन्ध्या वा भवेदिति।[22]

सत्यस्य फलं प्रतिपादयता सूत्रकारेण अभाणि सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्[23] इति। सत्यवादिनो वचनेन प्राणिनः सर्वविध-क्रियाणां फलमवाप्नुवन्ति। भाष्यकारस्तु आह यद् सत्यवादिनो वाक् ईदृग् अमोघा जायते यद् तस्य वचनेनैव धर्मस्वर्गयोरपि प्राप्तिः संभवति। धार्मिको भूया इति भवति धार्मिकः। स्वर्गं प्राप्नुहीति स्वर्गं प्राप्नोति। अमोघास्य वाग्भवति।[24]

**अस्तेयः** - यमेषु तृतीयस्थानं भजते अस्तेयः। स्तेयो नाम चौरकार्यम्। न स्तेयोऽस्तेयः। स्तेयस्य परिभाषां प्रतिपादयन् भाष्यकार आह -

---

[21] यथा नागपदेऽन्यानि पदानि पदगामिनाम्। सर्वाण्येवापिधीयन्ते पदजातानि कौञ्जरे।
एवं सर्वमहिंसायां धर्मार्थमपि धीयते।
मोक्षधर्म.यो.वा. पृ.245

[22] व्यासभाष्य पा.यो. 30

[23] पात. सू.36

[24] व्या. भा. पा. सू. 36

स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणम्[25]। शास्त्रोक्तविधिवैपरीत्येन परद्रव्यस्य ग्रहणमेव अस्तेयपदेन वाच्यम्। योगसारसङ्ग्रहे तु चौर्याद् बलेन वा परद्रव्यस्य अपहरणमस्तेयमभिहितं वर्तते।परद्रव्यापहरणं चौर्याद् वार्थं बलेन वा। स्तेयं तस्यानाचारादस्तेयं धर्मसाधनम्। भाष्यकारस्तु अस्तेयस्य अनिच्छारूपं स्वरूपमाह। स्तेयस्य इच्छा अपि स्तेयाभिधाना अतः स्तेयस्य इच्छापि न करणीया। तत्प्रतिषेधः पुनरस्पृहारूपमस्तेयम्[26]। अस्तेयाचरणन्तु श्रुतिरपि समर्थयति - मा गृधः कस्यस्विद्धनम्[27] इति।

**ब्रह्मचर्यम्** - यमेषु पञ्चमः क्रमः ब्रह्मचर्यस्य वर्तते। व्यासभाष्ये गुप्तेन्द्रियाणां संयमनमेव ब्रह्मचर्यमुक्तमस्ति। ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः[28]। मैथुनस्य अष्टविधत्वं दक्षसंहितायां प्रतिपादितमस्ति तेषु अष्टविधमैथुनेषु अप्रवृत्तिरेव ब्रह्मचर्यपदवाच्या। ब्रह्मचर्यं सदा रक्षेदष्टधालक्षणं पृथग्भवति-

**स्मरणं कीर्तनं केलि प्रेक्षणं गुह्यभाषणम्।।**
**सङ्कल्पोऽध्यवसायश्च क्रियानिवृत्तिरेव च।**
**एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।।**
**विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्।।**[29]

ब्रह्मचर्यस्य फलं योगसूत्रे वीर्यलाभो निगदितः सूत्रकारेण ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभ इति।[30] वाचस्पतिमिश्रमते अत्र वीर्यस्यार्थः काचिच्छक्तिरस्ति यया योगी अणिमामहिमादीन् गुणानवाप्नोति[31] परञ्च विज्ञानभिक्षुमते गुणानां तात्पर्यम् अणिमादिभिः गुणैः नास्ति अपितु ज्ञानक्रियाशक्तेरुत्कर्षो वर्तते।

---

[25] व्या. भा. पात. सू. 30
[26] व्या. भा. पात. यो. 30
[27] ईशावास्योपनिषद् 1
[28] व्या.भा. पात.यो.30
[29] दक्षसंहिता
[30] योगसूत्र 2.38
[31] वीर्यं सामर्थ्यं यस्य लाभात्प्रतीघावर्जितान् गुणानणिमादीनुत्कर्षयत्युपचिनोति। त.वै.पृ.257

**अपरिग्रहः** - यमेषु पञ्चमः क्रमोऽपरिग्रहस्यास्ति। अपरिग्रहस्य तात्पर्यं वस्तुनः अस्वीकरणेन वर्तते। योगभाष्ये परिग्रहस्य दोषं प्रतिपादयन् लिखति महर्षिः व्यासो यद् विषयाणामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणमपरिग्रहः[32] इति। वस्तुनः परिग्रहे वस्तुनोऽर्जने, संरक्षणे, क्षये, वस्तु प्रति आसक्तौ इत्यादयो दोषाः सञ्जायन्ते तेभ्यः रक्षणाय अपरिग्रहो यम आचरणीयः।

**शोधनिष्कर्षः** - पुराणानि भारतीयज्ञानपरम्परायाः मुख्यस्रोतांसि सन्ति। एषु सर्वेषां दर्शनानां प्रतिपाद्यविषयाः विवेचिता विद्यन्ते। योगदर्शनस्यापि विषयाः योगाङ्गानि च तत्र वर्णितास्सन्ति। योगाङ्गेषु प्रथममङ्गं यमः पञ्चविधोऽस्ति। अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः एते यमाः भवन्ति। एतेषां विस्तृतं विवरणं गरुडकूर्मगायत्रीभागवतदेवीभागवतादिषु पुराणेषु लभ्यते। यमेषु अहिंसायाः सर्वाधिकं महत्त्वमस्ति। अहिंसासिद्धौ सर्वेषां यमानामवाप्तिः स्वयमेव जायत इति पुराणानि प्रतिपादयन्ति।

## सन्दर्भग्रन्थसूची


- श्रीवास्तवः, डा. सुरेशचन्द्रः, पातञ्जलयोगदर्शनम्, चौखम्बा-सुरभारती- प्रकाशनम्, वाराणसी, 1988
- भट्टाचार्यः डा. रमाशंकर-, सिंहः डा. अमलधारी, पातञ्जलयोगसूत्रम्, भारतीय- विद्या- प्रकाशनं वाराणसी, 1997
- पतञ्जलिः, योगदर्शनं, गीताप्रेस, गोरखपुरम्,
- आर्य- सतीशः, पातञ्जलयोगदर्शनं, वेद-विश्वायतनम्, 2010
- गोयन्दका, हरिकृष्णदासः, योग-दर्शनं, गोविन्दभवन-कार्यालयः, गीताप्रेस, गोरखपुरम्, 2007
- स्वामी, श्री विज्ञानाश्रमः, योग-दर्शनम्, आर्ष- गुरुकुल -महाविद्यालयः, 2020
- चतुर्वेदी, गिरिधरशर्मा. पुराणपरिशीलनम्,1970, बिहार- राष्ट्रभाषा-परिषद् पटना।
- महर्षिव्यासः, श्रीमद्भागवतमहापुराणम्, गीताप्रेस-गोरखपुरम्।


[32] व्या. भा. पात. सू.30

- भट्टाचार्यः रामशङ्करः (सम्पादकः), पातञ्जलयोगदर्शनम्, व्यासभाष्यतत्त्ववैशारदीसहितम्, भारतीयविद्याप्रकाशनं वाराणसी।

**कोशग्रन्थाः –**

- आप्टे -वामन- शिवराम, संस्कृत-हिंदी - कोशः, मोतीलाल-बनारसीदास- प्रकाशन, दहली, 1969
- आचार्य यास्क, निरुक्त-पंचाध्यायी, शास्त्री म.म. श्री पं. छज्जूराम-विद्यासागर (व्याख्याकार) मेहरचंद-लछमनदास, दरियागंज, नवदेहली, 2015
- सिंह श्री -अमर, अमरकोश, शास्त्रि-वासुदेव (सं.), चौखम्बा -संस्कृत -सीरीज -आफिस, वाराणसी, 2003

**इंटरनेट स्त्रोत –**

- विकिस्रोत:विषय/संस्कृत - विकिस्रोत (wikisource.org)
- https://sanskritdictionary.com/?iencoding=iast&q=%E0%A4%97%E0%A5%8D%E0%A4%B0%E0%A4%B9%E0%A4%A3+&lang=sans&action=%E0%A4%96%E0%A5%8B%E0%A4%9C
- http://iloveindia.com/literature/sanskrit/index.html
- http://questia.com/search/sanskrit-literature


*********

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५

ISSN: 0975-1769 UGC CARE ID:101000019

# वैदिकस्वरप्रक्रियाया: वैज्ञानिकता

**नीरज पन्त**
शोधच्छात्र:
दिल्ली विश्वविद्यालय: नई दिल्ली

**शोधसार:** - *वेदा: सर्वविद्यास्पदम् इति मतिमद्भि: सुनिश्चितवचनेन सेषिध्यते तदध्ययनाभीप्सितत्त्वम्। यत: वेदेषु समाम्नातपदानां सदर्थान्वेषणाय व्याकरण-विद्याविवेक: नैपुण्यञ्च परमावश्यकम्, तस्माच्चापि वेदार्थज्ञानात्तदुच्चारणप्रक्रमे स्वर-सिद्धिरप्यभीष्टेति नि:संशयवचनम्। अत एव वैदिकस्वरेषु किं वैशिष्ट्यम् ? कथञ्च स्वराङ्कने वैज्ञानिकत्वं च शास्त्रकृद्भिरजेगीयि इति सप्रयोगमत्र शब्दयिष्यते।*

**कूटशब्दा:** - स्वर:, उदात्त:, अनुदात्त:, स्वरित:, चिह्नम्, स्वराङ्कनम् ।

जगति पारस्परिकभावविनिमयाय प्रमुखं साधनं भाषा । भाषयैवानया मानव: पशुभ्य: श्रेष्ठत्वेन लोकेऽवलोक्यते । एषा हि भाषा समूहस्य काऽपि वाङ्गिधिरस्ति, या हि तालुकण्ठादिभि: उच्चारणायनै: समुच्चार्य वक्तुर्विवक्षितभावाभिव्यक्ति: सञ्जायते। समुच्चारितावयवेभ्य: या सार्थक-ध्वनिसमष्टि: सा भाषा इति कथ्यते। भाषाया: प्राणतत्त्वं भवति उच्चारणम् इति तु भाषाविद्भिरपि सम्मतम्। अत एव प्राचीनतमवाङ्मये वेदेऽपि शुद्धोच्चारणस्य महत्ता दृश्यते। भाषाया: शुद्धिसंरक्षणाय व्याकरणमिष्टं भवत्येव। न हि व्याकरणज्ञानशून्य: साधून् शब्दान् प्रयोक्तुं शक्यते। वेदाङ्गेष्वाननमिव प्रधानमिदं व्याकरणं योऽधीते स एवान्तराणि शास्त्राण्यधिगन्तुं समर्थो भवति । तदुक्तम् -

**यो वेद वेदवदनं सदनं हि सम्यक्**
**ब्राह्म्या: स वेदमपि वेद किमन्यशास्त्रम् ।**

**यस्मादतः प्रथममेतदधीत्य धीमान्**
**शास्त्रान्तरेषु भवति श्रवणेऽधिकारी ।।**[1]

तस्मिन्नेव वेदवेदाङ्गाध्ययनक्रमे जातं सन्धिसमासस्वराङ्कनादिमुख्यविषयाणां विश्लेषणम्, यतो हि अस्याः भाषायाः अङ्गप्रत्यङ्गविचारपरकशास्त्रं व्याकरणमिति निश्चप्रचम्। अतः एव वेदस्य वास्तविकाभिप्रायावगमने व्याकरणशास्त्रं मुख्यभूमिकामावहति । तस्मिन् वेदाङ्गे स्वराः, व्यञ्जनानि च आद्यत्वेन अवगम्येते । सत्यपि स्वरशब्दस्यार्थवैचित्र्ये अत्र प्रसिद्धः उदात्तानुदात्तस्वरितसंज्ञकः उच्चारणरूपः वर्णधर्मः एव ग्राह्यः विज्ञैः । स्वरशब्दोऽयं **"स्वृ = शब्दोपतापयोः"** इत्यस्मात् धातोः करणे **'घ'** प्रत्यये सति निष्पद्यते । अस्य स्वरशब्दस्य भाषायां प्रयोगः अनेकार्थेषु प्राप्यते। स्वरशब्दविवेचनं शाब्दिके निघण्टुग्रन्थे स्वरतीति पदं गत्यर्थकाख्यातेषु आख्यातम्। अत एव स्वरशब्दस्य निर्वचनं स्वर्यन्तेऽर्था एभिः इति निर्वाच्यते। अर्थात् यैः पदार्थावबोधः सम्भवेत् ते स्वराः इति । स्वरोच्चारणं भवति विना पदसाहाय्यम्, अत एव स्वयं राजन्ते इति स्वराः इति ।

यथा महाभाष्ये **"स्वयं राजन्ते इति स्वराः"**[2] इति व्युत्पत्तिपरकार्थः दृश्यते । वैदिकवाङ्मये अयं शब्दः **वाचि**[3]**, श्रियै**[4]**, सूर्याय**[5] चेत्यादिभ्यः प्रयुक्तो वर्तते । एतेषु अर्थेषु सत्स्वपि ऋक्प्रातिशाख्ये पाणिनीयशिक्षायां च व्यवहृतः उदात्तादिस्वरः एव अत्राभीष्टः । वर्णधर्मरूपस्यास्य स्वरस्य प्रकारेषु अपि मतवैभिन्न्यं परिलक्ष्यते । यथा महाभाष्ये महर्षिपतञ्जलिना सप्तप्रकारकः[6] स्वरः विवृतः । तथैव नारदशिक्षायां तु **"स्वरभेदस्तु पञ्चमः"**[7] इत्युक्तिः निबद्धा नारदेन । संहितासु शाकलमाध्यन्दिनशौनकादिषु त्रैस्वर्यस्य एव विवरणं समुपलभ्यते । किञ्च अनेकेषु स्वरभेदेषु सत्स्वपि साक्षात्पदार्थ-सम्बन्धत्त्वात् उदात्तानुदात्तस्वरितरूपस्य त्रैस्वर्यस्य एव प्राधान्यं तत्रापि

---

[1] प्रौढमनोरमाभूमिकायाम्-पृ.6

2 महाभाष्यम् - 1/2/29

3 निरुक्तम् - 1/11/31

4 शतपथब्राह्मणम् - 11/4/2/10

5 गोपथब्राह्मणम् - 1/5/14

6 महाभाष्यम् - 1/2/33

7 नारदीयशिक्षा - 1/7/19

अर्थदृष्ट्या उदात्तस्वर: एव सर्वप्रधानत्वं विदधाति। उदात्तादय: समस्तस्वरा: अच्संज्ञकवर्णानामेव धर्मा: न तु हल्वर्णानाम्, अतः उच्यते यत् उदात्तादय: स्वरा: अकारादिस्वराणामेव विशिष्टोच्चारणधर्मा: इति ।

एतेषां च स्वराणां न केवलं वैदिकसाहित्ये अपि तु परवर्तिनि लौकिकवाङ्मये अपि स्वराङ्कनेन सह प्रयोग: प्रावर्तत इति बहुत्र प्रमाणीभूतं वर्तते, यथा **"विभाषा भाषायाम्"**[8] इत्यत्र भाषाप्रयोगेण पुनश्च यास्काचार्यस्य निरुक्ते मनो: **"अविशेषेण पुत्राणां.."**[9] इत्यस्मिन् पद्ये मन्त्रसाहचर्यात् अद्यावधि स्वरचिह्नं यथावत् वर्तते ।

**वैदिकस्वरप्रक्रियाया: महत्त्वम्** -

संस्कृतभाषायां नैकार्था: शब्दा: एव आधिक्येन वर्तन्ते, एकस्यैव विषयस्य प्रतिपादका: शब्दा: तु न्यूना: एव । अतः कुत्र क: अर्थ: गृहीतव्य: इति सन्देहे आचार्यै: बहुविधोपाया: निर्दिष्टा:[10]। तत्र स्वरोऽपि अर्थनियामकहेतुत्वेन परिगणितो वर्तते । यथोक्तं वेङ्कटमाधवेन आचार्येण -

**"अन्धकारे दीपिकाभिर्गच्छन्न स्खलति क्वचित् ।**
**एवं स्वरै: प्रणीतानां भवन्त्यर्था: स्फुटा इति ।।"**[11]

वैदिकस्वरप्रक्रियाया: मुख्यमुद्देश्यं भवति पदस्वरूपज्ञानम् । अनयैव स्वरप्रक्रियया वैदिकसंहितासु सामगानं विहाय पदस्य आकार: ज्ञायते । स्वरस्य यथावत् उच्चारणेन वाक्यस्य श्रवणे श्रुतिमाधुर्यमपि प्रतीयते । स्वरव्यत्ययात् पदार्थे जायमानेन प्रभावेण स्वराङ्कनस्य महत्त्वम् अवगम्यते ।

अथ च उदात्तादिस्वरज्ञानाय तेषां चिह्नज्ञानम् अत्यावश्यकं वर्तते । किञ्च तेषां चिह्नानां रुचिभेदात् बुद्धिवैचित्र्याच्च वैविध्यं दृश्यते, यतो हि चिह्नानि सर्वाणि कल्पितान्येव भवन्ति । संस्कृतभाषायां **"सर्वे शब्दा: धातुजमाह"** इति प्रसिद्धा उक्ति: वर्तते । तदनु प्रायः सर्वेऽपि शब्दा: धातुमूलका: एव प्रतिपद्यन्ते । पुनरपि च एकस्मिन् पदे एकैव वर्ण: उदात्त:

---

8 अष्टाध्यायी - 6/1/181

9 निरुक्तम् - 3/1

10 वाक्यपदीयम् - 2/317-18

11 स्वरा० - 1/8

भवति प्रायः शेषाः अनुदात्ताः भवन्ति "**अनुदात्तं पदमेकवर्जम्**"[12]। तत्र च उदात्तानुदात्तयोः उदात्तः एव प्रधानः भवति । अत एव पदस्य प्रकृतौ प्रत्यये वा यस्मिन् भागे उदात्तस्वरः भवति तस्यैव अर्थः प्रमुखः भवति । यथोक्तं निरुक्तकारेण - "**तीव्रार्थतरमुदात्तम्, अल्पीयोऽर्थतरमनुदात्तम्**"[13]। अयमेव भावः आचार्यः पाणिनिः सूत्रत्रयेण(उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः[14]) चकार । समासेऽपि एषैव विधिः आश्रीयते ।

अत एव अस्याः वैदिकस्वरप्रक्रियायाः का वैज्ञानिकता इति अत्र बिन्दुमाध्यमेन प्रस्तूयते -

1) **स्वराङ्कनेन पदार्थपरिवर्तनम्** - वैदिककाले विशिष्टतया यज्ञेषु समस्तमन्त्राणां पाठः सस्वर एव भवति स्म । स्वरस्य व्यत्यये सति पदार्थपरिवर्तनं भवति, तत्र प्रमाणानि यथा - "**दुष्टो मन्त्रः स्वरतो वर्णतो वा....**"[15] तद्वदेव "**क्षयो निवासे**"[16] "**जयः करणम्**"[17] इत्यादिसूत्रैः, अपि स्पष्टं भवति यत् पदार्थसंशये सति स्वराङ्कनमेव स्पष्टतां प्रदर्शयति इति ।

2) **स्वराङ्कनस्याप्रयोगेण सन्देहः** - स्वराङ्कनस्य प्रयोगं विना सन्देहनिवृत्तिः असम्भवा इति वयं बहुधा वैदिकोदाहरणेषु द्रष्टुं शक्नुमः । यथा - "**भ्रातृव्यस्य वधाय**"[18] अत्र अर्थद्वये उपस्थिते (शत्रुः, भ्रातृपुत्रश्च) स्वरस्याश्रयेण एव सन्देहनिवृत्तिः जायते यत् आद्युदात्तः 'भ्रातृव्यः' शत्रुवाचकः, अन्तस्वरितात्मकः च भ्रातृपुत्रवाची इति । एवमेव "**न तस्य प्रतिमा अस्ति**"[19] इत्यत्र अपि मन्त्रस्यास्य शुद्धरूपनिर्णये स्वरशास्त्रमाश्रीयते, यतो हि अत्रापि स्वरमनाश्रित्य तु अर्थद्वये प्रतीतिः भविष्यति । एकस्तु तस्य नम्रीभूतस्य नतस्य वा प्रतिमा अस्ति इति, द्वितीयः अर्थः तस्य पूर्वनिर्दिष्टस्य ईश्वरस्य (न तस्य) प्रतिमा नास्ति इति । सति एवं सन्देहे ज्ञायते यत् 'नतस्य' एवं

---

12 अष्टाध्यायी - 6/1/158

13 निरुक्तम् - 4/25

14 अष्टाध्यायी - 1/2/29-31

15 पाणिनीयशिक्षा

16 अष्टाध्यायी 6.1.201

17 अष्टाध्यायी 6.1.202

18 माध्य. सं. 1/18

19 माध्यन्दिनसंहिता - 32/2

पदच्छेद: एव असम्भव: यतो हि स्वरशास्त्रानुसारमेकस्मिन् पदे एकैव उदात्त: भवितुमर्हति तवैप्रत्ययान्तं परित्यज्य । किन्त्वत्र "नतस्य" अस्मिन् पदे "न" तथा "त" इति उभयमुदात्तमस्ति । अतः स्वराङ्कनस्य प्रयोगेण सन्देहनिवृत्ति: जायते इति सुस्पष्टम् ।

**3) स्वराङ्कनेन अर्थवैभिन्न्यस्य स्पष्टज्ञानम्** - ऋग्वेदे एक: मन्त्र:-

**हनो वृत्रं जया अप: ।।**[20]

अत्र जया: इति पदं आद्युदात्तमस्ति ।

अथर्ववेदेऽपर: मन्त्र:-

**जयो मे सव्य आहित: ।।**[21]

अत्र जय: इति पदं अन्तोदात्तम् ।

उभयो: मन्त्रयो: प्रयुक्ते जये स्वरभेदाद्धि उभयो: एकैवार्थ: न हि सम्भवितुं शक्य: ।

अत: आद्युदात्तं जया: इति पदं प्रकारद्वयेनोपपन्नं स्यात् । एकं “जय: करणम्” (अष्टाध्यायी 6.1.102) सूत्रेण करणार्थे, अपरञ्च लेट् लकारे मध्यमपुरुषस्यैकवचनात्मके स्वरूपे । करणवाचिन: अकारान्तस्य जय-शब्दस्य बहुवचनार्थ: मन्त्रेणानेनासम्बद्धोऽस्ति, पारिशेष्येण च एनं लेट् लकारस्य रूपं ग्राह्यम् । अत: अर्थ: स्यात् - हे इन्द्र! त्वम् अप: जय । अपरे च मन्त्रे प्रयुक्तमन्तोदात्तं जय: इति पदं भावार्थकम् अच्प्रत्ययान्तमिति वर्तते । अस्यार्थ: भविष्यति मामके सव्ये पाणौ जय: स्थापित: अस्ति । एवं विधिनाऽन्यत्रापि स्वरभेदेनार्थभेद: वेद्य: ।

एनं विषयं स्पष्टयता महर्षिणा पतञ्जलिना “यथेन्द्रशत्रु: स्वरतोऽपराधात्” इत्युद्धरणमेकं प्रदाय सर्वेषां मतिराकृष्टा यत् सम्यक् ज्ञानं संस्थापयन् शास्त्रीयप्रक्रियया एकस्यैव शब्दस्य यथोचितप्रयोगेण स्वर्गपरलोकयो: कामधेनुकार्यं करोति । चाथाननुकूलोच्चरितशब्देन स एव शब्द: वाक्स्वरूपकमस्त्रं प्रभूय प्रयोक्तृघातकोऽपि भवितुमर्हति । यथा स्वरापराधेन इन्द्रशत्रुशब्देन त्वष्टा विनष्ट: । इन्द्रशत्रुशब्दे अन्तिमाक्षरस्य

---

[20] ऋग्वेद: १/८०/३

[21] अथर्ववेद:७/५२/८

त्रोरुदात्तमुच्चार्य तत्पुरुषसमासापेक्षा त्वष्ट्रा पूर्वपदप्रकृतेरिन्द्रशब्दस्यादौ इ इत्याक्षरे उदात्त-ध्वनौ अर्थमनर्थितम् । तत्पुरुषसमासे इन्द्रहन्ता इन्द्रशत्रुसिद्धिरभीष्टाऽऽसीत्, किञ्च बहुव्रीहिसमासे इन्द्रः शत्रुः शातयिता यस्य इत्यर्थेन विपरीतमिन्द्रेण त्वष्टा संहृतः । अत एव वेङ्कटमाधवः लिखति-

**अर्थाभेदे तु शब्दस्य सर्वत्र सदृशः स्वरः ।**
**यदा न तं स्वरं पश्येत् अन्यथार्थं तदा नयेत् ।।**[22]

अर्थात् अर्थसमानेऽपि शब्दस्य स्वरः तुल्यं भवति । यदा कुत्रचित् तं समस्वरं न वीक्ष्येत तदा तच्छब्दस्यार्थोऽप्यन्यः कुर्वीत ।

अस्यैवार्थवैभिन्न्यस्योपपादनं वेदभाष्यकारेण वेङ्कटमाधवेन एवमुपपादितम् -

**"एवं पदे समासे च यत्रोदात्तो व्यवस्थितः ।**
**वर्णे पदे वा तत्रापि काकुरस्तीति निश्चयः ।।**[23]

अर्थात् वाक्यस्य वा समासस्य यस्मिन् पदे पदांशे वा उदात्तस्वरः स्यात् तस्मिन् एव काकुः अर्थात् विशेषार्थबोधकः ध्वनिः अनुमन्तव्यः ।

एनमितोऽपि स्फुटाय तदिदमुदाहरणम् -

- ब्राह्मण ग्रामं गच्छ। अर्थात् हे ब्राह्मण! ग्रामं व्रज।
- ब्राह्मणग्रामं गच्छ। अर्थात् ब्राह्मणानां यो ग्रामः तं व्रज।
- ब्राह्मणग्रामं गच्छ। अर्थात् ब्राह्मणाः यस्मिन् ग्रामे वसन्ति तं व्रज।

आद्ये वाक्ये ब्राह्मणग्रामयोः पदयोः उदात्तत्वेन द्वेऽपि पदे स्वतन्त्रे स्तः। ब्राह्मणपदे यदत्राद्युदात्तत्वं दृश्यते तत् सम्बोधनकारणमस्ति । अतः अस्यार्थः भविष्यति यत् हे ब्राह्मण! ग्रामं व्रज द्वितीये तृतीये च वाक्ये ब्राह्मण-ग्रामसमुदाये उदात्तमेकं पदम् । अतः ते च पदे समस्ते स्तः । द्वितीय-वाक्येऽन्तोदात्तस्वरात्[24] तत्र षष्ठीतत्पुरुषः ज्ञायते। अतः अर्थः स्यात् ब्राह्मणानां यो ग्रामः तं व्रज । तृतीये वाक्ये पूर्वपदब्राह्मणेऽस्त्युदात्तत्वम्। तेन बहुव्रीहिसमासबोधः भवतु । अत एव तदर्थः ब्राह्मणाः यस्मिन् ग्रामे वसन्ति तं व्रज इति कुर्वीत ।

---

22 स्वरानुक्रमणी ८/२

23 स्वरानुक्रमणी १/१/२०

24 "आमन्त्रितस्य" ६/१/१९८

4) **शब्दस्य गूढार्थप्राप्तये स्वराङ्कनम्** - जनस्य कस्यापि तात्पर्यावबोध: आवश्यक: भवति उक्तस्य शब्दस्य तत्त्वज्ञानाय । अतः स्वराङ्कनज्ञानेन स: बोध: अनायासेन एव उत्पद्यते । यथा - "चिकीर्षति" इत्यादिषु धातुरूपेषु 'सन्' प्रत्यये विहिते सत्यपि इच्छार्थस्य प्रधानता न भवति अपि तु 'कृ' इत्यादि धातूनामर्थप्राधान्यं भवति यतो हि तत्र मूलधातौ उदात्तत्वाङ्कनमस्ति । कस्यापि धातो: सन्नन्तरूपे तिप्, सिप्, मिप् प्रत्यये परे नित्त्वात् स्वर: आद्युदात्त: जायते । यथा "चिकीर्षति" इत्यत्र तिप् प्रत्ययं विना भागद्वयमवशिष्टम् - कृ+सन् अत्र सन् प्रत्ययस्यार्थ: इच्छारूप:[25]। अतः वक्ता प्रयुङ्क्ते 'कर्मकर: कटं चिकीर्षति' किन्त्वत्र उच्चारणकर्तु: एतावन्मात्रं भाव: न भवति यत् कर्मकर: कटनिर्माणस्य इच्छामात्रं विधाय कार्यान्तरे व्यापृत: भविष्यति इति । अपि तु अभीष्टं यत् कर्मकर: शीघ्रमेव क्रियायां प्रवृत्तो भविष्यति इति । अत एव चिकीर्षति अस्मिन् प्रयोगे इच्छार्थस्य प्राधान्यं न । अपि तु इच्छापूर्वकं "कृ" धातो: अर्थस्य प्रधानता वर्तते । परिणामत: पदेऽस्मिन् मूलधातो: उदात्तत्वं न तु सन् प्रत्ययस्य अकारस्य ।

भाषाया: आधुनिकस्वरूपस्य संवर्द्धने कथं स्वराङ्कनं सहकर्तुं शक्नोतीति उपर्युक्तविवेचनेन स्पष्टं भवति तथा च वक्तुं शक्नुम: यत् वैदिकवाङ्मये स्वर: एव एकमात्रं साधनं वर्तते येन वेदार्थग्राहक: जन: वास्तविकं सूक्ष्मतममभिप्रायमवगन्तुं क्षम: जायते । एतदेव प्राचीनाचार्यै: यास्कादिभि: अपि सुस्पष्टं विहितं वर्तते ।

**निष्कर्षः** - प्रपञ्चितस्यास्य शोधपत्रस्य निष्कर्षतत्त्वस्वरूपे वचनानीमानि शब्दितुं शक्यानि यत् स्वराङ्कनविवेकं विनाऽर्थस्य स्फुटा-वबोध: सन्देहाभावश्च कल्पनातीतस्स्याताम्। एकार्थकानेकार्थयो: द्विविधशब्दयोरर्थ-ज्ञानावसरेऽपि च विशेषतोऽनेकार्थकशब्दानामर्थपरिज्ञानाय वाच्यसङ्केतानां संयोगविप्रयोगाद्यर्थज्ञापकानामपेक्षा भवत्येव नूनम्, तत्रापि सविशेषं स्वराणाम् । अतः एव शोधसारविकत्थने नास्ति संदेहो यत् पदस्य याथार्थ्यस्वरूपप्रमायै पदार्थस्य विशेषेण सामान्येन चावबोधाय स्वराङ्कनमावश्यकम्। स्वराङ्कनेनैव भाषाया: श्रुतिमाधुर्यविस्तारेण सह

---

25 अष्टाध्यायी - 3/1/7

स्फुटत्वञ्चापि बलीयान् विधातुं शक्याः अध्येतारः । तस्माच्च स्वराङ्कनमिदं युगस्यास्य शब्दजालविभेदनाय सेतुसाधनमिति।

**सन्दर्भग्रन्थानां निर्देशः-**

1) अष्टाध्यायीसूत्रपाठः पाणिनिमुनिप्रणीतः,सम्पादकः - पण्डितब्रह्मदत्तजिज्ञासुः, प्रकाशकः- रामलाल कपूर ट्रस्ट रेवली हरियाणा,प्रकाशनवर्षम् -1991

2) पाणिनीयशिक्षा -व्याख्याकारः शिवराज आचार्यः कौण्डिन्न्यायनः,प्रकाशकः -चौखम्बा विद्याभवन वाराणसी प्रकाशनवर्षम् -2021

3) वाक्यपदीयम् -भर्तृहरिप्रणीतम् -सम्पादकः -प्रो. रामकिशोर त्रिपाठी, प्रकाशकः -चौखम्बा संस्कृत पुस्तकालय,वाराणसी प्रकाशनवर्षम् -2022

4) व्याकरणमहाभाष्यम् महर्षिपतञ्जलिप्रणीतम् सम्पादकः डॉ. जयशङ्करलाल त्रिपाठी,प्रकाशकः -चौखम्बा कृष्णदास अकादमी,वाराणसी प्रकाशनवर्षम् -2019

5) निरुक्तम् महर्षियास्कप्रणीतम् सम्पादकः -डॉ. उमाशङ्करशर्मा ऋषिः, प्रकाशकः चौखम्बा विद्याभवन वाराणसी, प्रकाशनवर्षम् -2022

6) वैदिक स्वर मीमांसा -लेखकः - पंडितयुधिष्ठिरमीमांसकः प्रकाशकः - श्री रामलालकपूरट्रस्ट -2009

*********

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५
ISSN: 0975-1769 UGC CARE ID:101000019

# वैदिकसाहित्ये पर्यावरणविज्ञानम्

**डा.पवनकुमारपाण्डेयः**
सहायकाचार्यः, संस्कृतवेदाध्ययनविभागः
कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः

**शोधसारः** - *साम्प्रतं विश्वस्मिन् विश्वे प्रमुखसमस्यासु पर्यावरणप्रदूषणसमस्या प्रमुखा समस्या वर्तते। अद्य सम्पूर्णविश्वस्य सामाजिको भौगोलिको वा परिवेशः प्रतिक्षणं विनाशोन्मुखं प्रति गच्छन् दृश्यते। अस्य मूलकारणमस्ति पर्यावरण-प्रदूषणम्। मनुजस्य यथा - यथा विकासो जायते तथा तथा स प्रकृतेर्दूरतरं प्रयाति। वस्तुतः मानवस्य एष विकासो भौतिकदृष्टेर्विकास एव। स नित्यमेव स्वार्थपूर्तये प्राकृतिकसंसाधनानां दोहनं कुर्वन्नस्ति। अनेन पर्यावरणसन्तुलनं ध्वंसतामेति। मानवकृतयाऽनया क्रियया मानवस्यैव जीवनं सर्वाधिकं सङ्कटापन्नं जायते। वनोच्छेदनेनेदानीं वायुमण्डले विक्रिया, वर्षयामसन्तुलनं, भूमावनुर्वरत्वं पर्वतेषु च क्षरणमपि प्रत्यक्षमेवानुभूयते। उत्खननेन भूस्खलनं प्रवर्धते। नद्यः कृशतोयाः शुष्कतां प्रति यान्ति। जलस्रोतांसि जलाशयाश्च मलावस्कराधारा वायुश्च विषायते। एवं ह्यस्माकं पर्यावरणं भृशं प्रदूषितं जायते।*

*अस्माकं भारतीया जीवनपद्धतिः वैदिकसंस्कृतिश्च प्रकृतिप्रेम्णः पर्याय एव। अस्य निदर्शनमस्त्यस्माकं वैदिकवाङ्मयम्। यत्र नैकसूक्तेषु मन्त्रेषु च पर्यावरणविषयकं चिन्तनं प्राप्यते पर्यावरणं संरक्षितुं प्रयत्ना अपि दृश्यन्ते। वैदिकवाङ्मये पर्यावरणं मानवजीवनस्य प्राकृतिकमनुशासनरूपेण वर्णितम्। महर्षिभिः मानवनां कल्याणाय पर्यावरणस्य महत्त्वं, संरक्षणं, प्रकृत्या सह सान्निध्यं, संवेदनशीलता पर्यावरण-चेतनादिविषयाः प्रतिपादिताः। वैदिक-साहित्ये पर्यावरणमहत्त्व-संरक्षणादिविषयकं पर्याप्तं चिन्तनम् उपलभ्यते।तदत्र पत्रेस्मिन् उपस्थाप्यते।*

**कूटशब्दः**- वैदिकवाङ्मयम्, वेदः, पर्यावरणम्, पर्यावरणप्रदूषणम्, पर्या-वरणस्य महत्त्वम्, पर्यावरणचेतना, भूमिः, आपः, वायुः, यज्ञः, वृक्षाः, वनस्पतयादयः।

पर्यावरणशब्दस्य अर्थस्तु परितः आवृणोति इति पर्यावरणम् अर्थात् येन जीवाः परोक्षापरोक्षरूपेण वा आव्रियन्ते तदेव पर्यावरणम्। केचनात्र परिवेश इति शब्द प्रयुज्यन्ते। पर्यावरणं भौतिक- जैविक तत्त्वानां सङ्कलनेन भवति। तेषु भौतिकतत्त्वेषु स्थलमण्डलं जलमण्डलं वायुमण्डलं रसायन-तत्त्वानां च संग्रहो वर्तते। जैविक तत्त्वेषु समस्तं जीव-जगद्-वृक्ष-वनस्पतयादयः सन्ति। अथर्ववेदे पर्यावरणसङ्कटकतत्त्वेषु तत्त्वत्रयं प्रमुखं वर्तते। तानि सन्ति- आपः वाता: ओषधयश्च। एतानि पर्यावरणं निर्मापयन्ति-

**त्रिणि छन्दांसि कवयो वियेतिरे पुरुरूपं दर्शतं विश्वचक्षणम्।**
**आपो वाता ओषधयः तान्येकस्मिन् भुवन अर्पितानि।।**[1]

**भूमिः** - पृथ्वी अस्माकम् आश्रयस्थलं वर्तते। भूमिः वेदे मातारूपेण स्तुतास्ति। ऋग्वेदे **"पृथिवी माता महीयम्"**[2] शुक्लयजुर्वेदे **"पृथिवी माता द्यौष्पिता"**[3] अथर्ववेदे **"माताभूमिः पुत्रोऽहं पृथिव्याः"**[4] इति। एषा मातेव अस्मान् पालयति पोषयति च। अस्यां पृथिव्यां शस्यान्युत्पद्यन्ते। शस्यैः प्राणिनो जीवन्ति । अतो भूमिं दृढं कुरु तां मा हिंसीः। यथोक्तं शुक्लयजुर्वेदे-

**भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री।**
**पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा हिंसीः।।**[5]

अथर्ववेदे उक्तं यत् पृथ्वी अस्मान् पोषयति, अस्माकं सम्पत्तेः रक्षां करोति,सर्वेभ्यः सुखप्रदात्री अस्ति। अत एषा अस्माभिः रक्षणीया-

**विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी।**
**वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणो नो दधातु ॥**[6]

---

[1] अथर्ववेदः,१८.०१.१७

[2] ऋग्वेदः १.६४.२३

[3] शुक्लयजुर्वेदः २.१०

[4] अथर्ववेदः१२.०१.१२

[5] शुक्लयजुर्वेदः १,१८

[6] अथर्ववेदः १२.१.६

तत्रैव ऋषिः प्रार्थयति -हे पृथ्वी अहं तव यं भागं खनामि तं शीघ्रं पूर्णं भवेत्। हे अन्वेष्टव्या वसुधे! अहम् एतादृशं किमपि कर्म न करवाणि येन तव मर्मस्थले प्रहारो भवेत्। अर्थात् त्वां कापि हानिः न भवेदित्यर्थः-

**यत्ते भूमिं विखनामि क्षिप्रं तदपि रोहतु।**
**माते मर्म विमृग्वरि मा ते हृदयमर्पितम्।**[7]

**आपः**- 'जलं वै जीवनम्' जलाभावात् प्राणा उत्क्रामन्ति नश्यति च सर्वम्। सम्प्रति जलप्रदूषणस्यापि समस्या दृश्यते। नद्यः सागरा अन्ये च जलाशयाः भृशं प्रदूषिताः। उद्योगानामवस्करोच्छिष्टविसर्जनं नगराणाञ्च मलापसारणं नदीषु सागरेषु च क्रियते। ऋग्वेदे नदीनां मातृवत् सम्मानं दृश्यते -

**याः प्रवतो निवत उद्वत उदन्वतीरनुदकश्च याः।ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवन्तु सर्वा नद्यो अशिमिदा भवन्तु।।**[8]

शुक्लयजुर्वेदे उक्तं यत् आपः अर्थात् जलम् अस्माकं मातृवदस्ति। जलं अस्मान् शोधयित्वा पवित्रं उत्तमञ्च कुर्यात् -

**आपो अस्मान्मातरः शुन्धयन्तु घृतेननो घृतप्वः पुनन्तु।**
**विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि ॥**[9]

वेदे जलममृततुल्यं भवति इत्युक्तम् -'**अप्स्वन्तरमृतमप्सु भेषजम्**'[10] शुद्धा न आपस्तन्वे क्षरन्तु इत्यादीनि वचनजातानि प्रकटयन्ति यत् शुद्धानि जलानि रोगदोषतापहराणि भवन्ति, देहे शक्तिमभिवर्धयन्ति, कण्ठस्वरं च साधयन्ति, नेत्रदोषम् हरन्ति। यथा–

**आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे ॥**
**यो वः शिवतमो रसस्तस्य भाजयतेहनः। उशतीरिव मातरः॥**
**तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥**[11]

---

[7] अथर्ववेदः १२.१.३५
[8] ऋग्वेदः ७.५०.४
[9] शुक्लयजुर्वेदः१०.१७.१०
[10] तैत्तिरीयसंहिता, १.७.७.१
[11] ऋग्वेदः१.३

वेदेषु वर्षायाः जलस्य प्रवाहितजलविषये उक्तं यत् वर्षाजले तथा अन्यस्रोतेभ्यः यथा कूपात् सरोवरादादि निर्गते जले तडगजले प्राणिनां पोषणं भवति। एतादृशेन पूरकतत्वयुक्तेन जलस्य प्रयोगेण भवन्तः वेगवन्तः तथा शक्तिवन्तः भवेयुः -

**अपस्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तये।**
**देवा भवत वाजिनः ॥**[12]

अथर्ववेदे उक्तं यदस्मच्छरीरपुष्ट्यर्थं शुद्धा आपः प्रस्रवन्तु, अप्रियाणि स्वादशून्यानि अस्वास्थ्यकराणि च जलानि क्वचिद् दूरमपरस्थानमुपगतानि च भवन्तु। अहं तु पवित्रेण पयसा स्वकं शरीरं परिवर्द्धयामि पवित्रयामि च। यथा-

**शुद्धा न आपस्तन्वे क्षरन्तु यो नः सेदुरप्रिये तं नि दध्मः।**
**पवित्रेण पृथिवि मोत् पुनामि।।**[13]

एवमेव ऋषिः प्रार्थयते यत् सविता या जनयति या सुवर्णरूपाः सन्ति, याश्च पीत्वा पुमांसो भवन्ति पुष्टाः, या देवानां पेयाः याश्चान्तरिक्षे बहुधा भवन्ति, ता आपो मे शिवाः सन्तु, मदीयां त्वचं सुखं स्पृशन्तु, घृतरूपाः पवित्राश्च भूत्वा स्योना भवन्तु। यथा अथर्ववेदे-

**हिरण्यवर्णाः शुचयः पावका यासु जातः सविता यास्वग्निः।**
**या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु।।**[14]

**वायुः**- वायोः अस्माकं जीवने बहुमहत्वं विद्यते। सम्प्रति वायुमण्डलं प्रदूषितं वर्तते। महानगरेषु वायुप्रदूषणस्यातिविकटा स्थितिः वर्तते। तैलचालित-वाहनेभ्यो वस्तुनिर्माणोद्योगशालाभ्योऽन्यैश्चाप्यपद्रव्यज्वलनेभ्यो निस्सृतो-त्सृष्टा धूमोद्गारा भृशं दूषयन्ति वायुमण्डलम्। यदा शुद्धा वाता वान्ति तदा प्राणिनां प्राणाः स्थिराः पुष्टाश्च भवन्ति। वेदेषु बहुशो वायोः प्रार्थना विद्यते। ऋषिः कथयति यत् समन्तात् निर्दोषाः सगन्धा वाता वान्तु। वाता अभितो मधु क्षरन्तु सुखवृष्टिञ्च कुर्वन्तु। यथा- **मयोभूर्वातो अभिवातु** लोके शुद्धः

---

[12] अथर्ववेदः १२.१.३०

[13] अथर्ववेदः१.३३.१

[14] ऋग्वेदः१०.१६९.१

प्रवहन् गन्धवहः सर्वरोगहरो भवति। वायुस्तु पितेवास्मान् पाति, सम्भरणं करोति, मातेव निर्माति तनोति च जीवनवृद्धिं, वायवः सर्वप्राणिनां प्राणाधाराः। यथोक्तं ऋग्वेदे-

**वात आवातु भेषजं शंभु मयोभु नो हृदे।**
**प्रण आयूँषि तारिषत्।।**[15]

वायौ प्राणप्रदायिनी शक्तिमभिलक्ष्य कृतज्ञतां ज्ञापयन् ऋषिः प्रार्थयति यद् भो वायुदेव! त्वं प्राणामृतनिधिरस्ति।अतो ममापि जीवनं वर्धयितुममृतकणान् सर्वत्र प्रक्षिप-

**यददो वात ते गृहेमृतस्य निधिर्हितः।**
**ततो नो देहि जीवसे।।**[16]

अथर्ववेदे वायुः विश्वभेषजनाम्ना व्यपदिश्यते। यदा सकलभेषजसारं विश्वक् विकिरन् वायुर्वाति तदा दीर्घजीवनप्रदात्रीं प्राणशक्तिं प्रयच्छति। यथोक्तम् -

**आ वात वाहि भेषजं वि वात वाहि यद्रपः।**
**त्वं हि विश्वभेषज देवानां दूत ईयसे।।**[17]

अस्माकं वैदिकी संस्कृतिः यज्ञमयी। तदानीं जीवनचर्यायां नित्यमेव यज्ञस्य प्राधान्यम्। यतो हि यज्ञमयो वेदः। यज्ञो वै प्राणाः। यज्ञो वै पुरुषः, यज्ञ एव ब्रह्म। एवं बहुशो यज्ञस्य महिमा प्रकीर्तितः सर्वकामानां फलप्रदाः सन्ति विविधा यज्ञाः। विधिविधानेनानुष्ठिता यज्ञाः न केवलं यजमानस्याभीष्टं कुर्वन्त्यपि तु वायुमण्डलस्य शोधनं कृत्वा सुवृष्टिमपि कारयन्ति। अत इदानीं यज्ञानुष्ठानस्य अधिका आवश्यकता वर्तते। यज्ञधूमैः वायुशोधनं भवति। श्रीमद्भगवद्गीतायां यज्ञस्य सर्वयोनित्वं पर्यावरणविषयकं तन्महत्त्वञ्च निर्दिष्टम्—

**अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**
**यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।।**[18]

---

[15] ऋग्वेदः१०.१६९.१

[16] ऋग्वेदः १०.१८६.३

[17] अथर्ववेदः ४.१३.३

[18] श्रीमद्भगवद्गीता, ३.१४

वायुशोधने वृक्षवनस्पतीनां नितरां महत्वं विद्यते। वृक्षाणां वनस्पतीनाञ्च पर्यावरणस्याङ्गत्वं तत्संरक्षणोपयोगित्वं स्पष्टमेवानुभूयते। पर्यावरणसंरक्षणाय वृक्षाणामुपयोगा नैकविधाः। वृक्षा वायुमण्डलं परिशोधयन्ति ते वायुप्रदूषणं निवार्य प्राणिमात्रेभ्यः प्राणवायु (ऑक्सीजन) इति प्रयच्छति। एवमेव वृक्षः सुवृष्टिमपि कारयन्ति। वृक्षा भूमेः क्षरणं निवार्य तस्याः संरक्षणमपि कुर्वन्ति। इत्थं बहुहिताः वृक्षाः। अतः वैदिकवाङ्मये वृक्षवनस्पतीनां माहात्म्यं बहुधा परिकीर्तितम्। वेदेषु वृक्षवनस्पत्यौषधीनां ससम्मानमुल्लेखः प्राप्यते। ऋषिभिः पर्यावरणदृष्ट्या अमीषां महत्त्वं विज्ञाय श्रद्धापूर्वकं वर्णनं कृतं तत्र देवत्वञ्च प्रतिष्ठापितम्। शुक्लयजुर्वेदे शतपथब्राह्मणे च रुद्रः वृक्षौषधिरुपेण तत्पालकरूपेण च स्तूयते तद्यथा-

**"नमो वृक्षेभ्यो हरिकेशेभ्यः"**[19] **"वनानां पतये नमः"**[20]
**"अरण्यानां पतये नमः"**[21] **"ओषधीनां पतये नमः"**[22]
**"नमो वन्याय च"**[23] **"ओषधयो वै पशुपतिः"**[24]

वृक्षाः कार्बन डाइ-आक्साइडरूपं विषं पीत्वा अमृतरूपं प्राणवायुं (ऑक्सीजन)प्रददति। वेदे वनस्पतिः शान्तिप्रदः रोगनाशकश्च इत्युद्धोषितः- **"वनस्पतिं शमितारम्"**[25], **"वनस्पतिः शमिता"**[26] इति।

अथर्ववेदे वृक्षस्य महत्त्वं प्रतिपादितम्, उक्तं यत् यदि वृक्षाः सर्वत्र व्यारोपिता व्याप्ताः स्युस्तदा द्यौः पृथिवी सम्पूर्णमेव जगद् वा सुरक्षितं सुखसमृद्धं च स्याद् रोगश्च निवर्तेत-

[19] शुक्लयजुर्वेदः, १६.१७
[20] शुक्लयजुर्वेदः,१६.१८
[21] शुक्लयजुर्वेदः,१६,१९
[22] शुक्लयजुर्वेदः,१६.१९
[23] शुक्लयजुर्वेदः,१६.३४
[24] शतपथब्राह्मणम् ६.१.३.१२
[25] शुक्लयजुर्वेदः२८.१०
[26] शुक्लयजुर्वेदः,२७.२१

**अस्थादुद्यौरस्थात् पृथिव्यस्थाद् विश्वमिदं जगत्।**
**अस्थुर्वृक्षा ऊर्ध्वस्वप्रास्तिष्ठाद् रोगो अयं तव।।**[27]

वैदिकवाङ्मये वनस्पत्योषधिवृक्षादीनामारोपणं संरक्षणं संवर्धनं करणीयमिति विषये ऋषिभिः भृशमुक्तम्। यथा ऋग्वेदे "**वनस्पतिं वन आस्थापयध्वम्**"[28] इत्यनेन मन्त्रेण उक्तं यत् वनेषु वृक्षादीनामारोपणेन वृक्षाः वनस्पतयश्च संवर्धनीयाः पोष्याश्च भवन्ति। अथर्ववेदेऽपि उक्तं यत् ईश्वरेण जलपवनौषधयः इह जगति प्राणिमात्रस्य श्रेयसे सुखशान्तिसमृद्धये च परमेश्वरेणोत्पादिताः "**आपो वाता ओषधयस्तान्येकस्मिन् भुवन अर्पितानि"**

वस्तुतः मनुष्याणां बहूनि प्रयोजनानि उद्देश्यानि च वनवृक्षैः निष्पाद्यन्ते। अतस्तेषां संरक्षणाय वर्धनाय च सदा मानवं वेदाः उपदिशन्ति। ऋग्वेदस्य दशममण्डलस्य ओषधियुक्तं अरण्यानीसूक्तं च नानौषधिवनानां गुणोप-योगितावर्णनैश्च परिपूर्णमस्ति। एवमेव अथर्ववेदे विविधवनस्पत्यो-षधीनाम् उपयोगेन राजयक्ष्माभृत्यसाध्यरोगाणां निवृत्तिशमनोपायाः प्रति-पादिताः सन्ति। तत्र नैकेषु सूक्तेषु स्वास्थ्यारोग्यवर्णनस्य समुल्लेखः प्राप्यते। अतः पृथ्व्यामुत्पादिता इमा ओषधयः जीवनदायिन्यः बलप्रदायिन्यः रोगनाशिन्यः, आयुर्वर्धिन्यश्च सन्ति। एतासामिदं वैशिष्ट्यं वर्तते यत् एतासां खनितारः प्रयोक्तारश्च उभावपि रोगमुक्ता जायन्ते।"

**मावो रिषत् खनिता यस्मै चाहं खनामि वः।**
**द्विपाच्चतुष्पादस्माकं सर्वमस्त्वनातुरम्"**[29]

माध्यन्दिनसंहितायां सर्वमपि पर्यावरणं सर्वेषां कृते मधुमयं हितकरं शान्तिप्रदञ्च भवेदिति प्रार्थना कृता। रसवन्तः वाताः वान्तु, नद्यः मधु उदकं क्षरन्तु, ओषधयः मधुमत्यः सन्तु। मधुमत् रात्रिरस्तु अपि च उषसः, मातृभूतः पृथिवीलोकः पितृभूतश्च द्युलोकः मधुमानस्तु। वनस्पतिः, सूर्यः, गवादयः पशवः मधुमन्तो भवन्तु -

---

[27] अथर्ववेदः ६.४४.१

[28] अथर्ववेदः, १८.१.१७

[29] ऋग्वेदः, १०, १७.२०

**मधु व्वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः।।**[30]
**मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता।।**[31]
**मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।।**[32]

अर्थात् वातादीनि रसवन्त्यस्माकं कृते मधुमयानि भोग्यानि सन्त्वित्याशयः। अपि च तत्रैव सर्वत्र शान्तेः कामना कृता। द्युलोके अन्तरिक्षे पृथिव्यामप्स्वोषधीषु वनस्पतिषु विश्वदेवेषु ब्रह्मणि सर्वस्मिंश्च शान्तिर्भवतु, सा शान्तिः मां प्रत्यस्तु-

**द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।**
**वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिः ब्रह्मशान्तिः सर्वं शान्तिः**
**शान्तिरेव शान्तिः सा मा शान्तिरेधि।।**[33]

एवं वैदिकवाङ्मये पर्यावरणविषयकं चिन्तनं प्राप्यते, यत्र पर्यावरणेन सह सम्बन्धः तादात्म्यं पर्यावरणस्य महत्त्वं संरक्षणोपायाश्च निर्दिष्टाः। एतादृशेषु मन्त्रेषु स्पष्टं भवति यत् वैदिकर्षयः पर्यावरणं प्रति बह्वधिकसंवेदशीलाः आसन्। यदि एतादृशीं संवेदनां चेतनां वयं स्वमनसि स्थापयामश्चेत् पर्यावरणसंरक्षणं स्वयमेव भविष्यति। इदानीं पर्यावरणस्य विशुद्धं रूपमस्मान् परित्यज्य दूरं प्रयाति तथाऽस्माकं जीवनं सङ्कटापन्नं जायते। अत इयं वैदिकी पर्यावरणचेतना अस्माभिः स्वे स्वे मनस्यानेतव्या कर्मणि व्यवहर्तव्या च। एवं हि पर्यावरणं संरक्ष्य स्वजीवनस्य रक्षणं कर्तव्यमिति शम्।

---

[30] शुक्लयजुर्वेदः,१३.२७
[31] शुक्लयजुर्वेदः,१३.२८
[32] शुक्लयजुर्वेदः,१३.२९
[33] शुक्लयजुर्वेदः,३६.१७

**सहायकग्रन्थसूची**

१. ऋग्वेदः,चौखम्बासंस्कृतप्रतिष्ठम् ,वाराणसी,२०२१

२. शुक्लयजुर्वेदः,चौखम्बाविद्याभवनम् ,वाराणसी ,२०१३

३. तैत्तिरीयसंहिता,मेहरचन्दलछमनदासप्रकाशनम्, नवदेहली,२०१८

४. सामवेदसंहिता,चौखम्बासंस्कृतप्रतिष्ठम् ,वाराणसी,२०२१

५. अथर्ववेदशौनकसंहिता, नागप्रकाशनम्,२०१९

६. शतपथब्राह्मणम्,चौखम्बाओरियंटालियाप्रकाशनम्, २०१९नवदेहली

७. श्रीमद्भगवद्गीता,गीताप्रेसगोरखपुरप्रकाशनम् ,२०००

८. वेदों में पर्यावरणीय चेतना - डा.उपेन्द्रकुमार त्रिपाठी पिलग्रिम्स प्रकाशन, वाराणसी,२०१९

९. वैदिकवाङ्मय में पर्यावरणचेतना, रिचा शर्मा, ईस्टर्न बुक लिन्कर्स प्रकाशन,२०२१

१०. प्राचीन संस्कृत साहित्य में पर्यावरण परिशीलन, डा. संजू मिश्र, अमरग्रंथ प्रकाशन,२०१७

*********

# हिन्दी – प्राकारः

संस्कृतविमर्शः
(July-December 2023) अङ्क-२५
ISSN: 0975-1769 UGC CARE ID:101000019

# आन्वीक्षिकी विद्या का स्वरूप

**डॉ. यशवन्त कुमार त्रिवेदी**
सहायक आचार्य
केन्द्रीय संस्कृत विश्वविद्यालय
(Sub ID: CSU/SV-088)

**शोधसार** - *भारतीय ज्ञान परम्परा में आन्वीक्षकी / आन्वीक्षिकी शब्द का प्रयोग न्यायदर्शन अथवा तर्कशास्त्र को बोध कराने के लिये होता है। किन्तु कौटिल्य के अर्थशास्त्र में विद्याओं के निरूपण में आन्वीक्षकी शब्द का प्रयोग सांख्य, योग और लोकायत के लिये प्रयुक्त किया गया है। कौटिल्य ने शब्दतः आन्विक्षकी को न्यायदर्शन के लिये प्रयुक्त नहीं किया है। वर्तमान समय में सांख्य और योग क्रमशः महर्षि कपिल एवं पतञ्जलि के द्वारा प्रयुक्त शास्त्र है, और लोकायत दर्शन चार्वाक दर्शन के लिये प्रयुक्त होता है। इन तीनों शास्त्रों के लिये ही आन्वीक्षकी शब्द का प्रयोग महर्षि कौटिल्य ने किया है। भगवत्पाद शङ्कराचार्य ने अनेकों बार लोकायत शब्द का अर्थ चार्वाक के लिये किया है, भारतीय दर्शनशास्त्र के वेत्ता लोकायत शब्द का प्रयोग चार्वाक के लिये ही करते हैं। वर्तमान समय में भी लोकायत शब्द का अर्थ प्रायश: चार्वाक से ही अभिप्रेत होता है। लोकायत शब्द का प्रयोग लोक में विस्तृत अथवा लोक में व्याप्त होने से है। पुनः न्यायदर्शन के लिये आन्वीक्षकी शब्द का प्रयोग कैसे होता है? इत्यादि विषयों का विवेचन इस शोधपत्र में किया गया है।*

**कूट शब्द** – आन्वीक्षकी, आन्वीक्षिकी, चार्वाक, लोकायत, न्यायदर्शन, विद्या, अर्थशास्त्र

भारतीय दर्शन जगत में आन्वीक्षिकी शब्द का प्रयोग बहुलतया दृष्टिगोचर होता है। आन्वीक्षिकी शब्द अनु उपसर्ग पूर्वक दर्शनार्थक/ज्ञानार्थक 'ईक्ष' धातु से 'ठञ्' एवं 'ङीप्' प्रत्यय से निष्पन्न हुआ है। अनु का अर्थ अनन्तर एवं ईक्षण का अर्थ देखना एवं ज्ञान सामान्य की प्रक्रिया

अथवा ज्ञान सामान्य के लिये प्रयोग में आता है। वस्तुतः 'ईक्ष' धातु के पूर्व में अनु उपसर्ग योजित करने से ज्ञान के अनन्तर होने वाले ज्ञान का बोधक अन्वीक्षा शब्द होता है, एवं अन्वीक्षा से सम्बन्धित शास्त्रविशेष को आन्वीक्षिकी कहते हैं। कहीं-कहीं आन्वीक्षकी शब्द का भी प्रयोग दृष्टिगोचर होता है। अर्थशास्त्र ग्रन्थ के अनुवादक एवं सम्पादक उदयवीर शास्त्री द्वारा अनूदित हिन्दी व्याख्या के संस्करणों में प्राय: सर्वत्र आन्वीक्षकी शब्द का ही प्रयोग किया गया है, अन्यत्र प्रकाशनों में भी आन्वीक्षकी शब्द का ही उल्लेख है। न्यायभाष्य और न्यायपरम्परा के ग्रन्थों में आन्वीक्षिकी शब्द का उल्लेख होता है। संस्कृत के शब्दकोषों में भी प्राय: आन्वीक्षिकी शब्द का ही उल्लेख है। केवल कुछ मात्राओं का परिवर्तन होने मात्र से विशदतया अर्थभेद हो ऐसी सम्भवना न्यून ही है।

श्रीमद्भागवतमहापुराण के प्रथम स्कन्ध के तृतीय अध्याय में भगवान के अवतारों का वर्णन किया गया है। छठे अवतार के रूप में अत्रि के संतान दत्तात्रेय में अवतीर्ण हुये। इस दत्तात्रेय के अवतार में वे अलर्क और प्रह्लाद आदि को आन्वीक्षकी का उपदेश दिया।[1] इस प्रसंग की व्याख्या करते समय आन्वीक्षकी का शब्दार्थ ब्रह्मज्ञान से किया गया है।

अर्थशास्त्र के द्वितीय अध्याय के प्रथम प्रकरण में कौटिल्य कहते हैं कि आन्वीक्षकी, त्रयी, वार्ता और दण्डनीति के भेद से विद्या चार प्रकार से है। मनु ने त्रयी, वार्ता और दण्डनीति के भेद से विद्या के तीन प्रकार स्वीकार किये हैं, आन्वीक्षकी-विद्या का अन्तर्भाव त्रयी के अन्तर्गत है। बृहस्पति के अनुसार वार्ता और दण्डनीति ये दो प्रकार की ही विद्यायें हैं और शुक्राचार्य के अनुसार दण्डनीति एकमात्र विद्या है। इस दण्डनीति से ही अन्य विद्याओं का योगक्षेम होता है।[2] वस्तुत: अर्थशास्त्र के अनुसार

---

[1] "षष्ठे अत्रेरपत्यत्वं वृतः प्राप्तोऽनुसूयया।
आन्वीक्षकीमलर्काय प्रह्लादादिभ्य ऊचिवान्॥"
श्रीमद्भागवत् महापुराण, १.३.११., पृ.सं. ५५

[2] "आन्वीक्षकी त्रयी वार्ता दण्डनीतिश्चेति विद्या:। त्रयी वार्ता दण्डनीतिश्चेति विद्या:। त्रयी वार्ता दण्डनीतिश्चेति मानवा:। त्रयीविशेषो ह्यान्वीक्षकीति। वार्ता दण्डनीतिश्चेति बार्हस्पत्या:। संवरणमात्रे हि त्रयी लोकयात्राविद इति।

कालक्रम से विद्या के विकास का प्रारम्भ शुक्राचार्य से बृहस्पति, बृहस्पति से मनु और मनु से कौटिल्य द्वारा होता है। त्रयी का अर्थ सामवेद, ऋग्वेद एवं यजुर्वेद है, अथर्ववेद और इतिहासवेद ये दोनों भी वेदत्रयी के अन्तर्गत ही स्वीकार किये जाते हैं। त्रयी के छह अङ्ग शिक्षा, कल्प, व्याकरण, निरूक्त, छन्द और ज्योतिष हैं।[3] इतिहासवेद का तात्पर्य पुराण आदि से है। कृषि, पशुपालन एवं व्यापार से सम्बन्धित विद्या का नाम वार्ता है।[4] आन्वीक्षकी, त्रयी और वार्ता के योगक्षेम का साधन दण्ड है और दण्डविषयक नीति को दण्डनीति कहा जाता है। अप्राप्त की प्राप्ति, प्राप्त का सम्यकतया संरक्षण, रक्षित पदार्थों की वृद्धि और वृद्धि को प्राप्त हुये पदार्थों का उचित स्थान में उपयोग करवाने वाली विद्या दण्डनीति है।[5]

आन्वीक्षकी विद्या के बारे में कौटिल्य कहते हैं कि त्रयी आदि विद्याओं में प्रधानता और अप्रधानता का निर्धारण हेतुओं के द्वारा परीक्षण करके ही सम्भव है, इस हेतुशास्त्र को ही आन्वीक्षकी शास्त्र कहा जाता है। इस आन्वीक्षकी शास्त्र के द्वारा दु:ख और सुख के समय उचित मार्ग का बोध होता है, जिसके कारण सोचने, समझने और बोलने आदि व्यवहार में प्रज्ञा को उत्पन्न करने में आन्वीक्षकी विद्या का महत्त्वपूर्ण योगदान हो जाता है।[6]

इस तर्कविद्या को चतुर्विध विद्या के अन्तर्गत कौटिल्य स्वीकार करते हैं, सम्भवत: कौटिल्य ने ही आन्वीक्षकी नामक चतुर्थ विद्या का सर्वप्रथम उल्लेख किया है। आन्वीक्षकी के अन्तर्गत सांख्य, योग और

---

दण्डनीतिरेका विद्यत्यौशनसा:। तस्यां हि सर्वविद्यारम्भा: प्रतिबद्धा इति॥"
*अर्थशास्त्र*, द्वितीय अध्याय, प्रथम प्रकरण, १-७, पृ.सं. ८

[3] "सामर्ग्यजुर्वेदास्त्रयस्त्रयी। अथर्वेतिहासवेदौ च वेदा:। शिक्षाकल्पो व्याकरणं निरूक्तं छन्दोविचित्तिर्ज्योतिषामिति चाङ्गानि॥" उपर्युक्त

[4] "कृषिपशुपाल्ये वाणिज्ये च वार्ता॥" उपर्युक्त

[5] "आन्वीक्षकीत्रयवार्तानां योगक्षेमसाधनो दण्ड:। तस्य नीर्तिर्दण्डनीति:। अलब्धलाभार्था लब्धपरिरक्षणी रक्षितविवर्धनी वृद्धस्य तीर्थेषु प्रतिपादनी च॥" उपर्युक्त

[6] "बलाबले चैतासां हेतुभिरन्वीक्षमाणा लोकस्योपकरोति व्यसनेऽभ्युदये च बुद्धिमवस्थापयति प्रज्ञावाक्यक्रियावैशारद्यं च करोति॥"
*अर्थशास्त्र*, द्वितीय अध्याय, प्रथम प्रकरण, १२, पृ.सं. ९

लोकायत इन तीनों दर्शनों का समावेश है।[7] इन तीनों शास्त्रों के लिये ही आन्वीक्षकी शब्द का प्रयोग कौटिल्य ने इसलिये किया क्योंकि कौटिल्य का समय ईसा से तीन सदीं पूर्व के आसपास स्वीकार किया जाता है। ईसा से तीन सदीं पूर्व में प्रसिद्ध तर्कशास्त्र अथवा दर्शन के रूप में इन्हीं तीनों शास्त्रों की अत्यधिक प्रसिद्धि थी। कौटिल्य के समय में सांख्य, योग और लोकायत दर्शनों के होने में कोई विवाद नहीं है।

आन्वीक्षकी के अवान्तर भेदों में लोकायत शब्द का भी प्रवेश है। किन्तु यहां शङ्का यह होती है कि लोकायत शब्द का तात्पर्य चार्वाक से है अथवा न्यायशास्त्र से है। वस्तुतः ये दोनों ही दर्शन कौटिल्य से पूर्ववर्ती होने के कारण इन दोनों का बोध लोकायत शब्द से होने की सम्भावना है। लोकायत शब्द 'लोक' और 'आयत' इन दो शब्दों से निष्पन्न हुआ है जिससे लोकायत का अर्थ लोक में व्याप्त अथवा 'लोक में प्रसिद्ध' होना है। भगवत्पाद शङ्कराचार्य ने अनेकों बार लोकायत शब्द का अर्थ चार्वाक के रूप में किया है, इसके अतिरिक्त अन्य भी भारतीय दर्शनशास्त्र के वेत्ता लोकायत शब्द का प्रयोग चार्वाक से ही करते हैं। वर्तमान समय में भी लोकायत शब्द का अर्थ प्रायश: चार्वाक से ही अभिप्रेत होने लगा है। लोकायत शब्द का अर्थ लोक में विस्तृत अथवा लोक में व्याप्त होने से है। अमरकोष के तृतीय काण्ड के लिङ्गादिसंग्रहवर्ग के तीसवें श्लोक में लोकायत शब्द का प्रयोग किया गया है। अमरकोश के सभी व्याख्याकारों ने लोकायत शब्द का अर्थ चार्वाकशास्त्र ऐसा कहा है। अमरकोश की प्राचीनतम टीका अमरविवेक में भी लोकायत शब्द का अर्थ **चार्वाक** ही स्वीकार किया गया हैं।[8]

वस्तुत: कौटिल्य के अर्थशास्त्र में प्राप्त लोकायत शब्द का अर्थ चार्वाक-दर्शन परक मानने में कुछ समस्या भी उपस्थित होती हैं, क्योंकि आन्वीक्षकी शब्द का अनेक प्रकार से व्याख्यान उपलब्ध है। आन्वीक्षकी

---

[7] "चतस्र एव विद्या इति कौटिल्यः। ताभिर्धर्मार्थौ यद्विद्यात्तद्विद्यानां विद्यात्वम्। सांख्यं योगो लोकायतम्
चेत्यान्वीक्षकी॥" *अर्थशास्त्र*, द्वितीय अध्याय, प्रथम प्रकरण, ८-१०, पृ.सं. ९

[8] "लोकायतं चार्वाकशास्त्रम्॥" नामलिङ्गानुशासन, अमरविवेक टीका, पृ.सं. ३७०

